# शरभ-तन्त्रम्

## पक्षिराज तन्त्रम्।

(आकाश भैरव कल्पोक्तम्)

''श्री स्वामिपादैः संकलितम्''

-प्रकाशक-

श्री पीताम्बरा संस्कृत परिषद

दतिया (म० प्र०)

# शरभ-तन्त्रम्

## पक्षिराज तन्त्रम्।

(आकाश भैरव कल्पोक्तम्)

''श्री स्वामिपादैः संकलितम्''

-प्रकाशक-

श्री पीताम्बरा संस्कृत परिषद

दतिया (म० प्र०)

प्रकाशकः
श्री पीताम्बरा संस्कृत परिषद
दतिया (म० प्र०)

तृतीयावृत्ति संवत्- २०६३

मूल्य- **70.00**

मुद्रकः
शिवशक्ति प्रेस प्रा. लि.,
नयागांव, ग्वालियर रोड, झाँसी (उ०प्र०)
फोन- 0510–2441092

# -प्रकाशकीय-

भूतपति शङ्कर के दिव्य तेज से आविर्भूत श्री वीरभद्र ही भगवान  शरभ हैं। रुद्र का यह रौद्र एवं धोरतर स्वरूप है। दक्ष का संहार ही इनका प्रथम कार्य है। विरोधियों के दमन करने में इनसे बढ़कर कोई भी देवता तन्त्र शास्त्र में नहीं, अतएव यह तन्त्र की सर्वोच्च उपासना हैं

योगिजन आन्तरिक शत्रुओं का दमन इनके द्वारा सम्पन्न करते हैं। पूज्य आचार्य चरण ने प्रसिद्ध दारुण सप्तक के भाव में यही प्रतिपादित किया है।

इनका साहित्य एवं पूजाविधि विभिन्न स्थानों से संगृहीत कर तन्त्र के रूप में प्रस्तुत है। **इसका व्यय भार श्री प्रेमनारायण त्रिवेदी ने सहर्ष वहन किया** एवं श्री ॐ नारायण द्विवेदी ने मुद्रण योग्य प्रतिलिपि करने में प्रशंसनीय परिश्रम किया है। दोनों महानुभावों को हमारी शुभ कामना।

साधकों को अभीष्ट प्राप्ति ही हमारी कामना है।

**ब्रजनन्दन शास्त्री**
**मन्त्री**

**महाशिवरात्रि**
सं. २०३४

**श्री पीताम्बरा संस्कृत परिषद्,**
**दतिया (म० प्र०)**

# -प्रकाशकीय-

भगवान् श्री शंकर के अनेक रूपों में अत्यन्त क्रोधानल स्वरूप श्री शरभावतार है। योगीजन अपने अन्तः स्थित काम, क्रोध, लोभादि शत्रुओं का इन्हीं का ध्यान करते हुए भस्म सात् करते हैं।

परन्तु सामान्य जन लौकिक शत्रुओं का हनन पक्षिराज श्री शरभ शिव का स्तवन मनन करते हुए हनन करते हैं। प्रस्तुत ग्रन्थ "पक्षिराज तन्त्र" का प्रकाशन तृतीय संस्करण के रूप में संस्कृत परिषद की ओर से प्रकाशित किया जा रहा हे।

आशा है साधक गण अध्ययन कर लाभान्वित होंगे।

**मन्त्री**
**श्री पीताम्बरा संस्कृत**
**परिषद्, पीताम्बरा पीठ,**
**दतिया (म० प्र०)**

**दिनांक २३/०९/२००६**
**शारदीय नवरात्र शनिवार**

# विषय - सूची



| | | |
|---|---|---|
| 1. | शरभ यन्त्र पूजा विधान | 1-3 |
| 2. | मातृकाओं के देवता | 3-10 |
| 3. | शरभ यन्त्र मन्त्र कथन | 10-12 |
| 4. | शरभ जप विधि | 12-15 |
| 5. | यन्त्र क्रम | 15-21 |
| 6. | पीठ पूजा | 21-22 |
| 7. | प्राण प्रतिष्ठा | 22-23 |
| 8. | आवरण पूजन | 23-28 |
| 9. | आकाश भैरव कल्पोक्त प्रकरण | 28-33 |
| 10. | शरभ पूजा क्रम (शरभ प्रयोग) | 33-39 |
| 11. | शरभ कवच | 39-58 |
| 12. | आकाश भैरव कल्प | 58-66 |
| 13. | यन्त्र मन्त्र प्रयोग | 66-69 |
| 14. | चित्रमाला प्रयोग | 69-71 |
| 15. | वश्याकर्षण प्रयोग | 71-72 |
| 16. | स्तम्भ विद्वेषण प्रयोग | 72-74 |
| 17. | उच्चाटन निग्रह प्रयोग | 74 |
| 18. | भोग मोक्ष प्रयोग | 75-76 |
| 19. | आशु गारुड़ यन्त्र कल्प | 76-83 |
| 20. | शरभ शालुव पक्षिराज हृदय | 83-86 |
| 21. | शरभार्चन पद्धति | 87-108 |

| | | |
|---|---|---|
| 22. | पक्षिराज तन्त्र वीर मन्त्र बलि प्रकार | 108-109 |
| 23. | आवरण पूजा | 109-146 |
| 24. | पुरश्चरण | 147-157 |
| 25. | कूर्म चक्र | 157-158 |
| 26. | मंत्रों के दश संस्कार | 158-161 |
| 27. | मंत्र सिद्धि का लक्षण | 161-170 |
| 28. | काम्याभिषेक: (मन्त्र वर्णन) | 170-192 |
| 29. | आशुगारुड़ मन्त्र | 193-195 |
| 30. | दारुण सप्तक | 195-202 |
| 31. | सभाष्य निग्रह दारुण सप्तक | 202-215 |
| 32. | शरभ दिग्बन्धन | 216-217 |
| 33. | शरभ शान्ति स्तोत्र | 217-218 |
| 34. | शरभ सहस्र नामस्तोत्र | 219-233 |
| 35. | नृसिंह कृत शरभ स्तोत्र | 234-236 |
| 36. | शरभोपनिषद् | 236-240 |






# शरभ यन्त्रम्



त्रिकोणं विलिखेत् पूर्वं तद्बाह्ये तु दलद्वयम्।
द्वादशारं तु तद्बाह्ये तद्बाह्ये तु नवास्त्रकम्।।
सप्तास्त्रं चैव पञ्चास्त्रं भूपुरं च क्रमाल्लिखेत्।
पावकादि पृथिव्यान्तं लिखेन्मत्रं यथा क्रमम्।।
तद्वहिः कोणषट्केषु भाग रभ्यमनुं शिषे।
खट् पट् जहि तथा छिन्धि भिन्धि हन्धि लिखेत् क्रमात्।।
अकारादि क्षकारान्तं वेष्टयेद्विन्दु संयुतम्।
महायन्त्रामिदं पुण्यं सप्तावरणाकं परम्।।



ब्रह्मलीन

श्री पीताम्बरापीठाधीश्वर राष्ट्रगुरु परमपूज्य अनन्त श्री विभूषित
श्री स्वामीजी महाराज, वनखण्डेश्वर, दतिया (म.प्र.)

## ।। श्री गणेशाय नमः।।

## ।। अथपक्षिराज तन्त्रम्।।

अष्टाङ्घ्रिश्च सहस्रबाहुरनिलच्छायाशिरोयुग्मभृत्,
द्वित्र्यक्षोतिजवो द्विपुच्छ उदितः साक्षान्नृसिंहापहा।
अर्द्धेनापि भगाकृतिः पुनरथोप्यर्द्धेन पक्ष्याकृतिः,
श्री वीरः शरभः स पातु रुचिरं नीत्वा सदा नो ह्रदि।।१।।

ॐ नमो अष्टापदाय सहस्त्रबाहवे द्विशिरसे त्रिनेत्राय द्विपक्षाय अग्निवर्णाय मृगविहङ्गम रूपाय वीर शरभेश्वराय हुं फट्।

अरुणमरुणमालालंकृतं शङ्कराग्रै, र्विधृत परशु शक्ति पुष्प बाणेषु चापम्।
विविधमणिफणीन्द्रै र्भूषणैर्भूषिताङ्गं।
शरभमखिल नाथं शालुवेशं नमामि ।।२।।

मारं वर्तुलमध्यके वसुदले मायां च लक्ष्मीं तथा,
बाह्ये क्षोणिपुटे लिखेत्प्रतिदिनं रूंकारकंभूपुरे।
मारं साध्यसमन्वितं रिपुजयं त्रैलोक्य मोहाकरं,
नारी वश्यकरं विचित्र मचिरात्साम्राज्य लक्ष्मीप्रदम्।।३।।

आलेख्यं वृत्तमध्ये मरुदनलग्रहद्वन्द्वके शक्ति लक्ष्मीं,
तद्बाह्ये षड्दलान्तः शरभमनु मथो सप्तकं सप्तकञ्च।।४।।

दिव्यगन्धेन युक्तेन भस्मना रत्नमात्रकम्।
चतुरस्त्रगतं कृत्वा तस्मिन् भस्मनि बुद्धिमान्।।५।।

त्रिकोणं विलिखेत्पूर्वं, तदग्रेवृत्तमालिखेत्।
तद्बहिश्चाष्टपत्रं तु द्वादशारं ततः परम्।।६।।
षोडशारं ततः पश्चात् ततो भूपुर युग्मकम्।
त्रिकोण मध्यदेशस्थं शालुवेश्वरमर्चयेत्।।७।।
चिरं ध्यात्वा महामन्त्री गुरुपादुयुगं स्मरन्।
मूलेन गन्धपुष्पादि पुष्पान्तान्मण्डले पुनः।।८।।
आवाहनादि पूजान्तानुपचारान्तान्प्रकल्पयेत्।
चन्द्रसूर्यमहा वन्हि त्रिकोणेषु यजेत् क्रमात्।।६।।
भैरवं वडवाग्निं च दुर्गां कालीं पृथक् पृथक्।
त्रिकोण वृत्त मध्येतु चतुर्दिक्षु यथा क्रमम्।।१०।।
इन्द्रादीनष्टपत्रेषु तत्तन्मन्त्रेण पूजयेत्।
पार्श्वद्वये कालमृत्यू तथा देवीं प्रपूजयेत्।।११।।
मदनां रक्त चामुण्डां मोहनीं द्राविणीं तथा।
शब्दाकर्षणजां वाणीं रमां मायां पुलिन्दिनीम्।।१२।।
शास्तारं क्षोभिणीं ज्येष्ठा द्वादशारे यथा क्रमम्।
पूजयेन्मूलमन्त्रेण स्वस्वमन्त्रेण चाम्बिके।।१३।।
षोडशारे यजेत्पश्चात् षोडशस्वर देवताः।
गणेश्वरं यमं स्कन्दं भैरवश्च महादिशि।।१४।।
प्रागादितो यजेन्मन्त्री मूलेन खयुजा पृथक्।
त्वरितां बीरभद्रञ्च वडवानल भैरवम्।।१५।।
महा मायां यजेद्देवि वायव्यादि विदिक्षुच।
आरम्भ चाग्रतो मन्त्री ब्राह्माद्याश्चाष्ट मातरः।।१६।।

परतस्तु यजेत् सर्वा ककारार्णादि देवताः।
मूलेन शालुं गन्धेन धूपदीपादिकैर्यजेत्।।१७।।
स्तुतिभिस्तोषयित्वाच यथोक्तं प्रणिपत्य च।
मूलमन्त्रं जपेन्मन्त्री अष्टोत्तर सहस्त्रकम्।।१८।।
आचार्यं पूजयेन्मन्त्री यथाशक्त्या धनैस्तथा।
शरभं हृद्ययन्मन्त्री शिवोऽहमिति भावयेत्।।१६।।
तद्भक्तागमनं श्रुत्वा कम्पन्ते विग्रहा ग्रहाः।
किं पुनर्दर्शनात्तस्य। इति श्री आकाश भैरव तन्त्रे
शरभेश यन्त्र पूजा विधानं नाम त्रिचत्वारिंशोऽध्यायः।।

## श्री शिव उवाच

आराधनानन्तरं वक्ष्ये सर्वसिद्धिप्रदायकम्।
भोग मोक्ष प्रदं पुण्यं भुक्ति मुक्त्यैक साधनम् ।।१।।
विषुकालेऽयने पुण्ये पौर्णिमायांच दर्शके।
एकादश्यां च द्वादश्यां शुक्र सौम्येन्दु वासरे।।२।।
जन्मर्क्षे विपदृक्षे च प्रत्यरौ वध ऋच्छके।
शोभने पातके ब्राह्मे दण्ड योग विवर्जिते।।३।।
सिद्धि योगे तथाकाश पाताल रहिते दिने।
विजने मण्डपे रम्ये गोमयेनोपलेपिते।।४।।
विताने पद्ममालाढ्ये धूपदीप समाकुले।
स्नात्वा पवित्र पाणिः सन् शुद्धोमौनी दृढव्रतः ।।५।।
प्राङ्मुखोदङ्मुखोवापि सुखासीनः स्वलङ्कृतः।

अकारं ब्रह्मदैवत्यं श्वेतं सर्ववशं करम्।।६।।
सर्वज्ञत्वं मनोज्ञत्वं कामरूपत्वमम्बिके।
आकारं तु पराशक्तिः श्वेतमार्ष वरानने।।७।।
इकारं विष्णुदैवत्यं श्यामं रक्षाकरं भवेत्।
रूपकान्तिप्रदं श्रेष्ठं वरेण्यं मोक्ष सिद्धिदम्।।८।।
माया दैवतमीकारं श्यामं मोहनकारकम्।
वीराणां वनितानाञ्च वशीकारं वरानने।।६।।
उकारं लोक दैवत्यं श्यामं लोकवशं करम्।
मृतकोत्थापनं पुण्यं कररोगविनाशनम्।।१०।।
ऊकारो पृथिवी बीजं श्यामं रक्षाकरं परम्।
भूत प्रेतपिशाचानां नाशनं रिपु नाशनम्।।११।।
ऋकारं विधि दैवत्यं पीतं सर्वार्थ सिद्धिदम्।
चिरायुष्यं तपः सिद्धिं परं भोगं वरानने।।१२।।
ऋकारं शिव दैवत्यं रक्तं सर्व वशंकरम्।
जन्म मृत्यु जरा व्याधि वर्जितं श्री जयप्रदम्।।१३।।
एकारं बीरभद्रं स्यात् पीतं सर्वार्थ सिद्धिदम्।
निग्रहानुग्रहकरं भीषणं जय वर्द्धनम्।।१४।।
ऐकारं भारतीं विद्यात् स्फाटिकं ज्ञानं सिद्धिदम्।
चतुः षष्ठिः कलासिद्धि दायकं परमं शिवे।।१५।।
ओकारं शिव दैवत्यं ज्योतिर्मयमनुग्रहम्।
मनोवेगप्रदं श्रेष्ठं शान्तं सर्व फलप्रदम्।।१६।।
औकारं शाङ्करं विद्यात् स्फाटिकं सर्व सिद्धिदम्।

सारस्वतं विशेषेण शत्रूणां कोपनाशनम्।।१७।।
अंकारं रूद्रं बीजं स्यात् रक्तं देववशंकरम्।
सर्वलोक जयं कारं कृपा चित्त विशुद्धिदम्।।१८।।
अःकारं कालरूद्रं स्यात् रक्तंपाश निकृन्तनम्।
स्वप्रपञ्चोपसंहारं परमात्मप्रबोधकम्।।१६।।
ककारं ब्रह्म जीवं स्यात् पीतं वृष्टिकरं परम्।
सञ्जीवनम शेषाणां लोकानां वृद्धि कारकम्।।२०।।
खकारं जाह्नवी वीजं स्फाटिकं पाप नाशनम्।
भोग मोक्षप्रदं पुण्यं भुक्ति मुक्ति प्रदायकम्।।२१।।
गकारं तु गणेशं स्यात् पीताभं विघ्ननाशनम्।
पूर्वापरं स्थितं ज्ञानं भूर्लोक विजयप्रदम्।।२२।।
घकारं भैरवं विद्यात् रक्ताभं शत्रु नाशनम्।
महाघोरं गुहाकारं संयुगे जय वर्द्धनम्।।२३।।
ड.कारं काल बीजं स्यात् कृष्णं जीव जयप्रदम्।
महाभीमं जगत्क्षोभ्यं मरणापत्ति भञ्जनम्।।२४।।
चकारं भद्रकालीज्यं रक्ताभं शोभनं परम्।
स्वेच्छाकर्षण वृद्धिः स्यात् स्वस्थानं समयेत्ततः।।२५।।
छकारं भीमकालीज्यं रक्ताभं वैरिनाशनम्।
संकामकं त्रिलोकघ्नं समरे विजयप्रदम्।।२६।।
जकारं जातवेदाख्यं तुर्यं सौदामिनीमयम्।
अभिचारं महाघोरमप मृत्युभयापहम्।।२७।।
झकारमर्द्धनारीशं श्यामं रक्तसमाकुलम्।

सर्व सौख्यकरं श्रेष्ठं भोगमोक्षफलप्रदम्।।२८।।
ञकारं परमं ज्ञेयमवाङ्मनस गोचरम्।
सर्वज्ञानप्रदं ब्रह्म ज्ञानन्दं श्रीजयप्रदम्।।२९।।
टकारं पृथिवी वीजं श्वेतं संहार कारकम्।
कृष्यादावौषधी वृद्धिः पाताल निधि दर्शनम्।।३०।।
ठकारं चन्द्र वीजं स्यात् स्फाटिकं शत्रुनाशनम्।
रोगक्ष्वेड हरं दिव्यं महाज्वरहरंपरम्।।३१।।
डकारं शुक्रबीजं स्यात् पीताभज्ञानदं भवेत्।
मृतसञ्जीवनं च स्यान्महामाया वशं भवेत्।।३२।।
ढकारं वैष्णवं विद्यात् पीतं सर्वार्थ सिद्धिदम्।
बलप्रदं जलस्तम्भं पातालस्यापि दर्शनम्।।३३।।
णकारं बलभद्रंस्यात् श्वेतं बलविवर्द्धनम्।
नित्यत्वं युद्धवीर्यत्वं रिपुदर्पविनाशनम्।।३४।।
तकारं धनदं विद्यात् पीतमैश्वर्य वर्द्धनम्।
यक्ष किन्नर सिद्धानां वशीकारं जगद्वशम्।।३५।।
थकारं तु पराशक्तिः रक्तं कालजयं भवेत्।
शान्तिकं पौष्टिकं चैव भोगमायुष्य वर्द्धनम्।।३६।।
दुर्गा बीजं दकारं स्यात् सर्वार्थस्य च साधनम्।
निग्रहानुग्रहकरं भोगमोक्षैकसाधकम्।।३७।।
धकारं धर्म बीजं स्यात् श्वेतं पुण्य विवर्द्धनम्।
सर्वदेवमयं दिव्यं सर्वदर्शनदर्शनम्।।३८।।
नकारं निर्विकल्पं स्यादप्रमेयाभयाक्षरम्।

वायुवेगं मनोवेगमिच्छारूपं वरानने।।३६।।
पकारमग्नि बीजंस्यात् रक्तं सर्वहरं क्षणात्।
स्त्री नपुंसकादीनाञ्च भवेदाकर्षणं परम्।।४०।।
फकारं भैरवं विद्यात् रक्ताभं विजयं ततः।
महाग्रह हरं रोग सर्वज्वरविनाशनम्।।४१।।
बकारं चाश्विनी बीजं कृष्णाभंबल वर्द्धनम्।
सर्वोँच्चाटकरं क्रूरं संग्रामे विजयप्रदम्।।४२।।
भकारं भार्गवं बीज लोक रक्षण कारणम्।
मकार मीश्वरं बीजं सर्वं संहारकारकम्।।४३।।
यकारं वायु वीजं स्यात् सर्वोच्चाटनकारकम्।
रेफः कृष्णाग्नि बीजं स्यात् रक्ताभं सर्वनाशनम्।।४४।।
जंगमाकर्षणं युद्धे द्विषां सेनाबलं तथा।
लकारं शक्ति बीजं स्यात् पीतं सर्व फलप्रदम्।।४५।।
अग्नि स्तम्भं जलस्तम्भं स्वेच्छा स्तम्भं विशेषतः।
वकारं वारूणं बीजं श्वेतं स्वेच्छाभि सिद्धिदम्।।४६।।
आःकर्षणं जल स्थानामशेषज्वरनाशनम्।
शंकारं शांकरं विद्यात् तेजः सौभाग्य वर्द्धनम्।।४७।।
अन्योन्य कलहादेव वैरिणां नाशनं भवेत्।
षकारं द्वादशादित्यं ज्योतिरारोग्य वर्द्धनम्।।४८।।
शमनं सर्व रोगाणा मायुर्विद्याभिवर्द्धनम्।
सकारं भारती बीजं श्वेतं सरस्वतप्रदम्।।४६।।
प्रतिविद्वज्जनजयं नराणां योषितामपि।

सदाशिवो हकारः स्यात् धूम्रंज्ञानार्थ सिद्धिदम्।।५०।।
अणिमाद्यष्ट सिद्धिः स्यात् चतुः षष्टि कला अपि।
लकारं पृथिवी बीजं पीतं सिद्धि करं परम्।।५१।।
असंभवं दोषवृद्धिर्भूमिद्रव्यस्य दर्शनम्।
क्षकारः श्रीनृसिंहः स्यात् स्फाटिकं मोक्षसिद्धिदम्।।५२।।
रिपुवर्ग हरं सर्वलोकक्षोभकरं परम्।।५३।।
इति सुमति हरेर्यों मातृका देवतानां,
द्युतिबल महिमानामादितः स्वामिवक्त्रात्।
सकलमपि च लब्ध्वा शालुवाराधनान्ते,
जयतु विजयसिद्धे हेंतु बीजेन मन्त्रम्।।५४।।
दशशतमथमन्त्री सावधानः प्रहृष्टः,
प्रणमित दृढभावा प्राकृतारम्भ शून्यः।
जपविधिमपिपूर्व काममायांचपूर्णां,
प्रथममपि नियोज्यत्वेक मेकं च कुर्यात्।।५५।।
पञ्चाशत् वर्णान् प्रथमं प्रयोज्य,
जपेत् सहस्त्रं शरभेश मन्त्रम्।
स मानवः सर्व कला प्रवीणः,
प्रयाति तूर्ण पदमीश्वरस्य।।५६।।
अदोष वर्ग सहितैः पञ्चाशद्भिः ततः परम्।
पृथक वर्णैः ततः पश्चात् जपेत् सौभाग्य वृद्धये।।५७।।
साध्यनाम विलोमार्णं मन्त्राणाञ्चानुविध्य तत्।
त्रिसहस्त्रा जपेनैव जन्तुः कालपुरंव्रजेत्।।५८।।

यदि नरस्तस्य देवता वर्णा पूर्वकम्।
अनुविध्य विलोमेन संजपेदयुतं मनुः।।५९।।
देवताश्च प्रलीयन्ते पक्षिराजे महार्णवे।
तस्मात्सर्वप्रयत्नेन जपेदेवं वरान्ने।।६०।।
मन्त्रान्ते यो जपित्वा तु क्रिया साध्यं सपल्लवम्।
विविधेषु प्रयोगेषु प्रजपेत् सर्व सिद्धये।।६१।।
यन्त्र तन्त्रादना चापि योजयेन्मन्त्र वित्तमः।
सर्वसिद्धिर्जपादेव सहस्त्रैकं व्रजेत् शिवे।।६२।।
श्री देव्युवाच। ननु चात्र कथं शंभो,
नैव स्यात् यन्त्र तन्त्रकम्।
यदि स्यात् यन्त्र तन्त्राभ्यां,
किं प्रयोजनमादि भो।।६३।।

**श्री शिव उवाच-**

श्रृणु साधु शिवे वच्मि पुरश्चर्या क्रियाविधिम्।
यन्त्रातन्त्राक्रियापूर्वं यदि कुर्याल्लभेत्तादा।।६४।।
चिरात्काल जपैः क्रूरैः यः करोत्यङ्गभे गणैः।
सिद्धिं सर्वामवाप्नोति यन्त्र तन्त्र विवर्जनात्।।६५।।
पुरश्चर्याद्वयेनैव स्मरणात्सिद्धिमेतिसः।
यन्त्र तन्त्रं विनादेविन फलं जायते जगत्।।६६।।
श्रद्धया मनुजो मन्त्री पुरश्चर्याद्वयं चरेत्।
स्मरणात्तेन सिद्धिः स्यान्नानाकर्मक्रियादिषु।।६७।।

सर्वेषां मन्त्र राजानां यदसाध्यं युगे युगे।
ततश्च स्मरणादेव सिद्धिर्भवति तत्वतः।।६८।।

**।।इति मातृकाणां देवता वर्णनम्।।**

ओंकारं तस्य बाह्ये तदनु परिवृतं साध्यमाकर्षयेत्तां,
त्रैलोक्यस्थामदृष्टां स्त्रियमपिविबुधान् पातु भूतानि चैतम्।।१।।
त्रिदशमथ शुकाभंश्याम मालावतंसं,
मुसल हल रथाङ्गं मुष्टिकाभीति हस्तम्।
गृहगण रिपुसैन्यस्तम्भ विद्वेष सिद्ध्यै,
प्रतिदिन मतिमन्त्री भावयेत् शालु–वेशम्।।२।।
मध्ये वृत्तं समुभिः बहिरथ पृथिवी कोणके शक्ति बीजम्।
तद्बाह्ये कोण षट्के शरभमनुमथो बाह्यकेभूमिकोणे।।
भूमिं शक्तिं च बाह्यं प्रणवमथ बहिः साध्यकं स्तम्भनाख्यम्
शत्रूणामाशु दृष्टिं श्रुतिमहनयत् प्राणिनां यन्त्र मेतत्।।३।।
षटकारं वृत्तमध्ये तदुपरि कमले लातकं शक्ति युक्तम्,
तद्बाह्ये राशिकोणे त्वजबृषभ मुखात् आलिखेत कोण शून्ये।
आलेख्ये साध्यमेतत् सकलमपितस्तारमायाभिवीतम्,
विद्वेषं यन्त्र मेतत् त्रिभुवनमपि किं स्वल्पकानां नराणाम्।।४।।
ज्वलदनलमुखाभं सूर्य चन्द्राग्नि नेत्रं,
स्वकरकलित शूलं खड्ग खेटं वहन्तम्।
सकलरिपु जनानां कण्ठ – तश्चाविभिन्नं
स्मरत शरभमेवं मारणोच्चाटनाय।।५।।

वायुं (यु) संवृत्तमध्ये तदनु भृगुगृहे पावकं तस्य बाह्ये।
षटकोणे शालुवेशं त्रिशिख पथबहिः–स्तस्य रेखाग्रसाध्यम्।
तद्बाह्ये शक्तियुक्तं विजय जययुतं दीप कालीतियन्त्रम्,
शत्रूणां भूतनाथ ग्रहगण समरोच्चाटनं यन्त्रमेतत्।।६।।
बीजं स्वाहा त्रिकोणे ऋतुग्रह विवरे वायु बीजं स साध्यम्।
तद्बाह्ये नाग कोणे शिखि सहितमथो साध्यनामाष्टपत्रे।
बंकारं साध्यपूर्व क्षिति भवनमहीं साध्य युक्तं दशारे,
व्योमाख्यं साध्ययुक्तं शरभ मनुबृतं शत्रुसंहार यन्त्रम्।।७।।
शालुवेशाय विद्महे पक्षिराजाय धीमहि तन्नो रूद्रःप्रचोदयात्।
एतदस्त्रं महामन्त्रं जपेन्मन्त्री सदाम्बिके,
तस्य सर्व भयं नास्ति स्वप्नेऽपि ह कदाचन।।८।।
शरभास्त्रमिदं प्रोक्तममोघं जयवर्द्धनम्।
तत्प्रसादं दृशादृष्टुं न सहन्ते सुरासुराः।।६।।
कुतो नर पिशाचाश्च क्षुद्रभूत॑भिचारकाः।
ग्रहग्रामवृत्ता क्लिष्टा खेचरा पृथिवी चराः ।।१०।।
तस्मादेवं प्रयत्नेन अष्टोत्तर शतंपुरा।
मन्त्रपूतं समाकुर्यात् कालेनापि न दृश्यते।।११।।
बुद्धिमान् शरभं घोरं मन्त्रराजं महामनुम्।
न्यासाभावे जपं कुर्यादन्वहं पाप मुक्तये।।१२।।
ऊर्ध्वगंच तिर्यग्गंच वेध रेखां लिखेत्क्रमात्।।
अस्त्रविशेष–मन्त्रम।। बाह्येषुशूलान्चि–लिखेत् ससाध्यं
त्रैलौक्य संहारमिदं त्वमोघम्।।१३।।

विष वृक्षे समालिख्य प्राणानाबाह्य पूज्य तत्।
अष्टोत्तराख्यसाहस्त्रं जपेदेकाग्रमानसः।।१४।।
बलिंपूर्वक्षपा मध्ये दक्षिणास्यो भवेन्निशि।
तस्मात्ततो जपेन्मन्त्र–मष्टोत्तर सहस्त्रकम्।।१५।।
रिपवो मरणं यान्ति संशयोनास्ति सुन्दरि।
भानु मण्डल मध्ये च वैरिणं दर्शके हरिम्।।१६।।
राहुसंग्रहणादेव कृष्णवर्णमधोमुखम्।
पुटपाकतनुं क्लान्तं निष्प्राणं विषमक्रमम्।।१७।।
चिरंध्यावा जपेन्मन्त्रमष्टोत्तर सहस्त्रकम्।
जपान्तेऽस्य त्रिधा कुर्यात् सूर्य मालोकयन् सुधीः।।१८।।
भूयो जपेत् सहस्त्रंतु स्मृत्वा भस्म कृतंरिपुम्।।१६।।
स रिपुस्तत्क्षणादेव मरणं यात्यहेतुकम्।।२०।।
द्विषन्त मुद्दिश्य सहस्त्रवारं,
जप्त्वाघृतं तेन हुते हुताशे।
दिनावसानात्पुरतो रिपूणां,
शरीर नाशाय सुसिद्ध मन्त्रम्।।२१।।
बिन्दु वह्नि रसकोणमयं वृत्त द्वन्दकं सचतुर्दशयन्त्रम्।
भूपुरञ्च विलिखेद थमंत्री मध्यमा वहितामस तीरमूलम्।।२२।।

इत्याकाश भैरव कल्पे उमा महेश्वर संवादे प्रत्यक्ष सिद्धिप्रदे शरभ यन्त्रा–मन्त्रा कथनं नाम षट् चत्वारिंशोऽध्यायः।।

ॐ रात्रि शेषे समुत्थाय गुरुं ध्यायेच्छिरोम्बुजे।

वरदाभयदं शम्भुं पक्षिराज स्वरूपकम्। एवं ध्यात्वा पक्षिराजं गायत्र्यष्टोत्तरं जपेत्। पक्षिराजाय विद्महे शरभेश्वराय धीमहि तन्नोरुद्रः प्रचोदयात्। तत्रासनमास्तीर्य ॐ ह्रीं आधार शक्ति कमलासनाय नमः इत्यासनं सम्पूज्य उपविश्य भूत शुद्धि प्राण प्रतिष्ठा मातृकान्यासांतां नित्य क्रियां विधाय गुं गुरुभ्यो नमः वाम कर्णे, गं गणपतये नमः दक्षे क्षं क्षेत्र पालाय नमः पृष्ठे श्री शरभेश्वराय नमः सर्वाङ्गे। ॐ अस्य शरभेश्वर महामन्त्रस्य कालाग्नि रुद्र ऋषये नमः शिरसि, जगती छन्द–से नमः मुखे भगवत्यै शरभ देवतायै नमः हृदि, रवं बीजाय नमः गुह्ये स्वाहा शक्तये नमः पादयोः, फट् कीलकाय नमः सर्वाङ्गे, स्वेच्छा प्रयोग सिद्ध्यर्थे जपे विनियोगः। ॐ खे खां अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः, ओम् खं फट् इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः। ॐ प्राणग्रहासि प्राणग्रहासि फट् उं टं ङं ठं ढं णं ऊं मध्यमाभ्यां नमः, ॐ सर्व शत्रु संहारणाय एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः, ॐ शरभ शालुवाय ॐ पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः ॐ पक्षिराजाय हूँ फट् स्वाहा अं यं रं लं वं शं षं सं हं लं क्षं अः करतल कर पृष्ठाभ्यां नमः एवं हृदयन्यासः भूर्भुवः स्वरोमिति दिग्बन्धः। अथ ध्यानम्–चन्द्रार्कौ इति

अन्यच्च–

मृगस्त्वर्द्ध शरीरेण पक्षाभ्यां चञ्चुनाद्विजः। अधोवक्त्रः चतुष्पाच्च उर्ध्ववक्त्रश्चतुर्भुजः। कालाग्नि दहनोपेतो नील जीमूत संनिभः। अरिस्तद्दर्शनादेव विनष्ट बलविक्रम इति ध्यात्वा पञ्च पूजां कुर्यात् फट् कारोपद रूपाय पक्ष विक्षिप्त भूभृते। अष्ट पादाय रुद्राय नमः शरभ मूर्तये।। अथ जप विधिः अविघ्नं कुरु मालेत्वं जप काले सदा मम,। सिद्धिं मे देहि सततं देवता प्रीतिकारकम्।। ॐ ह्रीं सिद्धयै नमः सिद्धिं कुरु कुरु इति मालां सम्पूज्य तार शब्देन सहित अष्टोत्तर शतं जपेत्। माला मन्त्रं प्रवक्ष्यामि रहस्यं श्रृणु शोभने। मन्त्र स्मरण मात्रेण करस्था सर्व सिद्धयः।। ॐ नमः पक्षिराजायेति माला मन्त्रं जपेत्। त्वं माले सर्व देवानां प्रीतिदा शुभदा मम। शुभं कुरुष्व मे भद्रे यशोवीर्यञ्च मे सदा।। इति माला स्थापनम् उत्तरं न्यासान्ते–गुह्याति गुह्ययेति मन्त्रेण जप फलं देव दक्षिण करे समर्पयेदिति जप विधिः।

**देव्युवाच-**

देव देव महादेव गिरीश जगतः पते। त्राहि मां जगतां नाथ सच्चिदानन्द विग्रह। मन्त्राणामपि य–स्सारं सर्व लोकोपकारकम्।। रक्षणं सर्व जन्तूनां ब्रूहिमे तद्विभो मम।

**शिव उवाच-**

त्राहि मां जगतां नाथ सच्चिदानन्दविग्रह। मन्त्राणामपि य स्सारं सर्व लोकोपकारकम्।। रक्षणं सर्व जन्तुनां ब्रू हि मेतद्विभो मम। रहस्यंश्रृणु देवेशि सर्व रक्षा करं नृणाम्। यस्य स्मरण मात्रेण वैरिणां कुल नाशनम्। शरभेश्वर मन्त्रस्य कालाग्नि रूद्र ऋषिः जगतीछन्दः देवो भगवान् शरभेश्वरः।। खंकारं बीज मित्युक्तं स्वाहा शक्तिस्ततः परम्। फट्कारं कीलकं प्रोक्तं नीरजायत लोचने।। स्वेच्छाप्रयोग सिद्धयर्थेविनियोग स्तथाम्बिके। मन्त्राक्षरैः करंन्यासं मातृका सहितं शिवे।। अङ्ग न्यासं ततः कृत्वा ध्यात्वा वै शरभेश्वरम्। तारं प्रथम मुद् धृत्य खे खां खं फट् तथैव च।। प्राणग्रहासि द्वितयं हुं फट् च तदनन्तरम्। सर्वेति पदमाभाष्य शत्रुसंहारणाय च।। शरभ शालुवायेति पक्षिराजायतद्वदेत् हुं फट् स्वाहेति मन्त्रोऽयं द्विचत्वारिंशदक्षरम्।। जपेद्वर्णं सहस्त्राणि समाहितेन साधकः। दशांशं तर्पणं होमं तद्दशांशं जितेन्द्रियः।। अभ्यङ्ग स्नान शुद्धान्तः करणाद्भोजयेत् द्विजान्।।

**।।इति जप विधिः।।**

**अथ यन्त्रक्रमः।**

भस्म मध्ये लिखेद्विद्वान् शरभेश्वर यन्त्रकम्।
रक्त पुष्पैश्च गन्धाद्यैः पूजां कुर्यात् विचक्षणः।।

सप्तरात्रं जपेन्मन्त्रं सहस्त्राद्वय मानवः।
तद्भस्म चैकी कृत्वा तु धारये द्यस्तु मानवः।।
संग्रामे शत्रवो दृष्ट्वा पलायन्ते च तत्क्षणात्।
स्वर्ग भूतल पालात वासिनोऽमर्त्य मर्त्यकाः।।
शालुवस्मरणादेव मरणंयात्यहेतुकम्।
शालुवस्य प्रयोगेन त्रिमूर्तिर्नैव रक्षति।।
षट्सप्त कोष्टेषु विलिख्य शारभं,
रेखाग्र शूलेषु तदग्र साधकम्।
बाह्येषु मायावृततारहेतुकं,
समाधितं चक्रवरं जयाभिधम्।।
पूर्वादितो पजेद्विद्वानिद्राद्रीन्परमेश्वरि।
यन्त्र स्योभय पार्श्वे तु व्याधि मृत्यू यजेत्ततः।।
भैरवं वाडवाग्निं च पुरतः परिपूजयेत्।
भद्रकाली तथा दुर्गा सिद्धि स्थाने यजेत्प्रिये।।
तत्कोष्ठेषु च देवेशि मन्त्रवर्णान् समर्चयेत्।
मध्यकोष्ठे जपेत् शालुं भावकं शरभेश्वरम्।।
आवाहनादि पूजान्तं मूलमन्त्रोण पूजयेत्।
धूपदीपै र्महादीपैः कुलदीपै र्विशेषतः।।
क्रमेणैव वरारोहे शरभं परिपूजयेत्।
इत्येतत्कथितं देवि गुह्याद् गुह्यतरं महत्।।
राज्यं देयं शिरो देयं न देयं यस्य कस्यचित्।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः।।

इति पूजायन्त्रम्। अथान्यत्तु प्रकारेण पूजा यन्त्रं मयोच्यते। दिव्यगन्धे प्रशस्ते भस्मानित्रिकोणाष्ट-दलद्वादशदलषोडश दल भूपुर द्वन्दात्मकं अरत्निचक्रमुद् धृत्य पुष्पाञ्जलित्रयं दत्वा वक्ष्यमाणरीत्या छागबलिं दत्वा स्ववामभागे सामान्यार्ध्य स्थापनं कुर्यात्। चन्दनादिना चतरस्त्रं विलिख्य हस्ता भ्यां मत्स्य मुद्रया त्रिकोणवृत्त चतरस्त्रं मण्डलं कृत्वा ॐ आधार शक्तये नमः इति सम्पूज्य मूलमुच्चरन् श्री शरभेश्वर पूजायाः सामान्यार्ध्याधारं स्थापयामि इति संस्थाप्य तन्मध्ये नमः इति जलेनापूर्य गंगे चेति मन्त्रेण तीर्थान्या नावाह्य ॐ इति गंगादिभिः सम्पूज्य मूलेनाष्टवारं अभिमन्त्रय धेनु मुद्रां प्रदर्शयेदिति सामान्यार्ध्यस्थापनम्। अथ मन्त्रविशोधनम्। यथा यन्त्रात्मनो मध्ये चन्दनमुत्क्षिप्य चतरस्त्रभूमौ मस्यमुद्रयाचतरस्त्रवृत्त षट्कोणं विधाय वामावर्तेन दक्षिणाग्रेषु सम्पूज्य षट्कोणेषु षडङ्गैः सम्पूज्य पञ्चरत्नेन चतरस्त्रकोणेषु सम्पूजय ग्लूं गगन रत्नाय नमः स्लूं स्वर्गरत्नाय नमः म्लूं मर्त्यरत्नाय नमः प्लूं पातालरत्नाय नमः न्लूं नागरत्नाय नमः इति चतुर्दिक्षु सम्पूज्य कं कामगिरि पीठाय नमः पं पूर्ण गिरि पीठाय नमः जं जालन्धर पीठाय नमः उं उड्यान पीठाय नमः इति सम्पूज्य अस्त्रक्षालितमाधारं गृहीत्वा श्री शरभेश्वर विशेषार्ध्याधारं स्थापयामीति संस्थापयेत्।

तत्रं रं अग्नि मण्डलाय धर्मप्रदाय दशकलात्मने श्रीशरभेश्वर विशेषार्ध्याधाराय नमः इति सम्पूजयेत्। हुं ब्रह्माण्ड चर्वकाय स्वाहेति पात्रं प्रक्षाल्य नमः धूपयित्वा मूलमुच्चरन् श्री शरभेश्वर विशेषार्ध्य पात्रं स्थापयेत्। ॐ ऐं ह्रीं श्रीं यं धूमार्चि कलायै नमः रं ऊष्म कलायैं नमः। लं ज्वलिनी कलायै नमः वं ज्वालिनी कलायै नमः शं विस्फु लिङ्गिनी कलायै नमः षं सुश्री कलायै नमः सं सुरूपा कलायै नमः हं कपिला कलायै नमः। क्षं कव्य स्वाहा कलायै नमः। ऐं अग्निं दूतं वृणीमहे होतारं विश्व वेदसं अस्य यज्ञस्य सुक्रतुम्।। रां रीं रूं रैं रौं रः रमलवरयुं इत्याधारे अग्निं कलाभिः सम्पूज्य पात्रं संस्थाप्य। अं सूर्य मण्डलाय द्वादश कलात्मने शरभेश्वर विशेषार्ध्य पात्राय नमः इति अभ्यर्च्य ॐ ऐं ह्रीं श्रीं कं भं तपिनी कलायै नमः। खं बं तापिनी कलायै नमः। गं फं धूम्राकलायै नमः। घं पं मरीचि कलायै नमः। ङ. नं ज्वलिनी कलायै नमः। चं धं रुचि कलायै नमः। छं दं सुषुम्ना कलायै नमः। जं थं भोगदा कलायै नमः झं तं विश्वा कलायै नमः। ञं णं बोधिनी कलायै नमः। टं ढं धारिणी कलायै नमः। ठं डं क्षमा कलायै नमः। क्लीं आकृष्णेन रजसा वर्तमानो निवेशय न्नमृतंम्र्त्यञ्च। हिरण्ययेन सविता रथेन देवो याति

भुवनानि पश्यन् ह्रां ह्रीं ह्रूं ह्रैं ह्रौ ह्रः ह म ल व र यूं सूर्य कलाभिः सम्पूज्य श्री शरभेश्वर विशेषार्घ्याय नमः मूलेन हव्यमार्श्य सं सोममण्डलाय कामप्रद षोडश कलात्मने श्री शरभेश्वर हेतुपात्रामृताय नमः इत्यभ्यर्च्य ॐ ऐं ह्री श्रीं अं अमृता कलायै नमः।

४ आं मानदा कलायै नमः।
४ इं पूषा " "
४ ईं तुष्टि " "
४ उं पुष्टि " "
४ ऊं रति " "
४ ऋं धृति " "
४ ॠं शशिनी " "
४ लृं चन्द्रिका " "
४ ॡं कान्ति " "
४ एं जयोत्स्ना " "
४ ऐं श्री " "
४ ओं प्रीति " "
४ औं अंगदा " "
४ अं पूर्णा " "
४ अः पूर्णा मृता " "

४ आप्यायस्व समेतु ते विश्वतः सोम ब्रह्मभवा वाजस्य संगथे।

सां सीं सूं सैं सूँ सः समलवरयूं इति षोडश कलाभिः सम्पूज्य हेतुमभ्यर्च्य योनि मुद्रां प्रदर्श्य पूजायाः द्रव्य पञ्च शोधनं कुर्यात्। अथ द्रव्य पञ्चक शोधनानन्तरं चक्रोद्धारं कृत्वा पीठ पूजां कुर्यात् चक्रोद्धारः। षोडशारं ततः पश्चात् ततो भूपुर युग्मकम्। त्रिकोण मध्ये देवेशं शरभं शारभेश्वरम्।। चिरंध्यात्वा ततो मन्त्री गुरु पाद युगं स्मरेत्। आवाह्नादि षोडशोपचार पूजां कृत्वा चन्द्रं सूर्य च वह्निं च त्रिकोणे विलिखेत्। क्रमात् भैरवं वडवाग्निं च दुर्गां कालीं च पृथक् पृथक् त्रिकोणे वृत्तमध्ये चतुर्दिक्षु लिखेत्। क्रमात् इन्द्रमग्नि यमं चैव निर्ऋतिं वरुणं तथा वायुं सोमं तथेशानं दलेष्वष्टासु विन्यसेत्। पार्श्वद्वये यजेद्देवि व्याधि मृत्यू ततः परम्। मदनां रक्त चामुण्डां मोहनीं द्राविणीं तथा।। शब्दाकर्षणिकां वाणीं रमां मायां पुलिन्दिनीम्। शास्तारं क्षोभिणीं ज्येष्ठां द्वादशारे यथा क्रमम्।। षोडशारे ततः पश्चात् षोडशश्वर देवताः। गणेश्वरं यमं स्कन्दं भैरवञ्च महादिशाम्।। त्वरितां वीरभद्रञ्च वडवानलभैरवम्। महामायां यजेद्देवीं वायव्यादि विदिक्ष्वपि।। आरभ्य चाग्रतो मन्त्री ब्राह्म याद्याश्चाष्टमातृकाः।

परितस्तु यजेत् सर्वान् ककाराद्वर्णं देवताः।।
अणिमाद्यष्ट सिद्धींश्च, प्रादक्षिण्येन वै लिखेत्।
इति यन्त्रम्।।

त्रिकोण मध्ये बीजं देवेश मूल मन्त्रं सूर्यं चन्द्रं वह्निं ध्रां ध्रीं ऐं वृत्त मध्ये भैरवं वडवाग्नि च दुर्गां कालीं मं मुं दं क्षं पार्श्वयोः व्याधिं मृत्युं ह्रां ह्रैं अष्ट दलेषु ऐं रं लं भ्यां० क्षं धं यं सं क्रीं द्वादशाक्षरे० क्लीं फ्रीं हूं. सं० श्रीं ड़ं लूं यूं क्ष्म्यां क्ष्मूं मं षोडशारे अकारादि स्वराः अधिदेवता बीजाः ओं श्रौं ह्रौं ध्रां ध्रैं ज्मां षं० चं यूं त्रें ॐ ऐं ओं ह्यों० डं हौं पूर्वादि गं० घं० स्कं० मं० वायव्यादि० त्रैं ध्रां० बं ई० इति देव बीजस्थापनं कृत्वा प्राण प्रतिष्ठामाचरणं च कुर्यात् तद्यथा अथ पीठ पूजा चक्रं प्रोक्षणी पात्रं जलेन सम्प्रोक्ष्य पीठ पूजां कुर्यात् मंमण्डूकाय० कं कालाग्नि रुद्राय० अं आधार शक्त्यै० कूं कूर्माय० धं धरायै० सूं सुधासिंन्धवे० श्वे श्वेत द्वीपाय० सुं सुर वृक्षेभ्यो० मं मणिमय हर्म्याय० यं यमपीठाय० ज्ञां ज्ञानाय० वै वैराग्याय ऐ ऐश्वर्याय० अं अधर्माय० अः वैराग्याय अं नैश्वर्याय० मध्ये अं अनन्ताय० तं तत्वमयाम्नाय० आं आनन्द कन्दाय० सं सविन्नालाय० विं विकारमयकेशरेभ्यो० पं प्रकृतिमय पत्रेभ्यो० पं पञ्चाशद्वर्णं कर्णिकायै० सं सूर्य कलायै० इं इन्द्र मण्डलाय० पं पावक मण्डलाय० सं सत्वाय० रं रजसे० तं तमसे० अं आत्मने०

अं अन्तरात्मने० पं परमात्मने० बं वामा शक्त्यै जें ज्येष्ठा शक्त्यै कां कान्ति शक्त्यै० कां कला शक्त्यै० कं कलविकरिण्यै वं बलविकरिण्यै० बं बल प्रमथिन्यै० सं सर्व दमिन्यै० मं मनो मथिन्यै शक्त्यै इति पीठं सम्पूज्य तन्मध्ये ओम् नमो भगवते सकलगुणात्मक शक्तियुक्ता–यानन्ताय योग पीठात्मने नमः। इत्यासनं सम्पूज्य तत्र मूलेन मूर्तिं सम्पूज्य आवाहयेत्। प्राणायाम ऋष्यादि कर षडङ्ग न्यास ध्यानादिंक कृत्वा पुष्पाञ्जलिमानीय हृदय कमल मध्यस्थं साङ्गं सपरिवारं सायुधं सवाहनं सशूलिनं दुर्गासहितं श्री शरभेश्वरं आवाहयामीति यन्त्र मध्ये पुष्पांञ्जलि निक्षिप्य आवाहनादि मुद्रां प्रदर्श्य मूलमुच्चरन् चतुर्थ्यन्तेन आवाहयामि आवाहितो भव सन्निहितो भव सन्निरुद्धो भव अवगुण्ठितो भव सकली कृतो भव इत्यावाहयेदिति पीठ पूजा। अथ प्राणप्रतिष्ठां कुर्यात् यन्त्रे तद्यथा+लेलिहान मुद्रया हृदि हस्तं दत्वा त्रिःसम्पूज्य सन्तर्प्यं मूलमन्त्रेण उपचारान् कृत्वा तत्र पाद्यार्घ्याचमनीय मधुपर्कार्घ्यं सामान्यार्घ्यं निवेदयेत्।

पात्रं स्थापयित्वा मूलान्ते पूर्ववत् इदं पाद्यं पादयोः, पुनर्मूलान्ते इदमर्घ्यं हस्तयोः इदमाचमनीयं मुखे, इदं स्नानं सर्वाङ्गे, इदं वस्त्रं इदमुपनीतम्, इदं भूषणं, इदं गन्धं, इमे अक्षताः, इमानि पुष्पाणि, इदं धूपं, इदं दीपं इदं, नैवेद्यं, इदं ताम्बूलम् इमां दक्षिणां, इदं फलं समर्पयामि नमः। इति

षोडशोपचारैः सम्पूज्य पुष्पाञ्जलित्रयं दत्वा आवरण पूजां कुर्यात् सा यथा  मध्ये मूलेन त्रिः सम्पूज्य पुनर्मूलमुच्चार्य एताः हृदयादि षडङ्गदेवताः साङ्गाः सपरिवाराः सवाहनाः सायुधाः सन्तर्पिताः सन्तु नमः इति पुष्पाञ्जलिं दत्वा अभीष्ट सिद्धिं मे देहि शरणागत वत्सलाः भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्। इति सामान्यार्घ्योदकेन दक्ष हस्ते जलं समर्प्य मां शान्तिदाः सुखदाः सन्तु इति पुष्पाञ्जलिं समर्प्य प्रणमेत्। इति प्रथमावरणम् ततः त्रिकोण वाम दक्षोर्ध्व कोणेषु ॐ श्रां चन्द्रं पूजयामि नमः त्रिकोणान्ते चतुर्दिक्षु भं भैरवं पू० पुरतः पश्चिम भागे भ्रूं वडवाग्नि पू० दक्षिण भागे ॐ क्षं कालीं पू० वाम भागे उं हुं शालिनी दुर्गां पूजयामि हैं मृत्युं पू० शेषं पूर्ववत् इति द्वितीया–वरणम्। अष्ट दलेषु ॐ लं इन्द्रं सवज्रं पूजयामि। ॐ रं अग्नि स शक्ति पूजयामि। ॐ यं यमं सदण्डं पू०। ॐ क्षं निर्ऋतिंसखड्गं पू०। ॐ वं वरुणं सपाशं पू०। ॐ यं वायुं सांकुशं पू०। ॐ सं सोमं सगदं पू०। ॐ हीं ईशानं सत्रिशूलं पू०। इति सम्पूज्य मूलेन त्रिः सम्पूज्य पुनर्मूलमुच्चार्य शेषं पूर्ववत् अभीष्ट सिद्धिमित्यादि तृतीयावरणम्। ऐ ह्रीं श्रीं द्वादश रेफाग्रादि प्रादक्षिण्येन मदनाद्याः पूजयेत्। ॐ मदनां सावरणं पू० ॐ ह्रीं रक्त चामुण्यां सायुधां पू० ॐ हुं मोहिनीं सायुधां पू०। ॐ द्रां द्राविणीं साङ्गां सपरिवारां सायुधां सवाहनां स शिवां पू०।

ॐ हैं शब्दाकर्षिणीं पू०। ॐ संवाणीं पू०। ॐ श्रीं रमां पू०। ॐ क्षूं मायां पू०। ॐ शत्रु पुलन्दिनीं पू०। ॐ क्ष्म्रां शास्तां पू०। ॐ क्ष्म्रूं क्षोभिणीं पू०। ॐ में ज्येष्ठां पू०। इति सम्पूज्य मूलेन त्रिः सम्पूज्य पुनर्मूलमुच्चार्य एताः मदनाद्या इति पूर्ववत् अभीष्ट सिद्धिमित्यादि इति चतुर्थावरणम्।। षोडशार दले स्वाग्रादि प्रादक्षिण्येन यजेत्। ॐ आं ओं ब्रह्माणं साङ्गं सपरिवारं सायुधं सवाहनं सशक्तिकं पूजयामि नमः इति सर्वत्र पूजयेत्। ॐ आं सौं परां पूजयामि। ॐ ह्रूं श्रौं विष्णुं पूजयामि। ॐ ईं ह्रीं मायां पूजयामि। ॐ हुं ध्रां वराहं पू०। ॐ उं द्रैं पृथ्वी पू०। ॐ रुं ज्यां विधिं पू०। ॐ रुं षं शिवं पू.। ॐ लं नासत्यौ पू०। ॐ लूं वैं ट्रं स्त्रं पू०। ॐ ऐं ऐं वीरभद्रं पू०। ॐ ऐं ओं भारतीं पू०। ॐ औं कं शुकं पूजयामि। ॐ औं ह्यौं शकरं पू०। ॐ अं ड़ं रुद्रं पू०। ॐ अः हीं कालरुद्रं पू० इति सम्पूज्य पुनर्मूलमुच्चार्य अभीष्ट सिद्धिमित्यादि एताः पूजिताः वरदाः भवन्तु इत्यादिना पुष्पाञ्जलिं निक्षिप्य प्रणमेदिति पञ्चमावरणम्। प्रथम भूपुरे पुर्वादि ॐ गं गणपतिं साङ्गं पू०। ॐ यं यमं पू०। ॐ स्कं स्कन्दं पू०। ॐ भं भैरवं पू०। विदिक्षु वायव्यादि ॐ मैं त्वरितां पू०। ॐ बं बडवानल भैरवं पू०। ॐ इं महामायां पू०। बाह्य भूपुरे स्वाग्रादि प्रादक्षिण्येन ब्राह्माद्याः पूजयेत्। ॐ आं ब्राह्मीं पू०। ॐ ईं माहेश्वरी पू०। ॐ उं कौमारीं पू०। ॐ ॠं वैष्णवीं

पू०। ॐ लूं वाराहीं पू०। ॐ ऐं माहेन्द्रीं पू०। ॐ औं चामुण्डां पू०। ॐ अः महालक्ष्मीं पू०। इति सम्पूज्य मूलमुच्चार्य अभीष्टेति षष्ठावरणम्। ततः परितः वृत्त क्रमेण ब्रह्माद्याः पूजयेत्। ॐ कं ब्रह्माणं पूजयामि। ॐ खं जान्हवीं पू०। ॐ गं गणेशं पू०। ॐ घं भैरवं पू। ॐ ङं कालीं पू०। ॐ चं भद्रकालीं पू०। ॐ छं जातवेदसं पू० ॐ जं अर्द्ध नारीश्वरं पू०। ॐ झं परमात्मानं पू०। ॐ ञं पृथ्वीं पू०। ॐ टं चं डं पू०। ॐ ठं शुक्रं पू०। ॐ डं विष्णुं पू० ॐ ढं बलभद्रं पू०। ॐ णं धनदं पू० ॐ तं परा शक्तिं पू०। ॐ थं दुर्गां पूजयामि। ॐ दं निर्विकल्पं पू०। ॐ धं नं नासत्यं पू०। ॐ पं फं दस्त्रं पू०। ॐ मं ईश्वरं पू०। ॐ मं मदनं पू० ॐ यं वायुं पू०। ॐ रं कृशानुं पू० ॐ रं शुक्रं पू०। ॐ वं वरुण पू०। ॐ शं शङ्करं पू०। ॐ षं द्वादशादित्यां पू०। ॐ सं भारती पू०। ॐ हं सदाशिवं पू०। ॐ लं इन्द्रं पू०। ॐ क्षं सिंह पू०। इति सम्पूज्य मूलेन निः सम्पूज्य पुनर्मूलमुच्चार्य एता ब्रह्माद्या अभीष्टेति च सप्तमावरणम्। इत्थमावरण पूजनं कृत्वा पाद्यार्ध्याचमनीयं दद्यात्। स्व गृह्योक्त विधिना विधाय तत्रेशानाग्नेय निर्ऋति वायव्यादि कोणेषु सामान्यार्घ्येण मण्डल चतुष्टयं कृत्वा ॐ व्यापक मण्डलायनमः इति मण्डल चतुष्टयं सम्पूज्य ॐ ऐं ह्रीं श्रीं ॐ एह्येहि देवी पुत्र बटुकनाथ कपिलजटा भार भास्वर त्रिनेत्र ज्वालामुख सर्व विघ्नान्नाशय नाशय

सर्वोपचार वलिं गृह्ण स्वाहा। इति वामांगुष्ठानामिकाभ्यां धृत्वा द्वितीय खड्ग धारया बलिं हरेत्। बलि दानेन सन्तुष्टो बटुकः सर्व सिद्धिदः। शान्ति करोतु मे नित्यं भूत वेताल सेवितः।। इति पुष्पाञ्जलिं दद्यात् इति बटुक बलिः। आग्नेय मण्डले यां योगिनीभ्यो नमः। भो सर्व योगिन्याः इहागच्छन्तु इत्यावाह्य गन्धादिभिः सम्पूज्य योगिनी बलिद्रव्याय नमः इति बलिद्रव्यं पूजयेत्। ऊर्ध्वं ब्रह्माण्डतोवा दिविगगनतले भूतले वा तले वा पाताले वा स्थले वा सलिल पवन् योर्यत्र कुत्रस्थिता वा। क्षेत्रे पीठोपपीठादिषु च कृतपदा धूप दीपादिकेन प्रीता देव्यः सदा नः शुभ बलि विधिना पान्तु वीरेन्द्र वन्द्याः।। यां योगिनीभ्यो नमः स्वाहा सर्व योगिनीभ्यः फट् इति वामांगुष्ठानामिकाभिः बलिं हरेत्। या काचिद् योगिनी रौद्राः सौम्या घोर परात्पराः खेचरी भूचरी व्योमचरी प्रीतास्तुसर्वदा इति पुष्पाञ्जलिंदत्वा प्रणमेत्। इति योगिनी बलिः। अथ नैऋत्यमण्डले क्षात्र पालाय नमः क्षेत्रपालमावाह्य। गन्धादिभिः सम्पूज्य क्षां क्षीं क्षूं क्षै क्षौ क्षः स्थान क्षेत्रपाल इहागत्य धूप दीपादि सहितं बलिं गृह्ण गृह्ण गृह्ण स्वाहा इति वामांगुष्ठ तर्जनीभ्यां बलिं हरेत् योऽस्मिन् क्षेत्र निवासी क्षेत्रपालः सकिंकरः प्रीतोऽयं बलिदानेन सर्व रक्षां करोतु मे। इति क्षेत्रपाल बलिः अथ वायव्य मण्डले गं गणपतये नमः गणपतिमावाह्य गन्धादिभिः सम्पूज्य गणपति बलिद्रव्याय

नमः इति बलि द्रव्यं पूजयेत्। गां गीं गूं गैं गौं गः गणपते वर वरद सर्वान् वशमानय बलिं गृह्ण गृह्ण स्वाहा। वामांगुष्ठ मध्यमाभ्यां बलिं हरेत्। सर्वदा सर्वकार्याणि निर्विघ्नं साधयेत् सदा। शातिं करोतु सततं विघ्नराजः सशक्तिकः। इति पुष्पाञ्जलिं दद्यात् इति गणपति बलिः। ततः स्व वाम भागे सर्वभूत बलिं दद्यात्। सुरगणाद्वा सर्वभूत गणा इहागच्छन्तु इत्यावाह्य गन्धादिभिः सम्पूज्य सर्वभूत बलि द्रव्याय नमः इति बलि द्रव्यं पूजयेत्। ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्व भूतेभ्यो हुँ इति वामांगुष्ठादि सर्वांगुलीभ्यः बलि हरेत्। भूता ये विविधाकारा दिवि भूम्यन्तरिक्षगाः। पातालस्थल संस्था च शिव योगेन भाविताः।। क्रू राद्या शत संख्यैका पाखण्डाद्याः व्यवस्थिताः। तृप्यन्तु प्रीतिमनसाः पूजां गृहणन्त्विमं बलिम्।। इति पुष्पाञ्जलिं दद्यात् इति भूत बलिः ॐ सर्वेभ्यो नमः इति सर्वमभ्यर्च्य नाराच मुद्रां बध्वा। बलिदानेन सन्तुष्टाः। क्षमध्वं बलिदेवताः। यथा सुखं चिरं रन्तुं यथेष्ट मुदिता वराः।। बटुकाद्या सुराः सर्वे सर्वे सिद्धि विधायिनः। शान्ति पुष्टिं प्रयच्छन्तु ते प्रसादात्तु सदाशिवः।। स्तुत्वा मुद्रां विसर्ज्य प्रोक्षणी जलेन आत्मानं प्रोक्षयेदिति बलिदान विधिः।।

ततः उत्तरापोषणं दत्वा नैवेद्यं विसृज्य करप्रक्षालनाचमनानि दत्वा नीराजनं कुर्यात् ततः स्वर्णादि पात्रे अष्टदलं विरच्य गोधूम पिष्ट रचितानि

नव दीपानि पात्रे संस्थाप्य मूलेन प्रज्वाल्य अष्ट दिक्षु ब्राह्माद्याः मध्ये मलेन सम्पूज्य अमृती कृत्य अवगुण्ठ्य चक्रेण संरक्ष्य मूलेनाष्टधाभिमन्त्र्य जानुभ्यामवनिं गत्वा नीराजयेत्।

समस्त देव देवेश परिवारगणावृत आरार्तिकमिदं देव गृहाण ममसिद्धये इति आरार्तिक मन्त्रेण परिवर्त्य भूमाकारेण परिभ्रामयेत् इत्यारार्तिक विधिः। ततः कवच स्तोत्र सहस्त्रनामादि पारायणं कुर्यात् अथ काम्य प्रकरणानि लिख्यन्ते ठकारं पूर्वमालिख्य तद्बाह्ये वर्तुलं लिखेत्।

तद्बाह्ये चतुरस्त्रं तु तद्बाह्येष्टदलं तथा।
तद्बाह्ये षोडशदलं तद्बाह्ये वृत्तमालिखेत्।।
तद्बाह्ये पञ्चकोणञ्च ठकारे साध्यनाम च। वर्तुले
मूलमालिख्य स्वरान् षोडश पार्वति।।
वृत्तेचाभिमंतं आर्द्धं वाणस्य पञ्च कोणके।
द्रां द्रीं क्लीं ब्लूं सः एक्मालिख्य यन्त्रं तु तालपत्रे प्रयत्नतः।।
स्नुही क्षीरं जले क्षिप्त्वा यन्त्रं तत्रैव निक्षिपेत्।
चुल्लोपरि चिरं स्थाप्य पाकेन सर्व शत्रवः।।
गृहं त्यक्त्वा पलायन्ते प्रसादात् शालुवेश्वरः।
साधके सर्व सिद्धिः स्यात् रिपुः देशान्तरं ब्रजेत्।।
शालुवं पक्षिराजानं योध्यायेल्लोक पूजितम्।
शत्रूणां सर्व संघाता नोत्पद्यन्ते कदाचन।।

चन्दनं च सकर्पूरं कस्तूरी कुंकुमान्वितः।
वामाबर्ते लिखेन्मन्त्रं शरभं चिन्तयन्नरः।।
ललाटे तिलकं कृत्वा त्रैलोक्यं मोहयेत्क्षणात्।
देवांश्चापि वशीकुर्यात् किं पुनर्मानवादयः।।
गोरोचनञ्च गोक्षीरं गोमयं गोघृतं तथा।
शन्यर्काङ्गारवारे तु मूलेनैव होमयेत्।।
देवासुर मनुष्याणां स्त्रीपुंसां वशकृद्भवेत्।
अजा माहिषकं चैव नवनीतं तथा नरः।।
हुतेन मूले पञ्चाहे साध्यनाम पुरः सरम्।
साध्य वश्यो भवेत्सत्यं क्षिप्रमेव न संशयः।।
अजा मानुष काकानां रुधिरं प्रेतवाससम्।
संवेष्ट्य पुत्तलीं कृत्वा साध्य नाम्नाक्तिगर्भिताम्।।
निखनेत्तत्र प्रेतस्य हृदये च शिरसिक्रमात्।
केशान् गृहीत्वा संवेष्ट्य पुत्तली प्राणपूर्वकम्।।
शवदाहस्खलेनैव निक्षिपेदाशुचालयेत्।
शालुवं पक्षिराजानं यो ध्यायेच्च दिनेदिने।।
जपेद्दशसहस्त्रं तु शतमष्टोत्तरं तु वा।
कृष्णाष्टमीं समारभ्य यावत्कृष्ण चतुर्दशी।।
मासान्तसमये प्राप्ते वैरिवंश क्षयोभवेत्।
कारस्करं तु भल्लातैस्तैलेनाष्ट शतं हुनेत्।।
मासान्ते शत्रवस्तस्य पलायन्ते न संशयः।
समोदमादौ पयसामष्टोत्तरशतं हुनेत्।।

दिनत्रयं महेशानि सर्व रोगैः प्रमुच्यते।
बिभीतक तयोप्यष्ट–प्रादेशं परिमाणकम्।।
यन्नाम्ना धारयेद्वेदं शतमष्टोत्तरं जपेत्।
मासान्ते मृत्युमाप्नोति यदि त्राता विधिः स्वयम्।।
अपामार्गस्य समिधौ पायसं सघृतं हुनेत्।
रात्रौ यन्नाशमासास्ते नश्यन्तीह पदातिनः।।
यन्त्रस्तुहि समिद्भिर्यो याम्यास्यः सर्षपैस्तिलैः।
महानिशार्द्धे साहस्त्रं जुहुयाद्दिवसेन हि।।
पञ्चाहे नामी प्रणश्यन्ति सगोत्रा शत्रवो भृशम्।
शालुवं पक्षिराजानं पूजयेत्साधकोत्तमः।।
साष्टविंशति संख्याकान् ब्राह्मणान् भोजयेत सुधी।
शुक्ल प्रतिपदारभ्य पूर्णिमान्तं च नित्यशः।।
यो जपेदष्ट साहस्त्रं मुच्यते सर्व पातकैः।
शरभं शालुवं ध्यात्वा एतां विधिवदाचरेत्।।
पुत्तलीं च विधायाथ कुलाल कर मृण्मयीम्।
वायुं सम्यग्विधानेन कृत्वास्थाप्यस माहितः।।
स्नुहि क्षीरे तु संक्षिप्य मृष्टस्तदयुतं जपेत्।
उन्मत्तमूले निखनेदपस्मारी भवेत्तदा।।
शालुवं शिव रूपं च ध्यात्वा सम्यक्समाहितः।
निम्ब चूर्णेन कृत्वा तु पुत्तलीं च यथाविधिम्।।
पुत्तल्यां वायुमारोग्य स्पृष्ट्वा तामयुतं जपेत्।
श्मशाने निखनेद्देवि पुत्तलीं शत्रु चालयेत्।।

उन्मत्त मूले पुत्तल्यां वामारोप्यस्तु साधकः।
स्पृष्ट्वातीवायुतं मन्त्री ध्यात्वा शत्रून्वितन्वतः।।
निक्षिपेच्छत्रु देशे तु शत्रूणां चालनं भवेत्।
शन्यर्काङ्गारवारे तु जपेदयुत संख्यया।।
त्रिदिनान्ते रिपुन्वध्वा चालयेदाशु साधकः।
दूर्वांकुरैर्घृतासिक्तैः गोमये च विशेषतः।।
तिलाँ लाजा सर्षपाश्च मिश्रीकृत्य हुनेत्तदा।
त्रिदिनान्ते शत्रु संघाः पलायन्ते न संशयः।
पिष्टेन पुंत्तली कृत्वा मूलेनैव तु पूजयेत्।।
मांसयुक्तं तु नैवेद्यं ताम्बूलन्तु निवेदयेत्।
लाक्षारसेन संलिप्य विम्बस्य च शिरोगले।।
साध्य नाम च संयुक्तां लिखित्वा पञ्च पुत्तलीम्।
सदा पचेत् ततो वह्नौ समिद्भिः पिचुमन्दकैः।।
गणिकायाङ्गणे होमं कृत्वा चैव विधानतः।
जपादयुतमात्रेण पलायन्ते न संशयः।।
अर्क मूलं समादाय पुत्तलीं च यथाविधिम्।
तस्य प्राणस्य पवनं विदधीत यथोदितम्।।
तस्याश्च हृदिदेशे तु माया बीजं समालिखेत्।
तस्या शिरसिमालिख्य वह्नि बीजं सविन्दुकम्।।
पादयोश्च तथालिख्य पृथ्वी बीजं सभैरवम्।
उभयोस्कन्धयोश्चैव वाग्बीजं चैव वाग्भवम्।।
भार्गवं वदने पृष्ठे श्री बीजं भुवनेश्वरीम्।

पूजां च विधिवत्कृत्वा नैवेद्यं च निवेदयेत्।।
निखनेदर्क मूले च पलायन्ते च शत्रवः।
ततः शत्रुशरीरञ्च स्फोटयेत् पक्षि शालुवः।।
सप्ताहाच्च यम स्थाने नीयन्ते सर्व शत्रवः।
केवलं जपमात्रेण क्षीयन्ते शत्रवः स्वयम्।।
चतुरंगुली विस्तारं दशांगुली समायुतम्।
श्मशान मृत्तिकायां तु पुत्तलीं कारयेद्बुधः।।
श्मशानाग्नि समादाय उन्मत्त रस संयुतम्।
पुत्तल्युपरि खेंकारः पार्श्वे चिन्तामणीं लिखेत्।।
मस्तके काम राजं च हंस बीजं तु मूर्धनि।
स्नुहिक्षीराभिषेकं च विदधीतप्राणपूर्वकम्।।
स्नुहि वृक्षस्याधो भागे खनेत् प्रादेश मातृकम्।
शुक्लप्रतिपदारभ्य अष्टम्यन्तं जपेत्सुधीः।।
पराजिताः पलायन्ते शत्रवो नात्र संशयः।
शालुवं पक्षिराजानं शरभं शिव रूपिणम्।।
यो द्विजः सततं ध्यायेत् पलायन्ते च शत्रवः।
खादरीं पुत्तलीं कृत्वा पवनञ्च यथा विधिम्।।
तांस्पृष्ट्वा चायुतं मन्त्रं मुच्यते राज्य तस्करैः।
पुत्तली खादिरे मूले निक्षिपेत्तस्य शत्रवः।।
पुत्र मित्र कलत्रादीन् त्यक्त्वा देशान्तरं व्रजेत्।
राजवृक्षस्य पुतल्यां भू बीजं स्मर वह्निना।।
वाग्भवं वायु बीजं च श्री बीजं भुवनेश्वरी।

प्रादक्षिण्येन वेष्टव्यं पुत्तल्योपरि लेखितः।।
मूलेन राजवृक्षस्य समिद्धोमो विधीयते।
अष्टोत्तर सहस्त्रं च शतमष्टोत्तरं च वै।।
हुनेच्च विधिवन्मन्त्रं चतुःकण्ठं विधानतः।
त्रिदिनान्ते च विद्वेषः शत्रूणां च परस्परम्।।
रिपवः संक्षयं यान्ति पलायन्ते न संशयः।
इत्याकाश भैरव तन्त्रे अरिखण्डे।।
शरभ प्रयोग विधिर्नाम चतुश्चत्वारिंशत्पटलः।

**श्री देव्युवाच-**

देव देव महादेव गिरीश जगतां पते।
त्राहि मां दयया नाथ सच्चिदानन्द शाश्वतम्।।१।।
मन्त्राणामपि यत्सारं सर्व लोकैक साक्षिणम्।
रक्षणं सर्वजन्तूनां ब्रूहि एतद् विभोमनुम्।।२।।

**श्री शिवोवाच-**

रहस्य श्रृणुदेवेशि सर्व रक्षाकरं परम्।
यस्य स्मरण मात्रेण वैरिणां कुलनाशनम्।।३।।
भोग मोक्षप्रदं दिव्यं भुक्ति मुक्ति फलप्रदम्।
राज चौरादि मृत्यूनां नाशनं जय वर्द्धनम्।।४।।
ज्वर रोगघ्नमापद्यं मनुँ वक्ष्यामि तत्वतः।
शरभेश्वर मन्त्रस्य ऋषिः कालाग्नि रुद्रकः।।५।।
छन्दं स्तुति भवो देवो, भगवान् शरभेश्वरः।
खंकारं बीजमित्युक्तं स्वाहा शक्तिरतः परम्।।६।।

स्वेच्छा प्रयोग सिद्ध्यर्थ विनियोगः तथाम्बिके।
त्रिद्वि द्वादश नवकं सप्तकं तु नवक्रमात्।।७।।
मन्त्राक्षरैः करन्यासं मातृका सहितं मनुम्।
केशादिकं न्यसेन्मन्त्री करवक्त्र षडङ्गकम्।।८।।
वियन्निभ महोक्षः कृत्तिवासो वसानः
द्रुहिण सुर मुनीन्द्रैः स्तूयमानं गिरीशम्।
स्फटिक मणि जपा स्त्रक्, पुस्तकं यत्कराब्जे,
शरभमहमुपास्ये शालुवेशं खगेशम्।।६।।
तारं प्रथममुच्चार्य खे खां खं तदनन्तरम्।
प्राणग्रहासि द्वितयं हुं फट् च तदनन्तरम्।।१०।।
स्वाहेति पदमुच्चार्य शत्रुसंहरणाय च।
शरभ शालुवायेति पक्षिराजाय इत्यपि।।११।।
हुं फट् स्वाहेति मन्त्रोऽयं द्वि चत्वारिंशदक्षरः।
जपेद् वर्ण सहस्त्राणि संख्यानि च महेश्वर।।१२।।
दशांशं तर्पणं होमं शतांशं द्विजभोजनम्।
सहस्रांशमथो देवि क्रमादेवं समाचरेत्।।१३।।
होम द्रव्यान्यहं वक्ष्ये अधुना श्रृणु पार्वति।
स्वगृहे दक्षिणे भागे कल्पिते गृह कुण्डले।।१४।।
स्वगृह्योक्त विधानेन त्याज्यभागं तदाचरेत्।
तत्र दूर्वाग्र लुञ्चाञ्च तिललाजांश्च पायसम्।।१५।।
अपूपञ्च यवं चाज्यं क्रमात् सौम्यैः समाचरेत्।
अपामार्ग च वर्हि च खादिरं च कटुत्रयम्।।१६।।

सैन्धवं सार्षपं चाज्यं क्रमात्कार्यं सुरेश्वरि।
होमेन विधिना देवि क्रूरसौम्यक्रियादिषु।।१७।।
हुतं जपं क्रियेद्भक्त्या अवश्यं क्रियतां न चेत्।
विपरीतं भवेत् तस्मादुदासीनं न कारयेत्।।१८।।
स्वयं शिवमयं ध्यात्वा पावकं शरभेश्वरम्।
होमान्ते तु जपेन्मन्त्री त्रिवारं शरभाष्टकम्।।१९।।
तेनाष्टकेन मन्त्रेण भगवान् वरदो भवेत्।
त्रिकोणं विलिखेत्पूर्वं तद्बाह्ये च दलद्वयम्।।२०।।
द्वादशारं च तद्बाह्ये तद्बाह्ये च नखाश्रयम्।
सप्तत्रिंश्च चतुः पञ्च भूपुरञ्चक्रमाल्लिखेत्।।२१।।
पावकादापृथिव्यन्तं लिखेन्मन्त्रां यथाक्रमम्।
तद्बहिः कोण षट्के तु प्रागारभ्य मनुं लिखेत्।।२२।।
फट् फट् जहि तया छिन्धि भिन्दि रुन्धि लिखेत्क्रमात्।
अकाादि क्षकारान्तं वेष्टयेत् विन्दु संयुतम्।।२३।।
महायन्त्रमिदं पुण्यं सप्तावरणकं परम्।
सर्व रोग प्रशमनं सर्वशत्रुजयं शुभम्।।२४।।
सर्व भूतवशीकारं सर्वपाप विमोचनम्।
नाना ज्वरं तु यन्त्रं च नाना क्षुद्र निवारणम्।।२५।।
य इमं धारयेद्भक्त्या नासाध्य तस्य विद्यते।
अनेनैव तु मन्त्रेण साक्षाच्छिव समोभवेत्।।२६।।
षट् सप्त कोष्ठेषु विलिख्य शारभमेकाग्रशुलं च
तथाहि साध्यम्।

वाह्ये तु मायावृत तारवेष्टितं जयाकरं जपतामाशुचक्रम।।२७।।
१ दूर्वा २ गुडूची ३ चत्र्चु ४ तिल ५ लाजा ६ दुग्ध ७ अपूप ८ यव ६ घृत सौम्य क्रमः।
१ अपामार्ग २ खदिर ३ कटिम ४ सैन्धव ५ सर्षप ६ आज्य ७ क्रूरक्रमः अस्य श्री शरभेश्वर मन्त्रस्य कालाग्नि रुद्र ऋषिः अति जगती छन्दः श्री शरभेश्वरो देवता खं बीजं स्वाहा शक्ति, फट् कीलकं चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगः। ॐ खें खां खं फट् हृदयाय नमः प्राणग्रहासि प्राणग्रहासि हुं फट् शिरसे स्वाहा सर्व शत्रु संहरणाय शिखायै वषट् शरभ शालुवाय पक्षिराजाय कवचाय हुं।
हुं फट् स्वाहा अस्त्राय फट्।

**अथ ध्यानम्-**

चन्द्रार्कौ वह्निदृष्टिः– कुलिशवरनखश्चञ्चलोत्युग्रजिह्वः।
काली दुर्गा च पक्षौ, हृदय जठरग्नो भैरवो वाडवाग्निः।
ऊरूस्थौ व्याधि मृत्यु शरभ वरखगश्चण्ड वातातिवेगः।
संहर्ता सर्व शत्रून् सजयति शरभः शाल्वः पक्षिराजः।।१।।
मृगस्त्वर्द्ध शरीरेण पक्षाभ्यां चञ्चुनाद्विजः।
अधो वक्त्रश्चतुष्पाद ऊर्ध्व वक्त्रश्चतुर्भुजः।।२।।
कालान्त दहनोपम्यो नील जीमूत निस्वनः।
अरिस्तद्दर्शनादेव विनष्ट बल विक्रमः।।३।।

**इति ध्यात्वा-**

सटाछटोग्ररूपाय पक्ष विक्षिप्त भूभृते।
अष्टापादाय रुद्राय नमः शरभ मूर्तये।।४।।
इति नमस्कृत्य जपेत्।

मन्त्रस्तु शिखा कवच मन्त्रयोवर्मास्त्रेपहाय हृदय षडङ्गेषु द्विचत्वारिंशदक्षरः समुच्चये। अथ गन्धयुक्ते प्रशस्ते भस्मनि त्रिकोणाष्ट दल द्वादशदल षोडशदल भूपुर द्वन्द्वात्मकं अरत्निमात्रं चक्रमुद्धृत्य मन्त्रेण देवमावाह्य पूजयित्वा त्रिकोणे चन्द्र सूर्य महा वह्नि त्रिकोणान्तश्चतुर्दिक्षु भैरव वाडवाग्नि दुर्गा काली अष्टदले लोकपालान् त्रिकोण पार्श्वयोः व्याधि मृत्यु, द्वादश दले–मदनां रक्त चामुण्डां मोहिनीं द्राविणीं शब्दाकर्षणिकां वाणीं रमां मायां पुलिन्दनीं शास्तारं क्षोभिणीं ज्येष्ठामिति षोडशदले ब्रह्माणं परां विष्णूं मायां बराहं पृथ्वीं विधिं शिवं, दलयोरश्विनौ वीरभद्रं भारतीं शिवं शङ्करं रुद्रं कालरुद्रं चेति अकराद्यैकैक स्वर पूर्वाः षोडश स्वर देवताः सम्पूज्य प्रथम भूपुरे दिक्षु गणेश यम स्कन्द भैरवान्, वायव्यादि विदिक्षु त्वरिता वीरभद्र वडवानल भैरव महामायां पूजयेत्। वाह्यपुरे अष्टदिक्षु ब्राह्म्यादिमातृः सम्पूज्य परितो वृत्त क्रमेण ब्रह्माणं जाह्नवीं, गणेशं भैरवं, भद्रकालीं कालीं जात–वेदसं, धर्मं, नन्दीश्वरं, परमात्मानं, पृथिवीं चण्डशुक्रं, विष्णुं, बलभद्रं धनदं पराशक्तिं दुर्गां धर्म

निर्विकल्पमग्निं भैरवं वर्णद्वयेश्विनौ भार्गवमीश्वरं वायुँ कृशानुं वरुणं शुक्रं शंकरम् द्वादशादित्यान् भारतं, सदाशिवं पृथिवीं, नृसिंहं, इत्याकाशभैरवोक्तान् ककाद्यर्ण देवतास्तद्वर्णाः सम्पूज्य पुनर्मध्ये देवं सम्पूज्य, जप्त्वा स्तुत्वा हृद्युवास्य शिवोऽहमित भावयेत्। एवं यः सततंकुर्यात् स्वयमेव शिवो भवेत्। तद्भस्मागमनं श्रुत्वा कम्पन्ते विग्रहा ग्रहाः। किं पुनर्दर्शनादस्य भूतप्रेतादि राक्षसाः। ॐ नमः पक्षिराजाय निशित कुलिश नखवराय अनेक कोटि ब्रह्माण्ड कपाल मालालंकृताय सकल कुल महानाग भूषणाय सर्वभूत निवारणाय नृसिंह गर्व निर्वापकरणाय सकल रिपूणामटवी मोहनाय ह्योनिजाय शरभ शालुवाय ह्रां ह्रीं ह्रूं प्रवेशय प्रवेशय आवेशय आवेशय भाषय भाषय मोहय मोहय ह्रां स्तम्भय २ कम्पय २ घातय २ बन्धय २ भूत ग्रहंबन्धय २ रोग ग्रहं बन्धय २ बालग्रहं बन्धय २ यक्षग्रहं बन्धय २ सूतिका ग्रहं बन्धय २ चातुर्थि ग्रहं बन्धय २ भीम ग्रहं बन्धय २ अपस्मार ग्रहं बन्धय २ पिशाच ग्रहं बन्धय २ आवेश ग्रहं बन्धय २ अनावेश ग्रहं बन्धय २ काम होम त्रोटय २ प्रैं त्रैं ह्रैं मारय २ मुञ्च २ हूं फट् इत्याकाश भैरव कल्पोक्त पूजा क्रमः।

श्री पार्वत्युवाच

देव देव महेशान सर्वात्मन् जगद्गुरो।
रहस्यं शालुवेशस्य कवचाख्यं वद प्रभो।।१।।
स ऋषि छन्दसः ध्यायेत् देवता कीलकं त्वनु।
विनियोगो नियोतॄणां सर्वदं सिद्धदं मतम्।।२।।
श्रोतुमिच्छामि तत्वतः कोऽन्यो वक्तु क्षमस्त्विह।
शालुवेशः पक्षिराजो हृदि ध्येयः प्रसाधकैः।।३।।

**शिव उवाच।**

वक्ष्यामि श्रृणु देवेशि सर्व रक्षणमद्भुतम्।
शारभं कवच नाम चतुर्वर्ग फलप्रदम्।।४।।
शरभ शाल्वराजाख्य कवचस्य सदा शिवः।
ऋषिः छन्दोऽस्य जगती प्रोच्यते शरभेश्वरः।।५।।
देवता प्रणवो बीजं प्रकृतिः शक्तिरुच्यते।
कीलकं पक्षिराजेति सर्व रक्षा करो विभुः।।६।।
परप्रयोग शान्त्यर्थं सर्व शत्रु निवर्तये।
चतुर्वर्गार्थ सिध्यर्थे विनियोगः प्रकीर्तितः।।७।।
ऋषिं शिरसे विन्यस्य मुखे छन्दः सुरेश्वरि।
देवतां हृये न्यस्य बीजं गुह्ये न्यसेत्सुधी।।८।।
विनस्य पदयोः शक्ति कीलकं नाभिमण्डले।
आपाद मस्तकं देवि विनियोगस्य भावना।।९।।
खां खीत्यादिभिः षड्भिः कराङ्गन्यासमाचरेत्।
देवतां हृदये ध्यात्वा पूजयित्वा समाहितः।।१०।।

स्पर्श वीक्षण संश्लिष्टं प्रतिस्थानं शनैर्जपेत्।
ध्यानमस्य प्रवक्ष्यामि समाहितमनाः शृणु।।११।।

अस्य श्री शरभ शाल्व राजाख्य कवचस्य सदा शिव ऋषिः जगती छन्दः श्री शरभेश्वरोदेवता ॐ बीजं ह्रीं शक्तिः पक्षिराजः कीलकमु पर प्रयोग शान्त्यर्थ सर्व शत्रु निवृत्तये चतुर्वर्गगार्थ सिद्ध्यर्थे जपे विनियोगः। शिरसि सदाशिवाय ऋषये नमः। मुखे जगत्यै छन्दसे नमः। हृदि श्री शरभेश्वराय देवतायै नमः गुह्ये ॐ बीजाय नमः पादयोः। ह्रीं शक्तये नमः नाभौ पक्षि राजाय कीलकाय नमः। आपाद तल मस्तक विनियोगस्य भावना। खां अंगुष्ठाभां नमः खीं तर्जनीभ्यां स्वाहा। खूं मध्यामाभ्यां वषट्। खैं अनामिकाभ्यां हुं। खौं कनिष्टकाभ्यां वौषट्। खः करतलकर पृष्ठाभ्यां फट्। खां हृदयाय नमः। खीं शिरसे स्वाहा। खूं शिखायै वषट्। खैं कवचाय हुं। खौं नेत्रात्रयाय वौषट्। खः अस्त्राय फट्। अथ ध्यानम्–रत्नाभं सुप्रसन्नं त्रिनयनममृतोन्मत्त भाभिरामम्। कारुण्याम्बोधिमीशं वरदमभयदं चन्द्र रेखावतंशं। शंखाध्माता खिलाशा प्रतिहत विधिना भाममानात्म भासम्। सर्वेशं शालुवेशं प्रणत भय हर पक्षिराजं नमामि।।१।। इति ध्यात्वा लं पृथिव्यात्मकं गन्धं समर्पयामि। हं आकाशात्मकं पुष्पं समर्पयामि। यं

वाय्वात्मकं धूपं स०। रं वह्न्यात्मकं दीपं स०। वं अमृतात्मकं नैवेद्यं कल्पयामि। एवं मनसा सम्पूज्य यथा शक्ति मूलमन्त्रजपं कृत्वा कवचं पठेत्। अथ स्पर्श वीक्षण संश्लिष्ट प्रयोगः। ॐ ऐं ह्रीं श्रीं नमो भगवते श्री शिवाय मम पुरतः ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्वभूतेभ्यो हुं फट् स्वाहा श्री शिवः पुरतः पातु।।१।। ॐ ऐं ह्रीं श्रीं नमो भगवते मायाधीशाय मम पृष्ठतः ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्व भूतेभ्यो हुं फट् स्वाहा। मायाधीशः पृष्ठतः पातु।।२।। ॐ ऐं ह्रीं श्रीं नमो भगवते पिनाकिने मम दक्षिणे पार्श्वे ज्वल२ प्रज्वल२ असाध्यं साधय रक्ष२ सर्वभूतेभ्यो हुं फट् स्वाहा। पिनाकी दक्षिणे पार्श्वे पातु।।३।। ॐ ऐं ह्रीं श्रीं नमो भगवते महेश्वराय मम वामपार्श्वे ज्वल२ प्रज्वल२ असाध्यं साधयं२ रक्ष२ सर्व भूतेभ्यो हुं फट् स्वाहा वाम पार्श्वे महेश्वरः पातु।।४।। ॐ ऐ ह्रीं श्रीं नमो भगवते शम्भवे मम शिखाग्रे ज्वल२ प्रज्वल२ असाध्य साधय२ रक्ष२ सर्वभूतेभ्यो हुं फट् स्वाहा शिखाग्रे पातु मे शम्भुः।।५।। ॐ ऐं ह्रीं श्रीं नमो भगवते शंकराय मम निटले ज्वल ज्वल प्रज्वल२ असाध्यं२ रक्ष रक्ष सर्व भूतेभ्यो हुं फट् स्वाहा निटलं पातु शङ्करः।।६।। ॐ ऐ ह्रीं श्रीं नमो भगवते ईश्वराय मम वदने ज्वल२

प्रज्वल३ असाध्यं साधय२ रक्ष२ सर्व भूतेभ्यो हुं फट् स्वाहा ईश्वरो वदनं पातु।।७।। ॐ ऐ ह्रीं श्रीं नमो२ भगवते पुरान्तकाय मम भ्रुवोर्मध्ये ज्वल२ प्रज्वल३ असाध्यं साधय२ रक्ष२ सर्वभूतेभ्यो हुं फट् स्वाहा भ्रुवोर्मध्ये पुरान्तकः पातु।।८।। ॐ ऐ ह्रीं श्रीं नमो भगवते स्थाणवे मम भ्रुवोर्ज्वल२ प्रज्वल५ असाध्यं साधय२ रक्ष२ सर्वभूतेभ्यो हूं फट् स्वाहा भ्रुवौ पातु मम स्थाणुः।।९।। ॐ ऐ ह्रीं श्रीं नमो भगवते कपर्दिने मम लोचनयोर्ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्व भूतेभ्यो हुं फट् स्वाहा कपर्दी पातु लोचने।।१०।। ॐ ऐ ह्रीं श्रीं नमो भगवते शर्वाय मम श्रोत्रयोर्ज्वल ज्वल प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्व भूतेभ्यो हुं फट् स्वाहा शर्वो मे श्रोत्रयोः पातु।।११।। ॐ ऐ ह्रीं श्रीं नमो भगवते वागीशाय मम लम्बिकायां ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्व भूतेभ्यो हुं फट् स्वाहा वागीशः पातु लम्बिकाम्।।१२।। ॐ ऐ ह्रीं श्रीं नमो भगवते वृषारुढाय मम नासायां ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्वभूतेभ्यो हुं फट् स्वाहा नासायां मे बृषारुढ़ः।।१३।। ॐ ऐ ह्रीं श्रीं नमो भगवते बृषभध्वजाय मम नासाग्रे ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष सर्वभूतेभ्यो हुं फट् स्वाहा नासाग्रं बृषभध्वजः।।१४।। ॐ ऐ ह्रीं श्रीं नमो भगवते स्मरारये

मम ताल्वो ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्व भूतेभ्यो हुं फट् स्वाहा स्मरारिः पातु मे ताल्वोः।।१५।। ॐ ऐं ह्रीं श्रीं नमो भगवते भक्तवत्सलाय मम ओष्ठयोः ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्वभूतेभ्यो हुं फट् स्वाहा ओष्ठयोः भक्त वत्सलः।।१६।। ॐ ऐ ह्रीं श्रीं नमो भगवते मृत्युञ्जयाय मम दन्तेषु ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्वभूतेभ्यो हुं फट् स्वाहा पातु मृत्युञ्जयो दन्तान्।।१७।। ॐ ऐ ह्रीं श्रीं नमो भगवते भूतराजाय मम चिबुके ज्वल२ प्रज्वल२ असाध्यं साधय२ रक्ष२ सर्व भूतेभ्यो हुं फट् स्वाहा चिबुकं पातु भूतराट्।।१८।। ॐ ऐ ह्रीं श्रीं नमो भगवते परमेशाय मम कपोलयोः० परमेशः कपोलो मे।।१९।।

ॐ ऐ ह्रीं श्रीं नमो भगवते कपालभृते कपाल मम त्रके० त्रिकं पातु कपालभृत्।।२०।।

ॐ ऐ ह्रीं श्रीं नमो भगवते

ॐ ऐ ह्रीं श्रीं नमो भगवते पशुपतये मम कण्ठे० कण्ठं पशुपतिः पातुः।।२१।।

ॐ ऐ ह्रीं श्रीं नमो भगवते शूलिने मम हनौ० शूलीं पातु हनुं मम ।।२२।।

ॐ ऐ ह्रीं श्रीं नमो भगवते हराय मम स्कन्ध युग्मे० स्कन्ध युग्मे हरः पातु ।।२३।।

ॐ ऐं ह्रीं श्रीं नमो भगवते धूर्जटये मम भुजयोः० धूर्जटिः पातु मम भुजौ।।२४।।

ॐ ऐ ह्रीं श्रीं नमो भगवते महादेवाय मम भुजमूले० भुजमूले महादेव।।२५।।

ॐ ऐ ह्रीं श्रीं नमो भगवते ईशानाय प्रकूर्परयोः० ईशानो मे प्रकूर्परौ।।२६।।

ॐ ऐ ह्रीं श्रीं नमो भगवते जगन्नाथाय मम सन्ध्योः० मम सन्धी जगन्नाथः।।२७।।

ॐ ऐं ह्रीं श्रीं नमो भगवते चन्द्रशेखराय मम प्रकोष्ठे० प्रकोष्ठ चन्द्रशेखरः।।२८।।

ॐ ऐ ह्रीं श्रीं नमो भगवते त्रिनेत्राय मम मणि बन्धे० मणिबन्धे त्रिनेत्रो मे।।२९।।

ॐ ऐं ह्रीं श्रीं नमो भगवते भीमाय मम कर स्थले० भीमः पातु कर स्थले।।३०।।

ॐ ऐ ह्रीं श्रीं नमो भगवते मृडाय मम पृष्ठे० मृडः पातु मम पृष्ठ ।।३१।।

ॐ ऐं ह्रीं श्रीं नमो भगवते रुद्राय ममाङ्गुष्ठ द्वये० रुद्रोऽङ्गुष्ठ द्वयं मम।।३२।।

ॐ ऐं ह्रीं श्रीं नमो भगवते उमा सहायाय मम तर्जन्योः उमा सहायस्तर्जन्यौ।।३३।।

ॐ ऐं ह्रीं श्रीं नमो भगवते भर्गाय मम मध्यमयोः भर्गो मे पातु मध्यमे।।३४।।

ॐ ऐ ह्रीं श्रीं नमो भगवते करालास्याय मम अनामिकयोः० अनामिके करालास्यः ।।३५।।

ॐ ऐ ह्रीं श्रीं नमो भगवते कालकण्ठाय मम कनिष्ठयोः० कालकण्ठः कनिष्ठके ।।३६।।

ॐ ऐ ह्रीं श्रीं नमो भगवते गंगाधराय ममांगुली पर्वसु०गंगाधरोऽममांगुली पर्वणि।।३७।।

ॐ ऐ ह्रीं श्रीं नमो भगवते अप्रमेयाय मम नखेषु० अप्रमेयो नखानि मे।।३८।।

ॐ ऐ ह्रीं श्रीं नमो भगवते तत्पुरुषाय मम वक्षसि० वक्षः तत्पुरुषः पातु।।३६।।

ॐ ऐ ह्रीं श्रीं नमो भगवते दक्षाध्वरान्तकाय मम कक्षयोः कक्षौ दक्षाध्वरान्तकः।।४०।।

ॐ ऐ ह्रीं श्रीं नमो भगवते अघोराय मम हृदये० अघोरो हृदयं पातु।।४१।।

ॐ ऐ ह्रीं श्रीं नमो भगवते वामदेवाय मम स्तनद्वये० वामदेवः स्तनद्वये।।४२।।

ॐ ऐ ह्रीं श्रीं नमो भगवते भाल दृशे मम जठरे० भाल दृक् जठरं पातु।।४३।।

ॐ ऐ ह्रीं श्रीं नमो भगवते नारायणाव्ययाय मम नाभौ० नाभिं नाराणोऽव्यय०।।४४।।

ॐ ऐ ह्रीं श्रीं नमो भगवते प्रजाकराय मम कुक्षौ० कुक्षिंप्रजाकरः पातु।।४५।।

ॐ ऐं ह्रीं श्रीं नमो भगवते महाबलाय मम कुक्षि पार्श्वयोः० कुक्षिपार्श्वे महाबलः ।।४६।।

ॐ ऐं ह्रीं श्रीं नमो भगवते सद्यो जाताय मम कटौ० सद्यो जातः कटिं पातु ।।४७।।

ॐ ऐं ह्रीं श्रीं नमो भगवते भैरवाय मम पृष्ठ भागे० पृष्ठ भागं तु भैरवः ।।४८।।

ॐ ऐं ह्रीं श्रीं नमो भगवते मोहनाय मम जघने० मोहनो जघने पातु ।।४९।।

ॐ ऐं ह्रीं श्रीं नमो भगवते जितेन्द्रियाय मम गुदे० मम जितेन्द्रियः ।।५०।।

ॐ ऐं ह्रीं श्रीं नमो भगवते ऊर्ध्व रेतसे मम लिङ्ग देशे ।।५१।।

ॐ ऐं ह्रीं श्रीं नमो भगवते बृषभध्वजाय० मम बृषणं बृषभध्वजः ।।५२।।

ॐ ऐं ह्रीं श्रीं नमो भगवते भवाय ममोरुयुग्मे० ऊरुयुग्मं भवः पातु ।।५३।।

ॐ ऐं ह्रीं श्रीं नमो भगवते स्मरान्तकाय मम जानु युग्मे० जानु युग्मं स्मरान्तकः ।।५४।।

ॐ ऐं ह्रीं श्रीं नमो भगवते हुँकाराय मम जंघयोः० हुंकारः पातु मे जंघे ।।५५।।

ॐ ऐं ह्रीं श्रीं नमो भगवते फट्काराय मम गुल्फके० फट्कारो मम गुल्फके ।५६।।

ॐ ऐं ह्रीं श्रीं नमो भगवते वषट्काराय मम पाद पृष्ठे०

वषट्कारः पातु पृष्ठम्।।५७।।
ॐ ऐं ह्रीं श्रीं नमो भगवते वौषट्काराय मम अंघ्रिणोस्तले० वौषटकारोंऽघ्रिणोस्तले।।५८।।
ॐ ऐं ह्रीं श्रीं नमो भगवते स्वाहाकाराय मम अङ्गु लिपार्श्वे० स्वाहाकारोऽङ्गुली पार्श्वे।।५६।।
ॐ ऐं ह्रीं श्रीं नमो भगवते स्वधाकाराय मम अङ्गु लीषु० स्वधाकारोंगुली श्चमे।।६०।।
ॐ ऐं ह्रीं श्रीं नमो भगवते त्वरिताय मम सर्व सन्धिषु० सर्व सन्धीनिमेत्वरितः।।६१।।
ॐ ऐं ह्रीं श्रीं नमो भगवते नृसिंहजिते मम रोम कूपेषु० रोम कूपान्नृसिंहजित्।।६२।।
ॐ ऐं ह्रीं श्रीं नमो भगवते मनोवेगाय मम त्वचिं पातु मनोवेगः।।६३।।
ॐ ऐं ह्रीं श्रीं नमो भगवते कालजिते मम रुधिरे० रुधिरं पातु कालजित।।६४।।
ॐ० पुष्टिदाय मम मांसे० पुष्टिदः पातु मे मांसम्।।६५।।
ॐ०स्वस्तिदाय मम मेदसि० मेदो मे पातु स्वस्तिदः।।६६।।
ॐ० सर्वात्मने ममास्थिचये० सर्वात्मास्थिचयं पातु।।६७।।
ॐ० जगत्प्रभवे मम मज्जनि० मज्जानं मे जगत्प्रभुः।।६८।।
ॐ० वृद्धि कराय मम शुक्रे० शुक्रं वृद्धिकरः पातु।।६६।
ॐ०वाचामधीश्वराय मम बुद्धौ० बुद्धिं वाचामधीश्वरः।।७०।।
ॐ० शरभेश्वराय मम मूलाधारे–मूलाधारेम्बुजे०मूलाधाराम्बुजं

पातु भगवान् शरभेश्वरः।।७१।।
ॐ० अजाय मम स्वाधिष्ठाने० स्वाधिष्ठानमजः पातु।।७२।।
ॐ० हरिप्रियाय मम मणिपूरे० मणिपूरं हरिप्रियः।।७३।।
ॐ० शालुवेशाय मम अनाहते० अनाहतं शालुवेशः।।७४।।
ॐ० जीवनायकाय मम विशुद्धे० विशुद्धं जीवनायकः।।७५।।
ॐ० सर्वज्ञानप्रदाय देवाय सदाशिवाय मम ललाटे सर्वज्ञानप्रदोदेवो ललाटं मे सदाशिवः।।७६।।
ॐ० महादेवाय मम ब्रह्म रन्ध्रे०ब्रह्मरन्ध्रे महादेवः।।७७।।
ॐ० नमो० पक्षिराजाय ममाखिला कृतौ० पक्षिराजोऽखिला कृतिः।।७८।।
ॐ० सर्वलोक वशीकराय परवर्गजितेर्मायथि० पातू मां परवर्गजित।।७९।।

ॐ वज्रमुष्टि वराभीति हस्ताय कालाभ्र सन्निभाय विजया सहिताय ममऐन्द्र्यां ककुभि० वज्रमुष्टि वराभीति हस्तः कालाभ्र सन्निभः विजया सहितः पातु चैन्द्रीं ककुभमग्निजित्।।८०।।

ॐ शक्ति शूल कपालासि हस्ताय सौदामिनी प्रभाय जया युताय महाभीमाय मम वैश्वनर्या दिशि० शक्तिशूल कपालासि हस्तः सौदामिनी प्रभः, जयायुतो महाभीमः पातु वैश्वानरीं दिशम्।।८१।।

ॐ दण्डासि मुसल हल पाशाङ्कुश कराम्बुजाय यमान्तकाय अजिता युक्ताय मम दक्षिणस्यां दिशि०

दण्डासिमुसलहस्त पाशाङ्कुश कराम्बुजः यमान्तिकोऽजितायुक्तो दक्षिणां पातु मे दिशम्।।८२।।

ॐ खड्ग खेटाग्नि परशु हस्ताय शत्रुविमर्दनाय अपराजिता युक्ताय मम नैर्ऋत्यां दिशि० खड्ग खेटाग्नि परशु हस्तः शत्रु विमर्दनः अपराजिता युक्तः सदाव्यान्नैर्ऋतीं दिशम्।।८३।।

ॐ पाशाङ्कुश धनुर्वाण पाणये घोरायुताय ग्रहाय हरिद्राभाय आत्मजिते मम वारुण्यां दिशि० पाशाङ्कुश धनुर्वाण पाणिर्घोरायुतो ग्रहः हरिद्राभोऽनिशं पायाद्वारुणीदिशमात्मजित्।।८४।।

ॐ ध्वजोग्र क्रकचोदार भुजाय दुर्गायुताय खगाय शिव चण्डवेगाय मम मारुत्यां दिशि० ध्वजोग्र क्रकचोदार भुजो दुर्गायुतो खगः चण्डवेगः शिवः पायात्सततं मारुतीं दिशम्।।८५।।

ॐ गदाक्ष स्त्रग्वराभीति कराम्भोजाय श्रिया युताय कनकाभाय महातेजसे मम कौबेर्यां दिशि पाशाङ्कुश धनुर्वाण गदाक्षस्त्राग्वराभीति कराम्भोजः श्रियायुतः कनकाभो महातेजाः पातु कौवेरिकीं दिशम्।।८६।।

ॐ त्रिशुलाहि कपालाग्निदोस्तलाय विद्यायुताय भस्मोद्धूलित सर्वाङ्गाय अपराजिताय मम ईशान्यां दिशिः० त्रिशूलाहि कपालाग्निदोस्तलः विद्ययायुतः, भस्मोद्धूत सर्वाङ्ग, शैवीं पात्वपराजितः।।८७।।

ॐ जपाक्षपुस्तकाम्भोज कमण्डलु लसत्कराय गिरा युक्ताय सर्वभूतहितेरताय मम ऊर्ध्वायां दिशि० जपाक्ष पुस्तकाम्भोज लसत्करः। ऊर्ध्वं पातु गिरा युक्तः सर्वभूत हिते रतः।।८८।।

ॐ शंखचक्रवराभीति हस्ताय पद्मयुताय अव्ययाय नीलाञ्जनसमाय निलाय मम पाताले० चक्रवराभीति हस्तः, हस्तपद्मयुतोऽव्यय नीलाञ्जन समोनीलः पातालं पात्वनारतम्।।८६।।

ॐ नरसिंह जिते शालुवाय मम अनुक्तासु विदिक्षु० अनुक्ता विदिशः पातु शालुवो नरसिंह जित्।।६०।।

ॐ शरभाय मम संग्रामे० शरभः पातु संग्रामे।।६१।।

ॐ वैरिकुलान्तकाय मम युद्धे० युद्धे वैरिकुलान्तकः ।।६२।।

ॐ सर्व सौभाग्यदाय मम जाग्रत् स्वप्न सुषुप्तिषु० सर्व सौभाग्यदः पातु जाग्रत् स्वप्न सुषुप्तिषु।।६३।।

ॐ सर्व सम्पत्प्रदाय मम धन धान्यादिके सर्व सम्पत्प्रदः पातु धनधान्यादिकं मम।।६४।।

ॐ सन्तानदाय मम सुतासु० सन्तानदः सुताः पातु ।।६५।।

ॐ आयुष्कराय मम पुत्रेषु० पुत्रानायुष्करोऽनिशम्।।६६।।

ॐ वृद्धिकराय मम बन्धुषु० बन्धून् वृद्धि करः पातु ।।६७।।

ॐ वशंकराय मम गृहे० गृहं मम वशंकरः।।६८।।
ॐ ग्रामेश्वराय मम ग्रामे०ग्रामेश्वरो पातु ग्रामम्।।६६।।
ॐ दिगम्बराय मम राज्ये०राज्यं पातु दिगम्बरः।।१००।।
ॐ शान्तिकराय मम राष्ट्रे० शान्तिकरः पातु।।१०१।।
ॐ धर्मशासनाय मम राज्ञि० राजानं धर्मशासनः।।१०२।।
ॐ दुःखहराय मम मार्गे०मार्ग दुःख हरः पातु।।१०३।।
ॐ भैरवाय मम धर्म कर्मसु०धर्मं कर्मणि भैरवः।।१०४।।
ॐ बटुकाय मम सर्वस्मिन् अवस्था त्रिंतयेषु० वटुकः पातु मे सर्वमवस्था त्रितयेषु च।।१०५।।

इति स्पर्श वीक्षण संश्लिष्ट सकामना प्रयोगः।।

इति दश वारं प्रजप्य ये ग्राम घातकाः इत्यादि पठेत् अन्ते मूलं जपेत्। स्पृशन् पश्यन् जपं कृत्वा, प्रतिस्थानं समाहितः। प्रार्थयेदखिलं स्वेष्टं हृदिस्थं शालुवेश्वरम्।।१०६।।

ये ग्राम घातका क्रूरा कपटा दौष्टका नराः
तस्करा शत्रवः क्रुद्धा वधा सक्ताः पलाशिनः।।१०७।।
लग्नाचरा विटा भ्रष्टाः दिवाचर निशाचराः
ते सर्वे पक्षिराजस्य पक्षवात पराहताः।।१०८।।
स्त्री बालसहिता क्षिप्रं पितृ मातृ कुलान्विता।
भग्न चित्तागत स्थाना यान्तु देशान्तरं स्वयम्।।१०६।।
ये दुष्ट ग्रहाः रक्षः पिशाचा देवयोनयः।
चतुः षष्ठि गणाः सप्त सप्तत्युन्मादका ग्रहाः।।११०।।
अष्टाशीति महाभूता सप्त कोटि महा ग्रहाः।

नवतिर्ज्वर भेदाश्च शत भेदाश्चकृत्तिका।।१११।।
पञ्चाशद् गण नाथाश्च नियुता कृत्तिभा ग्रहा।
प्रेतारुढास्त्रयस्त्रिंशद् पिण्डदान परायणा।।११२।।
अयुतं क्षुद्र भेदाश्च चत्वारिंशच्छिवाह्वया।
द्वात्रिंशदहिंवक्राश्च विंशं मार्जार वक्रका:।।११३।।
चतु: षष्टचाखु रूपाश्च ये चान्ये क्षुद्रयोनय:।
ते सर्वे शालुवेशस्य शंख नि:स्वन मोहिता:।।११४।।
विखिन्ना स्खलिता: स्वान्ता: प्राणायम परायणा:।
गच्छन्तु सप्रयोक्तारो देशान्तरमनिच्छया।।११५।।
ये चान्ये वनजा ग्राम्या शनुकोरग वृश्चिका:।
आशीविषा शिवा ब्याला व्याघ्रा ऋक्षेभसूकरा:।।११६।।
गृद्धाश्येना खगा: काका दंशका: शशका: मृगा:।
एते शरभ हस्ताग्र नरवक्षत विमोहिता:।।११७।।
सृवद् रक्त घटा सिक्ता: शिलातल विताडिता।
सम्भिन्न तनव: शीघ्रं नश्यन्त्यखिल दुश्चरा:।।११८।।
न दशन्त्युरगा: क्वापि नाति वातोप वीजताम्।
न दहत्य सहो वहिरायान्त्यापो न चाधिकम्।।११९।।
न वर्षत्यति वृष्टिश्च न पतत्यशनि: क्वचित्।
ना क्रमत्यप मृत्युश्च नचोत्पाता: कथंचन।।१२०।।
न भ्रियन्त्वम्भसि जना: न भवत्यशुभं क्वचित्।
न वदन्त्यशुभं वाक्यं जन्तवो मम देश के।।१२१।।
न स्याद्वैरं च जन्तूनां अन्योन्यं राजके मम।

भवन्तु सुखिनः सर्वे सर्वाः सन्तु पतिव्रताः।।१२२।।
सर्वाः सूयन्तु सत्पुत्रान् पुत्रींश्च शुभ लक्षणाः।
सर्वे सर्वाश्च नन्दन्तु सन्तु कल्याण कारकाः।।१२३।।
राजन्वती महीचास्तु राजा भवतु धार्मिकाः।
सुस्त्रवन्तु पयो गावः फलत्वोषधिकोऽधिकम्।।१२४।।
फलन्तु फलदा वृक्षाः सर्वं भवतुमेऽखिलम्।
ममास्तु तरसा नूनमात्मज्ञानमचञ्चलम्।।१२५।।
काम क्रोध महालोभ सम्मोह मद मत्सराः।
मा सन्तु क्वापि शरभेश भगवन्करुणानिधे।।१२६।।
गौरी वल्लभ कामारे कालकूट विषादन।
मामुद्धरापदाम्भोधेस्त्रिपुर ध्नान्धकान्तक।।१२७।।
शरभेश्वर विश्वेश पक्षिराज दया निधे।
देहि मे त्वचलां भक्तिं प्रणतोऽस्मि पुनः पुनः।।१२८।।
शालुवेश जगन्नाथ सर्व भूत हिते रत।
पाहि मां तरसा चौरात् दुष्टान्नाशय नाशय।।१२९।।
काल भैरव विश्वेश विश्व रक्षा परायण।
रक्षोमूषक चौरेभ्यो धान्यराशिमिसं प्रभो।।१३०।।
पक्षिराज महादेव प्रणतार्ति विनाशन।
तस्करेण हृतं वस्तु शीघ्र दापय दापय।।१३१।।
ये मर्म वादिनः क्षुद्राः क्षुद्रोपद्रव कारकाः
सर्वाचार परित्यक्ताः मानहीनाश्चरोधकाः।।१३२।।
ते सर्वे शालुवेशस्य मुसलायुध चूर्णिता।

नश्यन्तु निमिषार्द्धेन पावकावृत तूलवत्।।१३३।।
ये जनाद्रोहिणोऽल्पाशा त्वकालोचित भाषिणः
सत्कर्म विध्न कर्तारः शान्ति भर्त्साः परायणाः।।१३४।।
ते शालुवेश हस्ताग्र खड्‌ग निर्भिन्न देहिनः।
पतन्तु भूतले याम्यां प्राणास्तेषां प्रयान्तुवै।।१३५।।
त्वदंध्रि ध्यान निर्दग्ध पापकोशाय मन्त्रिणे।
मह्यं द्रुह्यन्ति ये तेषां विभवानि क्षयं त्वरम्।।१३६।।
सदाचार परंनित्यं साधकं मां विवेकिनम्।
येचाक्रामन्ति संग्रामे ते गच्छन्तु पराहताः।।१३७।।
त्वदीये नैव मार्गेण संचरन्तं जयातुरम्।
ये वदन्ति परीवादं भ्रान्ताः शीघ्रं भवन्तु ते।।१३८।।
त्वदागम परं धीरं ये मां तर्जयितुं बलात्।
मनसाप्यनु मन्यन्ते तस्यान्तं भवतु क्षणात्।।१३९।।
मनसा कर्मणा वाचा ये इच्छन्त्यति दुःसहम्।
ते मोह शोक रोगाब्धौ पतन्त्वाशु शिवाज्ञया।।१४०।।
मदीयानि पदार्थानि ग्रहीतुं योऽवलोकते।
तत्क्षणादेव नष्टाक्षो भवत्वेव शिवाज्ञया।।१४१।।
मदीयं द्रव्यमादाय ये गच्छन्तीह तस्कराः।
सिंहारि पाश सम्बद्धास्ते गच्छन्तु प्रदक्षिणम्।।१४२।।
सीमान्तगाश्च ये चौरा ग्रहीत द्रव्या संचयाः।
अवशावयवास्तेतु आगच्छन्तु शिवाज्ञया।।१४३।।
तस्करा निम्नगागीताः खात धान्य धनादिकाः।

पक्षिराजाङ्कुशाकृष्टाः समागच्छन्तु ते द्रुतम्।।१४४।।
समाहृताः पदार्थाः देशातीताश्च तस्कराः।
शरभेश हलाकृष्टास्ते आगच्छन्तु सानुगाः।।१४५।।
चौराः ग्रहीतुमुद्युत्काः समागच्छन्ति मद्गृहे।
ते शालुवेश पक्षोग्र वातैर्गच्छन्तु सत्वरम्।।१४६।।
शान्तं विवेकिनं भक्तं त्वदंघ्रिध्यान तत्परम्।
ब्रुवन्ति येऽसहं प्राणा स्तेषां यान्तु यमीपुरम।।१४७।।
षट् त्रिंशत् कोष्टके यन्त्रे रेखाशूलाग्रमध्यगे।
स्वेच्छा मन्त्रं लिखित्वा तु जपेदाराध्य साधकः।।१४८।।
उदङ्मुख सहस्त्रं तु स्वरक्षायै जपेन्निशि।
नष्टाहरणके पञ्च रात्रं पश्चिम दिङ्मुखः।।१४६।।
मारणे सप्तरात्रं तु दक्षिणाभिमुखो जपेत्।
रोगानिग्रहणं चाष्ट रात्रमाग्नेय दिङ्मुखः।।१५०।।
इतिगुह्यं महामन्त्रं परमं सर्वार्थ सिद्धिदम्।
शरभेश्वराख्य कवचं चतुर्वर्ग फल प्रदम्।।१५१।।
प्रत्यहं प्रति पक्षं प्रतिमासमथापिवा।
यो जपेत्प्रतिवर्षंवा वरेण्यं सशिवोभवेत्।।१५२।।
एवं च जपतः पुंसः पातकञ्चोपपातकम्।
सर्वं विलयमाप्नोति रविणातिमिरं यथा।।१५३।।
दशाब्दं यो जपेन्नित्यं प्रातरुत्थाय साधकः।
सर्वं सिद्धि समाश्रित्य देहान्ते स शिवोभवेत्।।१५४।।
त्रिकालं ध्यान पूर्वंतु जपेत् द्वादश वार्षिकम्।

कायनानेन वै देवि जीवन्मुक्तो भवेत्तुसः।।१५५।।
शतवारं जपेन्नित्यं मण्डलं यो वरानने।
सोऽणिमादि गुणान्प्राप्य विचरे त्स्वेच्छया सदा।।१५६।।
अतलादिधरण्यादि भुवनानि चतुर्दश।
विचरेत्कामवत्सर्वैः पूज्यमानो यथा सुखम्।।१५७।।
त्रिमासं यो जपेन्नित्यमष्टोत्तर सहस्त्रकम्।
सहसा शरभेशस्य स्वरुपं लभतेऽम्बिके।।१५८।।
षण्मास यो जपेन्नित्यं प्रयतः सुदृढव्रतः।
मद्रूपधारकैर्मर्त्यैः सह सिद्धि प्रदायकः।।१५९।।
मम लोके च सम्पूज्यो विष्णुलोके तथैव च।
ब्रह्म लोके च रमते सर्वत्र न निवार्यते।।१६०।।
इन्द्राग्नि यम यक्षेश जलेश पवनैस्सदा।
सोमेशानन्त लक्ष्मीशैर्दिशां पालैश्च पूज्यते।।१६१।।
आदित्य सोम पृथ्वीज बुध श्रीगुरुभार्गवैः।
पूज्यते सग्रहैस्सर्वैसशनिराहुकेतुभिः।।१६२।।
क्रत्वंगिरः पुलस्त्यैश्च पुलहात्रि मरीचिभिः।
दश काश्यप भृग्वादि योगिभिश्च प्रपूज्यते।।१६३।।
भैरवै र्वसुभिर्रुद्रैरादित्यै गणपत्यकैः।
दिग्गजैश्च महानागैदिव्यास्त्रैर्दिव्यवाहनैः।।१६४।।
माहेश्वरैर्महा रत्नैः कामधेनु सुरद्रुमैः।
सरिद्भिस्सागरैः शैलैर्देवताभिस्तपोधनैः।।१६५।।
दानवैः राक्षसैः क्रूरैः सिद्धगन्धर्व किन्नरैः।

राक्षैर्विद्याधरैर्नागैरप्सरोभिश्चपूज्यते ।।१६६।।
अपस्मारग्रहैर्भीमैः हर्म्यस्थैर्ब्रह्मराक्षसैः।
वैतालैर्खेचरैर्मर्त्यैः कूष्माण्डैः राक्षस ग्रहैः।।१६७।।
ज्वालावक्रैस्तमोहारैः स्त्रीग्रहैः पाप संग्रहैः।
भूतप्रेत पिशाचाद्यैः ग्रहैः सर्वै संपूज्यते।।१६८।।
ब्राह्मणैः क्षत्रियैर्वैश्यैःशूद्रैरन्यैश्च जातिभिः।
पशुपक्षिमृगैर्व्यालैः पूज्यते सर्वजन्तुभिः।।१६६।।
किमन्य बहुनोक्तेन तव वक्ष्ये यथातथम्।
मया च विष्णुना चैव विश्वकर्ता च पाल्यते।।१७०।।
भवान्या चगिरा लक्ष्म्या ब्रह्माण्याद्यष्ट मातृभिः
गणेश्वरादि योगीन्द्रैः योगिनीभिः स पाल्यते।।१७१।।
य इदं पूजते भक्त्या नासाध्यं तस्य विद्यते।
कवचेन्द्रं महामन्त्रं जपेदस्याः अनुत्तमम्।।१७२।।
उच्चाटने मरुद्वक्त्रो विद्वेषो राक्षसाननः।
प्रागाननोऽभिबृद्धौ तु सर्वेष्वीशानजिङ्मुखः।।१७३।।
पठेत् स कवचं देविध्यान निष्ठं तु पूर्वकम्।
सर्व सिद्धिमवाप्नोति सहसा साधकोत्तमः।।१७४।।
देव देव महादेव शिव कारुण्यवारिधे।
पाहि मां प्रणतं स्वामिन् प्रसीद सततं मम।।१७५।।
यत्कृतं तन्नकृतयं, यदकृत्यं, तदकृत्यवदाचरितम्।
उभयोः प्रायश्चित्तं शिव तव नामाक्षर द्वयोच्चरितम्।।१७६।।

**इति**

।।श्री आकाश भैरव कल्पे शरभ कवचं सम्पूर्णम्।।

## आकाश भैरव कल्पः

गुरुं गणपतिं देवीं भैरवं शरभेश्वरम्।
नमस्कृत्य प्रवक्ष्यामि मन्त्रशास्त्र विभूतये।।१।।
साङ्गं सलक्षणं वेद सारभूतमभीष्टदम्।
ज्ञानदं जीवनं ज्ञान साधकानां सुखावहम्।।२।।

**श्री देव्युवाच।**

श्री शिवेशान देवेश श्री नाथ जगतांपते।
श्री कुलाकुल चिद्रूप श्रीमते भवते नमः।।३।।
अन्यथा शरणं नास्ति त्वमेव शरणं मम।
तस्मात्कारुण्य भावेन रक्ष रक्ष महेश्वर।।४।।
यद् गुह्यं परमं लोके यच्छास्त्रमखिलप्रदम्
यद्धितं साधकेन्द्राणां तद्वदस्व दयानिधे।।५।।

**श्री शिव उवाच**

श्रीमत्परम सौभाग्ये मन्त्रयन्त्रागमादिनाम्।
त्रयीणामुपवेदानां शृणु गुह्यतमं परम्।।६।।
महामन्त्र क्रिया शास्त्रं महासिद्धि प्रदायकम्।
सर्व दोष प्रशमनं पावनं लोक जीवनम्।।७।।
धर्मार्थ काम मोक्षाणां फलदान प्रगल्भितम्।
सर्वज्ञान प्रदं ब्रह्म ज्ञानदं ब्रह्म सम्मतम्।।८।।

तादृशं कल्पमागोप्यं सर्व देवागमोद्भवम्।
शीघ्र सिद्धिप्रदं श्रेष्ठं शृणु सर्वमथाम्बिके।।६।।
वक्ष्यमाणं महाशास्त्रं शृण्वतां पठतामपि।
तथा लोके यथा पुण्योपनीतानां विशेषतः।।१०।।
क्षिप्र सिद्धि प्रदं दिव्यं कथयामि जगन्मयम्।
प्रणभ्य परया भक्तया व्याख्यं योवाऽवलोकते।।११।।
सहसा तस्य सौभाग्यं प्रश्रितं ज्ञानञ्चभूयकम्।
लब्ध शिष्यः समुत्थाय विभाते देशिकं स्मरेत्।।१२।।
वक्ष्यमाणेन शास्त्रेण साध्यकर्म समाप्य सः।
यथा तथं पुरायुक्त एकान्ते भवते शुभे।।१३।।
यथाविधि समाविश्य भूतोच्चाटं चरेत् स्थितः।
अपसर्पन्तु ते भूताः ते भूता भुवि संस्थिताः।
ये भूता विघ्न कर्तारस्तेगच्छन्तु शिवाज्ञया।।१४।।
इति जप्त्वा करास्फोटं त्रिधाघातं ततस्तथा।
ततो मन्त्र नमस्कृत्य लोकपालांश्च मण्डपम्।।१५।।
मुक्ता विद्रुम रत्नकान्त रुचिरं, हैमं विचित्रं परम्।
नाना दिव्य सुगन्ध गन्धिनिवहं, नाना प्रसूनार्चितम्
पञ्चाशल्लिपि शोभितं परसुधा धाराभिरासेचितम्
पञ्चानन्दमयं प्रपन्न सुखदं भद्रञ्च पीठं नुमः।।१६।।
ब्रह्म नमाम्यहं, ब्रह्मरन्ध्रे यजेन्नाथ ब्रह्मानन्दमय विभुम्।
परं पराक्रमेणैव गन्धापुष्पाक्षतादिभिः।।
चिरंध्यात्वाततो देवीं भूतशुद्धिं यथा विधिः।

ऋषिं न्यासादिंक कुर्यात् प्रसन्नात्मा यथाविधि।
सर्वकार्यार्थ सिद्धयेच सर्व विघ्न निवृत्तये।।
पञ्चधार्णैकविंशेन यजेद् वैनायकं पुनः।
इत्याकाश भैरव कल्पे प्रत्यक्ष सिद्धि प्रदे
उमा महेश्वर संवादे
शंकरेण विराजिते उल्हास प्रक्रमो नाम प्रथमोऽध्यायः।।

**श्री शिव उवाच!**

अथ विघ्न विनाशाय मन्त्रिणां सर्व सिद्धये।
तीव्रं च ज्वालिनीं नन्दां भोगतां कामरूपिणीम्।।१।।
उग्रां तेजोवतीं सत्यान्ततो विघ्न विनाशिनीम्।
रक्तांग रास वसनां माल्याभरण भूषिताम्।।२।।
वराभीति करास्सर्वा प्रसूनादिभिरर्चयेत्।
तस्योपरि महाचक्रं कल्पयित्वा यथा विधि।।३।।
आवाहनादि पूजान्तं कृत्वा नत्वाथ पञ्चधा।
गुरुं प्रथममाराध्य पारम्पर्यविधानतः।।४।।
विघ्नेश्वरं सावरणं विभुं सच्चिन्मयं यजेत्।
आराध्य योऽखिलान्देवान् एक चत्वारि पञ्चभिः।।५।।
जपेदस्य त्वरं सिद्धिं तन्वन्त्यखिल देवताः।
बिम्बौ गणेश्वरं लक्ष्मीं त्रिकोणाद्दिक्षुबाह्यतः।।६।।
श्रियञ्च श्रीपतिं पूर्वे अम्बिकामम्बिका पतिम्।
दक्षिणेऽथरतिं कामं पश्चिमे चोत्तरे ततः।।७।।
महीमहिपतिं चैव भूयो लक्ष्मीं गणेश्वरम्।

परितो ऋतु कोणाग्रमादितस्तान्यसेत्क्रमात्।।८।।
ऋद्ध्यामोदौ समृद्धिं च प्रमोदं कान्ति सौमुखौ
मदनं रतिञ्च सम्पूज्य दुर्मुखञ्च ततः परम्।।६।।
भद द्रुवामपि विघ्नद्रावणीं विघ्नकारकम्।
वसुधारां शंखनिधिं बाह्ये दक्षिण पार्श्वके।।१०।।
वसुमतीं पद्मनिधिं वाम पार्श्वे यजेत्ततः।
पावकेशान दैतेय पवमान मुखाः शिवाः।।११।।
पीठासनेष्टपत्रो तु नवशक्तिर्गणेशितुः।
प्रागादितो यजेद्देवं नवमं कर्णिकान्तरे।।१२।।
अङ्गजेवीर्यजे चाष्ट पत्रे प्रागादि मातृकाः।
लोक पालान्ततः पश्चात् यजेद्दिक्षु यथा क्रमम्।।१३।।
पञ्चाशदक्षराधीशान् ततः पाशांकुशे यजेत्।
चक्रराजं महीकोण द्वन्देन परिवेष्टितम्।।१४।।
चिरं ध्यात्वा गणेशं च गणेशाभिमुख स्थितः।
गन्धमाल्यैस्समभ्यर्च्य धूप दीपादिभिर्यजेत्।।१५।।
हृत्वातदर्ध्यमात्माग्नौ शतवाराभिमर्षितम्।
आत्मन्युद्वास्यदेवेशं मस्तकाराधनंयजेत्।।१६।।
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्न राजो विनायकः।।१७।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
वक्रदन्तः लम्बकर्णौ हेरम्बस्स्कन्दपूर्वजः।।१८।।
षोडशेतानि नामानि यः पठेत्छृणुयादपि।

एवं स्तुत्वाविघ्नराजं देवीमिष्ट्वा यथा विधि।।१६।।
सवने तत्रतस्ताने यजेदाकाश भैरवम्। इति आकाश भैरव कल्पे यजन विधानं नाम द्वितोयोऽध्यायः।

**श्री शिव उवाच-**

रहस्यं शृणु कल्याणि भैरवस्य महात्मनः।
सर्व लोकैक रक्षार्थं तव वक्ष्यामि तत्वतः।।१।।
यदा लोक हितार्थाय लीलयाकाश भैरवः।
त्रिधा विभज्य चात्मानं रक्षते सर्वदाखिलम्।।२।।
आकाश भैरवं पूर्वं द्वितीयञ्चाशुगारुडम्।
शरभं तु तृतीयं स्यात् रूपत्रयमिहोच्यते।।३।।
तत्र तार्तीय रूपस्य त्रिधा रूप विशेषतः।
शरभं शालुवञ्चैव पक्षिराजं तृतीयकम्।।४।।
तत्र मूलत्रिरूपेषु यजेदेकं यथा दृढम्।
आदि देवोऽस्य मन्त्रस्य विद्यादिरिहोच्यते।।५।।
तथा छन्दस्तु जगती देव आकाश भैरवः।
प्रणवं मां च मायाञ्च बीज शक्तिश्च कीलकम्।।६।।
स्वेच्छा कार्यार्थ सिद्ध्यर्थे विनियोगोऽथमायया।
कराङ्ग न्यास जालानि क्रमात् कृत्वाथध्यायताम्।।७।।
नाना हेति सहस्त्रबाहु सहितं नानायुधैः शोभितम्
नानावर्णसहस्त्रपादकमलं नाना वसालंकृतम्।
नाना नाग विभूषणं पृथुतरग्रीवं सहस्रराननम्।
नानारातिहरं करालवसनं नौम्यावसानं शिवम्।।८।।

एवं ध्यात्वा ततो मन्त्रं षोडशाक्षर रूपकम्।
जपेद्गुरुमुखाल्लब्ध्वा लक्षं सर्वाङ्ग संयुतम्।।६।।
भूकोण कृतान्तर वह्निकोणं संपादितं कल्पयथा विधानम्।
आराधि तत्स्थानखिलोपचारैराराधयेतद्दिशिवाह्यदेशे।।१०।।
तत्कोणमध्ये सकलोपचारैस्ततो जपेन्मन्त्रममीष्ट सिद्धयै।
यामार्धकालार्जितकार्य जाते प्रादुर्भवत्यम्बर भैरव स्वयम्।।११।।
निवेद्यतस्याखिलमात्मनाथं कृत्वाथदास्यं प्रणिपत्य तिष्ठन्।
श्रीरुद्र सूक्तं प्रजपेत्त्रिवारं तथाखिलेशः परितुष्ट हृत्स्यात्।।१२।।
चतुष्टयेन तं पश्येद पाङ्गेन दयापरः।
सप्तकेन लभेत्पूर्ण वीक्षणं भाषणं तथा।।१३।।
एकादशेन वाक् सिद्धिर्षोडशेनामरत्वकम्।
अष्टादशेन सौभाग्यं चतुर्विंशेन निग्रहम्।।१४।।
अष्टाविंशेनदेवत्वं त्रिंशेनेन्द्रत्वमाप्नुयात्।
चत्वारिंशेन वेधस्त्वं स्वर्ग भेदञ्च सर्वसु।।१५।।
पञ्चाशतारमेशत्वं अष्टाशीत्यथ रौद्रकम्।
शतेन शिव सालोक्यं सहस्रेण स्वरूपकम्।।१६।।
सामीप्यमयुतेनैव नियुतेन विशेषतः।
लक्षेण शिव सायुज्यं चमकं तत्परं जपेत्।।१७।।
चमकोक्ताखिलं भाग्यं ददस्वाकाश भैरव।
सन्तुष्ट हृदयस्तस्मै ददात्येव न संशयः।।१८।।
तेन श्री रुद्र सूक्तेन शिवलिंगाभिषेचनम्।
कृत्वैकादशधा मन्त्रो पूजयेत्सर्व सिद्धये।।१६।।
इति आकाश भैरवकल्पे उत्साह यजनं नाम तृतीयोऽध्यायः।।

**श्री शिव उवाच-**

अथ रुद्राभिषेकस्य विधिं वक्ष्यामितेम्बिके।
येनाखिलापराधंच क्षमते श्रृणु भैरवः।।१।।
समाप्य सान्ध्यकं कर्म ब्रह्मग्नीन्द्रमुपासकम्।
संगमानन्तरं गेहं मनोरम्यं प्रविश्य सः।।२।।
पूर्ववत्सकलं कृत्वा नमस्कृत्वा महेश्वरम्।
ततः पौरुष सूक्तेन पादार्चन शिखादिकम्।।३।।
मातृका सहितेनैव न्यसेत्सव्यापकं क्रमात्।
मण्डपं विरचेत् पश्चात् यत्नेनेति ऋचाक्षतम्।।४।।
सुगन्ध गन्धि पयसा पूर्णकुम्भमलकृंतम्।
संस्पर्शन् प्रजपेन्मन्त्री व्याहृतीयुताम्।।५।।
वेदादिश्चतुरोमन्त्रान् आपोहिष्ठेति मन्त्रकम्।
आपोहेति महासूक्तं जप्त्वाभ्यर्च्य सुमादिभिः।।६।।
आपूर्य शंखमभ्यर्च्य इमम्मे गङ्गइत्यृचंजपेत्।
ऋतं चेति ऋचं पश्चात्।।७।।
गंगे च यमुनेचैवगोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेस्मिन्सन्निधौ भव।।८।।
इति जप्त्वा त्रिधामन्त्रं प्रोक्ष्योपकरणानि च।
ततः सह शीर्षेति देवमाबाह्यलिङ्ग के।।६।।
यत्पुरुषेण हविषा मधुपर्कं ततश्चरेत्।
ततो विशेषं सूक्तेन स्नानं यज्ञमित्यृचा।।१०।।
श्री रुद्र चमके नैव पञ्चशान्तिरतः परम्।

तस्मादिति ततो वस्त्रं तस्मादौत्तर्यकं तथा।।११।।
तस्मादित्युपवीतं च मूलेनाभरणानिच।
तत्पुरुषं इति गन्धं ब्रह्मा यज्ञेति पुष्पकम्।।१२।।
चन्द्रमा मनसो धूपं नाभ्यासीच्च दीपकम्।
सप्तास्या सन्निति ऋचा नैवेद्यमखिलाम्बितम्।।१३।।
अहमस्मि इति सूक्तेन स्पृशञ्जप्त्वा ततः परम्।
परिषेचन मुख्यानिकृत्वा पुष्पेन संस्पृशन्।।१४।।
निवेदयेत्ततः पश्चात् मधुवात ऋते ऋचम्।
धूरसि इति ततो धूपं श्रिये जातस्यु दीपकम्।।१५।।
यज्ञेनेति च ताम्बूलं त्र्यम्बकेन प्रसूनकम्।
सद्योजातेन छत्रन्तु वामदेवेति चामरम्।।१६।।
त्वमापो वषडितिच शंख तीर्थ निवेदनम्।
व्यजनञ्च त्वघोरेभ्यो नीराजनं तदित्यथा।।१७।।
सर्वं समाचरेदेवं ईशानइति तर्पणाम्।
नमस्कृत्वा ततस्तुत्वा त्रिधा स्वाद्यैरभिषेचनम्।।१८।।
यथेष्टं प्राथ्यं देवेशं स्वात्मन्युद्वास्य भैरवम्।
चिरं ध्यात्वा ततो मन्त्री सोऽहंसोऽहं मिति स्मरन्।।१९।।
गुरौः समीपमागत्य गन्धापुष्पाक्षतादिभिः।
अभ्यर्च्य तत्पद द्वन्दं प्रक्षाल्य शुभवारिणा।।२०।।
तत् कं चरण सूक्तेन प्रोक्षयेच्च स्वमूर्द्धनि।
ततस्तत्तीर्थमादाय स्मरन्मन्त्रं त्रिधा पिबेत्।।२१।।
श्री सूक्तं घृत सूक्तं च भूसूक्तं पुरुष सूक्तकम्।

ब्रह्म सूक्तं विष्णु सूक्तं पञ्चरौद्रमतः परम्।।२२।।
अविद्या मूल नाशाय जन्म कर्म निवृत्तये।
ज्ञान सौभाग्य सिद्ध्यर्थं गुरुपादोदकं शुभम्।।२३।।
ततो गन्ध प्रसूनाद्यैश्चिरं सम्पूज्य देशिकम्।
यथा सस्यौदनेनैव सत्कार सहितेन च।।२४।।
सम्पूज्य परया भक्तया स्वयं मुञ्जत्ततः परम्
इति आकाश भैरव कल्पे उत्साहाभिषेको नाम चतुर्थोऽध्यायः।

**श्री शिव उवाच-**

अथ यन्त्र प्रयोगं तु कल्याणि शृणुवच्म्यिहम्।
नाना सिद्धिप्रदं श्रेष्ठं नाना कार्यं जयप्रदम्।।१।।
विद्धयैनं तू त्रिमूर्द्धानां परिलिख्याभिवेष्ट्य तत्।
ऊर्ध्व मूलं तन्मध्ये लिखेत्डिं कुरुटीति फट्।।२।।
सम्पूज्य विधिवद्देवमाबाह्याकाश भैरवम्।
तद्दलेष्विष्अमालिख्य स्थापयेत्तदविकोष्ठके।।३।।
तद्वाचक प्रकारेण सिद्ध्यन्त्याश न संशयः।
निग्रहेऽनुग्रहेचैव तथा रोग हरे ज्वरे।।४।।
भूत प्रेत पिशाचेषु वैरिष्वपि च संकटे।
मरीचिं काश्यपं भानुंतारकं वन्हिमारुतौ।।५।।
शंकराशुकरञ्चैव विन्दुञ्च तदनन्तरम्।
चिन्तामणिरितिख्यातं सप्तकूट महामनुम्।।६।।
हेमपत्रे तमालिख्यबाह्ये सम्पूज्य भैरवम्।
जप्त्वा सह कं कुर्यात् रक्षाबन्धं यथाविधिः।।७।।

तेन सर्व समृद्धिं च सर्व कार्य जयं लभेत्।
अयुतेन वशीकारं नियुतेन धनागमम्।।८।।
चत्वारिंशेन वाक्सिद्धिं मोहनञ्चतुरुत्तरात्।
पञ्चाशता जगच्छोभं षष्ठ्या कर्षणमद्भुतम्।।६।।
उच्चाटनन्तु सप्तत्या नवत्यास्तम्भनं भवेत्।
निग्रहं षण्णवत्यातु लक्षेणाखिल दर्शनम्।।१०।।
सप्त लक्षेण देवेशि सर्वाभीष्टं लभेत्ध्रुवम्।
चिंतामणि महामन्त्रं चिन्तितार्थ प्रदायकम्।।११।।
एकाक्षरं महावीर्यं यत्नेनापि जपाम्बिके।
यन्त्ररूपेण मन्त्रञ्च मन्त्ररूपेणयन्त्रकम्।।१२।।
मन्त्रयन्त्राक्षरं तस्मात् क्षिप्रं सिद्धिप्रदं भवेत्।
ब्रह्माणं वसुधां विष्णुं मायां विन्दुं समुद्धरेत्।।१३।।
कामराजमितिख्यातं चतुष्कूटमनुत्तमम्।
महामनुं तु तेनैव विद्धि तं यन्त्ररूपकम्।।१४।।
तस्मिन्मन्त्रो महायन्त्रो देवमाकाशभैरवम्।
आवाहनेन सम्पूज्य जपेदेकाग्रमानसः।।१५।।
चतुः सहस्रं वश्याय भर्तृस्त्रीणामथायुतम्।
सेनापुरयुतं राज्ञः प्रयुतन्तुविधिर्नृणाम्।।१६।।
देवतानां चतुः षष्ठि मुनीनां सप्त सप्ततिः।
हरेरशीतिं नवतिं विष्णोर्लक्ष तु वेधसम्।।१७।।
चतुर्लक्षं महेशस्य सर्वयजन पूर्वकम्।
सर्वेह्यनेनमन्त्रेण प्रीता सिद्धिप्रदा नृणाम्।।१८।।

अनन्तञ्च बृहद्भनुर्नारायणमथापरम्।
महामायां ततो विन्दुं संयोज्याशेषुद्धरेत्।।१६।।
महामायेति विख्याता चतुष्कूटाक्षरात्मिका।
तत्कूटं मन्त्र यन्त्राख्यं सर्वकार्यार्थ सिद्धिदम्।।२०।।
तस्मिन्नावाह्य देवेशमिष्ट्वा पञ्चसहस्रकम्।
मोहनाय जपेन्मन्त्रं जन्तूनामयुतं नृणाम्।।२१।।
स्त्रीणां द्वादश साहस्रं नियुतं रोगशान्तये।
पञ्चविंशति साहस्रं द्रव्य लाभायमानुषः।।२२।।
त्रयस्त्रिंशत्सहस्रं तु पुत्रलाभाययोषिताम्।
सप्तत्रिंशत्सहस्रं तु महा वैरस्य शान्तये।।२३।।
षट्चत्वारिंशत्सहस्रं तु सर्वाकर्षण सिद्धये।
अष्टाशीति सहस्रं तु देवताकर्ष सिद्धये।।२४।।
सप्तनवति साहस्रं सर्व सौभाग्य सिद्धये।
सर्वस्तम्भाय लक्षं तु मारणाय द्विलक्षकम्।।२५।।
चतुर्लक्षं प्रसादाय पञ्चलक्षं विशेषतः।
इन्द्रत्वं दशलक्षेण त्रिंशल्लक्षेण तत्वकम्।।२६।।
षष्ठि लक्षेण विष्णुत्वं रुद्रत्वं शत लक्षतः।
चतुः शतेन लक्षेण महामाया त्वमम्बिके।।२७।।
रुद्रं वैश्वानरं विष्णुं मायां विन्दुमतः परम्।
उद्धरेदखिलं योज्य चतुष्कूटं परात्परम्।।२८।।
लक्षं बीजमिति ख्यातं सर्वसंपत्समृद्धिदम्।
महामायावदखिलं विशेषाद्राज्यसिद्धिदम्।।२६।।

अश्विनमिन्द्रमुद्धृत्य महामायाञ्चबिन्दुकम्।
द्रावणीयमितिख्यातं त्रिकूटं द्रावकारणम्।।३०।।
एतन्मन्त्रमये यन्त्रे विधिवत्पूज्य पूर्ववत्।
लक्षत्रयं जपं कुर्याददखिलं कामराजवत्।।३१।।
ईशनं पावकं विष्णुं नारायणमतः परम्।
विन्दुद्वयं च संयोज्य उद्धरेद्भास्करद्वयम्।।३२।।
चतुष्कूटं महामन्त्रां सर्वव्याधिहरं परम्।
चिन्तामणिवदखिलं द्विलक्षात्कुष्ठ नाशनम्।।३३।।
यक्ष्माहरं त्रिलक्षात्तु सर्वलक्ष चतुष्टयात्।
इति आकाश भैरव कल्पेमन्त्रायन्त्रा क्रमो नाम पञ्चमोऽध्यायः।।

**श्री शिव उवाच-**

चित्रमालां प्रवक्ष्यामि शीघ्र सिद्धि प्रदायिनीम्।
सर्व सौभाग्यदां कुर्यात् चतुर्वर्ग फलप्रदाम्।।१।।
आकाश भैरवस्यास्य मन्त्रस्यानन्दभैरवः।
ऋषिश्छन्दस्तु गायत्री देवताकाश भैरवः।।२।।
ह्रींकारों बीजमित्युक्तं हुंकारः शक्तिरुच्यते।
सर्वाभीष्टार्थ सिद्ध्यर्थें विनियोगस्तु मात्रया।।३।।
कराङ्गन्यास जालानि क्रमात्कृत्वा यथाभवेत्।
सहस्रं पाणिवद्वक्त्रं सह त्रय लोचनम्।।४।।
सर्वाभीष्टप्रदं दिव्यं ध्यायेदाकाश भैरवम्।
ॐ नमो भगवते आकाश भैरवाय निखिल लोक प्रियाय

प्रणतजन परिताप मोचनाय सकलभूत निवारणाय सर्वाभीष्ट प्रदाय नित्याय सच्चिदानन्द विग्रहाय सहस्रबाहवे सहस्रत्रिलोचनाय सहस्रमुखाय सहस्रचरणाय करालाय अखिलरिपु संहार कारणाय अनेक कोटि ब्रह्म कपाल मालालंकृताय नर रुधिर मांस भक्षणाय महाबल पराक्रमाय महदन्तरायविमोचनाय परमन्त्रतन्त्र –विद्याच्छेदनाय प्रसन्नवदनाम्बुजाय एहि एहि आगच्छ ममा भीष्टकमाकर्षय आकर्षय आवेशय२ मोहय२ भ्रामय२ द्रावय२ पातय२ सिद्धय२ बन्धय२ भाषय२ क्षोभय२ भूतप्रेत पिशाचान् मर्दय२ कूर्टय२ पाटय२ मोटय२ शुम्भय२ कम्पय२ ताडय२ मोटय२ भेदय२ छादय२ चण्डवेगातिवेगाय सततगम्भीरजृम्भणाय संकर्षय२ संक्रामय२ प्रवेशय२ स्तोभय२ स्तम्भय२ तोदय२ खेदय२ तर्जय२ गर्जय२ नोदय२ रोदय२ घातय२ वेधय२ सकल रिपून् छिन्दय२ भिन्दय२ अन्धय२ रुन्धय२ नन्दय२ वन्दय२ श्रीं ह्रीं क्लीं कल्याण कारणाय अनवरतानन्द महाभोग प्रियाय देवदत्तमानय आनय दूनय२ केलय२ मेलय२ प्रपन्नवत्सलाय प्रतिवदन प्रतिवदन तपन दहनामृत किरणाय सहस्रकोटि वेताल परिवृताय मम रिपून् उच्चाटय२ वेपय२ तापय२ सेचय२ मोचय२ लोटय२ स्फोटय२ ग्रह ग्रह ग्रह ग्रह अनन्त वासुकितक्षक कर्कोटक पद्म महापद्म शंख महानाग भूषणाय स्थावर जंगमानां विषं नाशय२ त्रासय२ भस्मीकुरु२ भक्तजन वल्लभाय सर्गस्थिति संहारकारणाय कथय२

सर्वशत्रून् द्रावय२ विद्वेषय२ विद्वेषय२ उत्साहय२ उत्पातय उत्पातय वाधय२ साधय२ दह२ पच२ शोषय२ पेषय२ दूरय२ मारय२ भक्षय२ समस्तभूतं शिक्षय२ श्रीं ह्रीं क्लीं क्ष् म् र् यूं अनवरतताण्डवाय आपदुद्धारणाय साधु जनं सन्तोषय२ भूषय२ पालयद्य शीलय२ कामक्रोध लोभमद मात्सर्यं शमय२ दमय२ त्रासय२ क्षिति जल दहन मारुति गगन तरणि सोमात्मक शरीराय शमदमोपररितितिक्षा समाधान श्रद्धान् दापय२ प्रापय२ विघ्न विच्छेदं कुरु२ रक्ष२ क्ष् म् र् यूं क्लीं ह्रीं श्रीं ब्रह्मणे स्वाहा।

इति गोप्यं महामन्त्र परमाकाश भैरवम्।
यस्य स्मरण मात्रेण नमन्त्यखिल देवताः।।
शतवारमिमं मन्त्रां जपेत्सर्वार्थ सिद्धये।
त्रिवारं कार्य सिद्ध्यर्थं जपेदेकाग्रमानसः।।
प्रथमन्तु त्रिधा मन्त्र्य गुरु श्रेष्ठं हृदि स्मरेत्।
तत्कार्य सिद्धये शक्तो जुहुयात् स्वात्म पावके।।

इत्याकाश भैरव कल्पेचित्रमालामन्त्रं नाम पष्ठोऽध्यायः।।

**श्री शिव उवाच-**

श्रृणु देवि क्रिया भेदं शीघ्र सिद्धि प्रदायकम्।
नाना कर्म समोपेतं साधकानां विवेकिनाम्।।१।।
रक्ताम्बर समालेप भूषणं रक्त लोचनम्।
रक्तवर्णं लसद्ग्रीवं रक्त कुण्डल संयुतम्।।२।।
रक्त केयूर मुकुटं लसच्चन्द्रार्द्ध शेखरम्।

प्रसन्नममृतोन्मत्तं प्रणताभीष्टि सिद्धिदम्।।३।।
इक्षुकोदण्ड पुष्पेषुपुण्ड्रचापसहस्रकम्।
कार्मुकेन शरैर्दिव्यैः पूरिताशावकाशकम्।।४।।
चिरं ध्यात्वा जपेद्देवं जगद् वश्यायसाधकः।
काममादौ ततो मन्त्रं पुनः कामं सपल्लवम्।।५।।
त्रिसहस्रं ततो मौनी देशिकाज्ञामनुस्मरन्।
तस्य सर्ववशीकारं साध्ययुक्तं विशेषतः।।६।।
आकर्षणे तदा ध्यानं पाशबाहु सहस्रकम्।
तत्पाश पूरिताशेष आशाकुम्भोक्षिताकुलम्।।७।।
ध्यात्वा जपेत्तथा मन्त्रं साधकस्थिर मानसः।
आकार च ततो मन्त्रं पुनराञ्च सपल्लवम्।।८।।
आकार्षयेद्विशेषज्ञः ससाध्यं तस्य सिद्धये।।
राजचोरारिनारीणां देवतानां विशेषतः।।९।।
चेतना चेतनानाञ्चभूतप्रेतगणादिनाम्
अस्य शीघ्रं लभेद्देवि सर्वाकर्षणमद्भुतम्।।१०।।
सर्व लोक वशीकारं सर्वकार्य जयन्ततः।
ते सर्वें तद्वशं प्राप्य दास्यभूताभवन्ति हि।।११।।
इति आकाश भैरव कल्पे वश्याकर्षण प्रयोगोनाम सप्तमोऽध्यायः।

**श्री शिव उवाच-**

शृणुदेवि क्रिया भेदं शीघ्र सिद्धि प्रदायकम।

नाना कर्म समोपेतं साधकानां विवेकिनाम्।।

## अथाष्टमोऽध्यायः

**श्री शिव उवाच-**

वक्ष्यामि शृणु देवेशि स्तम्भविद्वेषकर्मणि।
जङ्ग मस्थावराणां च क्षिप्राश्चर्य निदर्शनम्।।१।।
महाकालं घनश्यामं वक्रदन्तं मुखाम्बुजम्।
कपिलाख्यं बृहत्स्कन्धं करालं कृष्णवाससम्।।२।।
गङ्गास्थित भालं चन्द्रार्ध शेखरं विषमेक्षणम्।
महाकायं महावेग व्यालयज्ञोपवीतिनम्।।३।।
वामहस्ते रिपोरास्यन्ताऽयन्तं प्रदक्षिणम्।
सत्वरं दक्षहस्ताग्रै र्ताडयन्तमुरस्थले।।४।।
एवं ध्यात्वा जपेन्मत्री चिरमाकाशभैरवम्।
पूर्व संख्या महामन्त्रमर्धरात्रौ यथाविधि।।५।।
चराचर गतिस्वान्तलोचनास्यकरां घ्रिणाम्।
गुह्यलिङ्ग श्रुतिस्तम्भं सम्भवन्ति न संशयः।।६।।
वासवं मूलमन्त्रञ्च पुनरिन्द्रं सपल्लवम्।
रुद्रं मन्त्रं पुना रुद्रं पल्लवद्वेषसिद्धये।।७।।
विद्वेषणं प्रभावेतु स्वप्रभावपराक्रमे।
वैरिणां मन्युमन्योन्य मेधयन्तमहैतुकम्।।८।।
तयोरैश्वर्य ज्वालानां क्षयं कुर्वन्तमाशुवै।
तयोर्दश दिनात्पश्चात् महद् युद्धं भवेद्ध्रुवम्।।९।।

**इति आकश भैरवकल्पे स्तम्भ विद्वेषो नामाष्टमोऽध्यायः**

**श्री शिव उवाच-**

निग्रहोच्चाटने वक्ष्ये नितरां परबन्धिनाम्।
महाक्रूरतरं गुह्यं शृणु सर्व वरानने।।१।।
करालमुग्रदृक्दंष्ट्रं कालानलसमप्रभम्।
अनेक कोटिब्रह्मास्थि मुण्ड माला विभूषितम्।।२।।
घोराट्टहास ब्रह्माण्ड गोलकं कृत्तिवाससम्।
सह मुख हस्तांघ्रिमुकुटं नाग भूषितम्।।३।।
सहस्र कोटि वेताल गण संघ समावृतम्।
नाना विध शिलाभेदैर्वर्षयन्तं स्वकिङ्करैः।।४।।
महावीर्यमतिक्रुद्धमतिभीमपराक्रमम्।
भक्षयन्तं निजैर्भूतैः परबन्धि कुलं वहु।।५।।
चिरं ध्यात्वैवमाकाश भैरवं संस्मरन् गुरुम्।
दशरात्रं जपन्मन्त्रो दशपञ्चशत मनुम्।।६।।
उच्चाटनं च संहारं दशाहात्पुरतो लभेत्।
वायु बीजं च मन्त्रं च पुनर्वायुं स पल्लवम्।।७।।
हुङ्कारञ्च ततो मन्त्रं पुनर्हुंकार पल्लवम्।
इति प्रयोग द्वितयं कुर्याद्यत्नेन चाम्बिके।।८।।
सहसा लभते सिद्धिं संशयो नास्ति चाम्बिके।।९।।

**इत्याकाश भैरवकल्पे उच्चाटन निग्रहो शोभनं नाम नवमोऽध्यायः**

**श्री शिव उवाच-**

मोक्षं सरस्वतीं वक्ष्ये सर्वेषामपि यत्नतः।
समाहितेन मनसा शृणु कल्याणि शोभने।।१।।
स्फटिकाभं महादेवं प्रसन्न वदनाम्बुजम्।
अमृतांशुकलाचूडं अग्निसूर्येन्दुलोचनम्।।२।।
व्याघ्र चर्माम्बरधरं व्यालयज्ञोपवीतिमम्।
वैडूर्य हार शोभाढयं मन्दस्मितमनोहरम्।।३।।
मुक्ताविद्रुमरत्नाङ्क बद्धाङ्कदविभूषणम्।
स्वर्णनूपुरपादाब्जं श्वेतकुण्डलमण्डितम्।।४।।
वीणांव्याख्यानमुद्राञ्च पुस्तकं स्फटिकस्त्रजम्।
पद्महस्तं गदापद्मं सुधाकुम्भं कराम्बुजे।।५।।
विभूषणामल ब्रह्मज्ञानमुद्रास्वरूपिणम्।
चन्द्र मण्डल मध्यस्थं सच्चिदानन्दमव्ययम्।।६।।
ध्यात्वा ततोजपेन्मन्त्रामयुतं तत्ववित्तमः।
विजृम्भते महावाणी वियद् गंगा प्रवाहवत्।।७।।
तद्वाणीं दूरतः श्रुत्वा तस्य मोक्षश्च जायते।
मुक्तिः भुक्तिश्च भक्तानां सर्वार्थाश्चैव लभ्यते।।८।।
भूतले पूज्यते सर्वैर्भुक्तवा भोगान्यथेप्सितान्।
अनैनैव शरीरेण जीवन्मुक्तो भवेच्छिवे।।६।।
भाषा मन्त्र पुनर्भाषां स्वाहान्ते मन्त्रमुच्यते।
चिन्तामणिंततो मन्त्रं पुनश्चिन्तामणिं नमः।।१०।।
मोक्षायप्रणवाद्यन्तं धारणाय विशेषतः।

श्रियै श्रिया सम्पुटितं घृणिरारोग्य वर्द्धकः।।११।।
लृं लृं रोग विनाशाय विषनाशायठं युतम्।
इति गुह्यतमं शास्त्रं लघु सिद्धिप्रदायकम्।।१२।।
यत्ने नापि जपेद्देपि सर्व कामार्थ सिद्धये।

**इति आकाश भैरव कल्पे भोग मोक्ष प्रयोगं नाम दशमोऽध्यायः।**

## अथ यन्त्रम्

## आशु गारुड यन्त्र कल्पः

षट्कोणान्तरिताग्नि वायुलिखित। मायाञ्च सप्तार्णकम्।
कोणे दिक्षु च साध्यवन्हि सहितं सर्वान् ग्रहादीन्हरेत्।।१।।

**अथवा**

षट्कोणान्तरिताग्नि वायु मनुना संयुक्त मध्याक्षरम्।
द्वादश कोणेषु इति पाठ विशेषः।।
एतच्चक्रं तु सम्पूज्य जपेदष्टोत्तरं शतम्।
प्रयोग काले सम्प्राप्ते ध्यात्वा भूतं विलोकयेत्।।२।।
तस्यालोकन मात्रेण क्षिप्रं सिद्धिर्भविष्यति।

तस्यार्थः – प्रथमं षट्कोणं विलिख्य तन्मध्ये रं इति अग्नि बीजं यं इति वायु बीजं च ह्रीं इति माया बीजं च अन्तर विलिख्य ॐ विष्णु वाहनायेति वेष्टयेत् पुनः ह्रीं इति शक्ति बीजेन वेष्टयेत्। अथवा रं इति अग्नि वीजं विलिख्य तदन्तर वायु बीजं तद्बहिः ॐ पक्षिराजाय विष्णु

वाहनायेति वेष्टयेत्।

पुनश्च षट्कोणेषु साध्य सहितं वह्नि बीजं विलिख्य तत्कपोलेषु ॐ क्षूं ॐ इति चिन्तामणि बीजं विलिखेत् आमिति पाशाक्षरेण वेष्टयेत् पुनः पुनः ह्रीं इति शक्ति बीजेन् वेष्टयेत्।

पुनः क्रोमिति अंकुश बीजेन वेष्टयेत् ततः तारेण वेष्टयेत् कुण्डलीं कृत्वा अन्तः प्रविष्ट रूपमिति यन्त्रान्तरम्।

द्विरष्टकोष्ठमालिख्य प्रत्येकं दशवर्णकम्।
त्रिशिखं चतुरेखाग्रे तदरेखाग्रनामकम्।।
भस्म पांशुना संलिख्य प्राणानाबाह्यतत्रतु।
शत्रभोस्तु दिङ्मुखोभूत्वा जपेदष्टोत्तरं शतम्।।
तद् भस्म दर्शनादेव रिपुर्याम्यं च गच्छति।

**अस्यार्थ**- षोडश कोष्ठानि विलिख्य प्रतिकोष्ठं मूल मन्त्रं एकादश वर्णतो विभज्य विलिखेत्।

रेखाग्रेषु शूलं विलिख्य शूलाग्रेषु साध्य नाम विलिखेत्।

यन्त्रान्तरम्। शिखि ऋतु वसु कोणं चाष्ट पत्रं वसुं च ऋतुशत शशि चाग्निर्भास्करं व्योमकंच। सकल मनल वायु स्तद्वहिः साध्य शक्तिः।। धृत मृत सुत मन्त्राः गर्भ दं ताक्ष्र्य मेतत्।

**अस्यार्थ**- प्रथम त्रिकोणं तद् वहिः षट्कोणं तद् वहिरष्ट दलं तद्वहिश्चतुरस्रं त्रिकोणे इन्द्र बीजं लं इति लिखेत षट् कोणेषु वं इति अग्नि बीजं विलिख्य अष्ट

दलेषु ह्रीं मिति विलिखेत्। भूपुर कोणेषु चतुर–स्त्रकेषु हमिति आकाश बीजं विलिखेत्। पूनस्त्रिकोणेषु भू पुरेषु अग्नि बीजं वायु बीजं सर्वत्र विलिखेत् अस्ति अन्योपदेः प्रथम मनिलं विलिख्य तदन्तर वायु बीजं विलिख्य तदन्तः तत्राक्षराणि भुवनेशीमिति विलिखेत् तद्वहिः साध्यनाम वर्णैर्वेष्टयेत् यन्त्रान्तरम्।

षट्कोणं विलिखेत्पूर्वं तदग्रे शूलमालिखेत्।
तन्मध्ये वर्तुलं च तन्मध्ये वायु बीजकम्।।
षट्कोणे तु लिखे द्वह्नि शूलाग्रेष्वथ नामकम्।
अभिमन्त्र्य चतुर्वारं तत्तोये नाभिषेचयेत्।।
तोय दर्शनमात्रेण धावति ध्रुवमम्बिके।

यन्त्रान्तरम्। अर्द्ध चन्द्राकृतिं कृत्वा मध्येवारुणमालिखेत्
कोण द्वये तु जुँ सं च श्रं कारेण तु वेष्टयेत्।
एतद् यन्त्रं महावीर्यं दर्शनात्पावनं परम्।।
यन्त्र कीलाल मन्त्राग्नि प्रव्रजेन्नात्र संशयः।
अस्य यन्त्रस्य पूजा वैष्णव पीठे समावाह्य।।
अङ्गैः प्रथमावृत्तिः। ॐ सुं सुपर्णाय नमः।
ॐ गं गरुडाय नमः। ॐ विं वैनतेयाय नमः।
ॐ तां तार्क्ष्याय नमः। ॐ लं लक्ष्म्यै नमः।
ॐ किं कीर्त्यै नमः। ॐ जं जयायै नमः।

ॐ मं मायायै नमः । इति दिग्दलेषु द्वितीयावृत्तिः।
ॐ कुं कुमुदाक्षायै नमः। ॐ पुं पुण्डरीकाक्षायै नमः।
ॐ कुं कुमुदाक्षायै नमः। ॐ वां वामदेवाय नमः।
ॐ सं सनकाय नमः। ॐ सं सनत्कुमाराय नमः।
ॐ शं शंकुकर्णाय नमः। ॐ सं सर्वनेत्राय नमः।
ॐ सुं सुमुखायै नमः। ॐ सुं सुप्रतिष्ठायै नमः।
इत्येतैर्दशभिस्तृतीयावृत्तिः। इन्द्रादिभिश्चतुर्थावृत्तिः।
हस्तौतु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठका। तर्जन्यौ प्रश्रितेश्लिष्टे श्लिष्टौ अंगुष्ठकौ तथा। मध्यमानामिके द्वेतु द्वौ पक्षौ इह चिन्तयेत्। एषा गारूडमुद्रास्यादशेष फलदा भवेत्।

साधु साधु महाप्रज्ञेयत्तु पृच्छसिशाङ्करि।
आशु ताक्ष्याख्य कवचं महामन्त्रं वदाम्यहम्।।१।।
भोगमोक्षदमज्ञान तिमिरान्धस्य चाञ्जनम्।
भुक्तिमुक्तिप्रदं श्रेष्ठं स्वस्तिदं सर्वसिद्धिदम्।।२।।
ऋषिन्यासं महाध्यानं शंकरादि च मन्त्रवित्।
समाहितेन मनसा जपेन्मन्त्रोत्तमोत्तमम्।।३।।
ताक्ष्यों मे पुरतः पातु गरुडः पातु पृष्ठतः।
सोमपा पातु मे हर्म्येवामके दक्षिणे तथा।।४।।
शिखायां गरुडः पातुशिरः पातु अहिरन्तकः।
नासिकांग्र विभुः पातु नेत्रयोर्विनतासुतः।।५।।
तेजिष्ठः श्रोत्रयोः पातु मुखं संताप मोचनः।

ओष्ठयोः पातु नागारिः पातु तालु प्रभाकरः ।।६।।
जिह्वां खगेश्वरःपातु दन्तान्पात्वरुणानुजः ।
शीरुक श्चिबुकं पातु कण्ठ पात्व सुरान्तकः ।।७।।
सुमुखो मे मुखं पातु अनामिक्यां त्रिलोचनः ।
कनिष्ठिकां महोत्साहः स्वात्मज्ञः पातुदोस्तलम् ।।८।।
दोर्मूले विष्णुवाहश्च हस्तयोः कृत विक्रमः ।
करयोः पातु रक्ताक्षः कराग्रे तु महाबलः ।।९।।
करपृष्ठं कलातीतो नरवान्पातु नरवायुधः ।
कटिं पातु महावीरो नाभिं पातु सुरेश्वरः ।।१०।।
उरस्थलं कलासारः पातु मे जठरं परः ।
परात्परः कटिं पातु पातु नाभिं हरिप्रियः ।।११।।
जितेन्द्रियो गुदं पातु मेढ्रं बल विवर्द्धनः ।।१२।।
कूपाराणिच मे पातु मातृबन्धविमोचनः ।
स्वाहाकारः समेपातु रुधिरं वेदपारगः ।।१३।।
ऊरूपातु पतिः पातु जानुनी भक्त वत्सलः ।
जंघौ पातु वषट्कारः सर्वलोक वशंकरः ।।१४।।
गुल्फौ निरशिलः पातु पाद पृष्ठं मुरारिधृत् ।
धीरः पादतलं पातु चाङ्गुली पर मन्त्रजित् ।।१५।।
शोभनः पातु मे मज्जां भुक्तिमुक्ति वरप्रदः ।
मूलाधारं खगः पातु स्वाधिष्ठानमथात्मवित् ।।१६।।
मणिपूरक मत्युग्रः कलधी पात्वनाहतम् ।
विशुद्धिं पदमः पातु आज्ञामाखण्डलः प्रियः ।।१७।।

द्रुत ताक्ष्यों महाभीमो ब्रह्मरन्ध्रं प्रपातु मे।
ऐन्द्रीञ्च फणिभुग्पातु चाग्नेयीं कलि दोषभित।।१८।।
याम्यं लघुपतिः पातु नैर्ऋतंसुर वैरिजित्।
पश्चिमं पातु लोकेशः धौतोरुः पातु मारुतम्।।१६।।
गुलिकाशी तु कौवेरं पात्वैशान्यमितौजसः।
ऊर्ध्वं पातु सदा नादः गीतनृत्त सदा प्रियः।।२०।।
गरुडः पातु पातालं गरुत्वान् च तनुं ततः।
धनधान्यादिकं सर्व ताक्ष्यों राक्षस वैरिधृत्।।२१।।
भीषणः कन्यकां पातु भार्यामुल्काग्निकेक्षणः।
त्वरितः पातु चात्मानं धर्मकर्म कृतोत्तमः।।२२।।
पुत्रानायुष्करः पातु वंशं रिपु निषूदनः।
संग्रामे विजयः पातु मार्गे शत्रु विमर्दनः।।२३।।
सिद्धिं पातु महादेवो भगवान भुजगाशनः।
सततं पातु मां श्रेष्ठः स्वस्तिदः साधकात्मवान्।।२४।।
जाग्रत् स्वप्न सुषुप्तौ च कुंकुमारुणवक्षसः।
सर्वा मे स्वापदः पातु स्तुतिमन्त्र प्रसिद्धिषु।।२५।।
इदं तु ताक्ष्य कवचं पुरुषार्थ प्रदं परम्।
स्वस्तिदं पुत्रदं सर्व रक्षाकरमनुत्तमम्।।२६।।
युद्धे वारि भये चैव राज चोर समागमे।
महाभूतादि संघहे प्रजपेत्कवचं शिवे।।२७।।
स्मरणादेव नश्यन्ति प्रचण्डानिलतूलवत्।
आशु ताक्ष्याख्य कवचं परमं पुण्य वर्द्धनम्।।२८।।

पावनं परमायुष्यं पाप पाश प्रमोचनम्।
महागुह्यं महामन्त्रं महामोहन तर्जनम्।।२६।।
सर्वदेवमयं मन्त्रां सर्वायुधाकरं परम्।
सर्व मृत्यु प्रशमनं सर्व सौभाग्य वर्द्धनम्।।३०।।
पावनं परमायुष्यं पाप राशि प्रधूननम्।
दिगीश्वरैः स्वयं भक्तया तथाजाद्यमरैः परैः।।३१।।
गुह्यकैः सिद्धगन्धर्वैः स्तूयमानं महोज्वलम्।
त्रिकालं जपेत्ध्यान पूर्वकं कवचं शिवे।।३२।।
सहस्रेणैव सिद्धिः स्यात् वाग्विभूतिर्विशेषतः।
मुनीनामपि संपूज्यः कवचेनावृतः पुमान्।।३३।।
चतुर्दशेषु कोष्ठेषु विंचरेद्गरुडो यथा।
अनेनैव तु कालेन भूतले वहु सम्पदम्।।३४।।
चिरं प्राप्यतु देहान्ते विष्णु सायुज्यमाप्नुयात्।

**इति आशु गारुड कल्पं सम्पूर्णम्।**

## यन्त्रम्

शिखि ऋतु वसुकोणं चाष्टपत्रां भुवं च।
कृत शत सलिलाग्निर्भास्करं व्योमकञ्च।।
सकलमनिलयुक्तं तद्वहिः साध्य शक्तिः।
घृतमृत सुतवन्ध्या गर्भदं तार्क्ष्यमेतत्।।
इदं चक्रं मयाख्यातं सर्व चक्रो त्तमोत्तमम्।
महागुह्यं महाभीमं महा सिद्धि करं परम्।।
शुक्रवासर मारभ्य पूजां दत्त्वा दिन त्रयम्।

अनेन कवचेनैव जपेदष्टोत्तरं शतम्।।
तज्जले नाभिषिञ्चाथ होमं हुत्वाथ रूक्षकैः।
निमज्य तज्जले देवि बध्नीयात्पुत्र कामिनाम्।।

**इति आकश भैरव कल्पे प्रत्यक्ष सिद्धि प्रदे उमा महेश्वर सवांदे शंकरेण विरचिते आशु गारुडं नाम चतुर्दशोऽध्यायः।**

## आकाश भैरव कल्पः

भगवन् देव देवेश सर्व शास्त्रार्थ वादक।
ब्रूहि मे सर्व पापघ्नं किं मन्त्रं चेष्टदायकम्।
तेन पुण्य प्रभावेन शत्रूणां प्राण नाशनम्।
सर्व पापप्रशमनं धन्यमायुष्य वर्द्धनम्।।
ब्रूहि मे कृपया शम्भो त्वत्पादकमले नमः।
शृणु वक्ष्यामि देवेशि सर्व पाप हरं परम्।।
सर्व शत्रुहरं दिव्यं हृदयं शरभस्य च।
शालुवं सर्व रोगघ्नं हृदयं परमाद्भुतम्।।
गुह्याद्गुह्यतमं गुह्यं गोपनीयं स्वयोनिवत्।
पुरा नारायणः श्रीमान् क्षीराब्धौ मंथने कृते।।
तस्य प्रारम्भ समये हृदयं शरभस्य च।
प्रातः काले पठेन्नित्यं विंशदावर्तिकं मुदा।।
एवं मासत्रायं कृत्वा प्रादुर्भवति शालुवः।
ततश्च दण्डबद्भूमिं प्रणम्य च पुनः पुनः।।

तमुत्थाप्य महातेजा मूर्ध्नि च चाघ्राय शालुवः।
सन्तुष्टः प्रत्युवाचैनं निर्विघ्नेनामृतं भवेत।।
इत्युक्त्वा प्रददौ तस्मिन् रक्षणं सर्व विश्वकम्।
ततो नारायणो देवः प्रणनामाब्रवीद्वचः।।
देव देव महादेव पक्षिराज महाप्रभो।
हृदयं तब देवेश तस्य को वा ऋषिर्वद।।
छन्दः किं बीजशक्ति च पल्लवं वद मे प्रभो।
श्रृणु वक्ष्याम्यहं विष्णु हृदयं मम शालुवम्।।
सर्व पापक्षयं पुण्यं सर्व शत्रु विनाशनम्।
सर्वक्लेशविनाशञ्च सर्वसन्तोषकारणम्।।
सर्व सौभाग्यदं शान्तं सर्व मंगल वर्द्धनम्।
ऋषिः कालाग्नि रुद्रस्तु जगतो छन्द ईरितम्।।
खां बीजं तु महादेव शक्तिः स्वाहेत्युदीरितम्।
कीलकं नम इत्याहुः इष्टार्थे विनियोगकम्।।
मूलन्यासादिकं कृत्वा ध्यायेच्छरभशालुवम्।
प्रथमं पक्षिराजं च द्वितीयं शरभं तथा।।
तृतीयं शालुवं प्रोक्तं चतुर्थं लोक नायकम्।
पंञ्चम रेणुकानाथं षष्ठं कालाग्नि रुद्रकम्।।
सप्तमं नरसिंहघ्नं अष्टमं विश्व लोचनम्।
श्रीं ह्रीं क्लीं नवमं चैव हुं हुं हुं दशमं तथा।।
क्लीं श्रीं क्लीं एकादशं च द्वादशं सर्व मन्त्रवित्।
त्रयोदशं तु यन्त्रोशं चतुर्दश महाबलम्।।

पञ्चदशं पापनाशं षोडशञ्च करालकम् ।
सप्तदशं महारौद्रं भीममष्टादशं तथा ।।
एकोनविंशं साम्बं च विंशकं शंकरं तथा।
विंशोत्तरेकं सर्वेशं द्वाविंशं पार्वती पतिः ।।
हुं हुं हुं च त्रयोविंशं चतुर्विंशमनन्तकम् ।
पञ्चाविंशं वृषारूढं षड्विंशं विश्वलोचनम् ।।
त्रिलोचनं सप्तविंशं अष्टाविंशं खगेन्द्रकम् ।
पं पं पं नवविंशं च त्रिंशद्भुजग भूषणम् ।।
लं लं लमेक त्रिंशञ्च द्वात्रिंशं पञ्च वक्त्रकम् ।
त्रयस्त्रिंशञ्च नन्दञ्च चतुस्त्रिंशमतः परम् ।।
भं भं भं भं पञ्चत्रिंशं षट्त्रिंशं शत्रुनाशनम् ।
सप्तत्रिंशं स्वयभूञ्च विश्वेशमष्ट त्रिंशकम् ।।
शूलपाणिं नवत्रिंशं चत्वारिंशत्कलाधरम् ।
एक चत्वारिंशत् सं सं सं द्विचत्वारिंश हासकम् ।।
एतं यशस्यमायुष्यं मन्त्रं सर्वार्थ दायदम् ।
अनेक रत्न लम्बानि जटामुकुट धारिणम् ।।
अनेक रत्न संयुक्तं सुवर्णाञ्चित मौलिनम् ।
तक्षकादि महानाग कुण्डलद्वय शोभितम् ।।
कालीं लिखित दुर्गां च पक्षद्वय विराजितम् ।
दशायुधधरं दीप्तं दशबाहुं त्रिलोचनम् ।।
त्रिपञ्चनयनं पञ्चवक्त्रातुण्डधारं प्रभुम् ।
नीलकण्ठामराभोग सर्पहारोपशोभितम् ।।

विशालाक्षं च विश्वेशं विश्वमोहनमव्ययम् ।
त्रिपुरारिं त्रिशूलादिं धारिणं मृग धारिणम् ।।
कराल भृकुटिं भीमं शंख तुल्य कपोलकम् ।।
व्याघ्रचर्माम्बरधरं वाडवाग्नि स्थितोदरम् ।
मृत्यु व्याधिस्थितोरुं च वज्र जानु प्रदेशकम् ।।
पाद पङ्कज युग्मञ्च तीक्ष्ण वज्र नखाग्रकम् ।
रणन्नूपुर मञ्जीर झणत्किंकिंणि कूजितम् ।।
वज्रतुण्डं महादीप्तं कालकालं कृपा निधिम् ।
एवं ध्यात्वा च हृदयं त्रिंशदावृत्तिकं क्रमात् ।।
नित्यं जप्त्वा शालुवेशं हृदयं सर्व कामदम् ।
सर्व पुण्य फलं श्रेष्ठं सर्व शत्रु विनाशनम् ।।
सर्व रोगहरं दिव्यं भजतां पापनाशनम् ।
इहैव सकलान् भोगानन्ते शिव पदं ब्रजेत् ।।
इत्युक्त्वान्ते तदा देवः शरभः पक्षिराजसौ ।
ततो नारायणो ध्यात्वा दृष्टवा रूपञ्च विस्मितः ।।
एतत्ते सुभ्रु कथितं हृदयं शरभस्य च ।
पठतां शृण्वताञ्चैव सर्व मन्त्रादि सिद्धिदम् ।।

इति श्री महा शैव तन्त्रे अति रहस्ये आकाश भैरव कल्पे प्रत्यक्षसिद्धि प्रदे शरभ शालुव पक्षिराज हृदयं नाम

**।।एक पञ्चादशोऽध्यायः।।**

●●●

## अथ शरभार्चन पद्धतिः

श्री गणेशाय नमः

तद्विष्णुपदमानभ्य भुवनेन्दु प्रपूरितम्।
श्रीरामकृष्णः कुर्वेऽहं शरभार्चन पद्धतिम्।।
विष्णोः पदं सद्भवनेन्दु पूजितम्
शक्रं त्रिवृद् यद्धृदयेन भावितम्।
समायकं तं हृदि भावते शिवं
शिवाय नित्यं धिषणा भवाय।।

तत्र श्रीमान साधकेन्द्रो ब्राह्मे मुहूर्त्तें उत्थाय कृतावश्यक क्रियो रात्रि वासस्त्यक्त्वा शिरस्थ सहस्रदल कमल कर्णिकायां वराभयकरं स्वशकत्यालिंगित वामाङ्ग तन्नासपूर्वकं गुरूं स्मृत्वा मानसोपचारैः सम्पूज्य ऐं अमुकानन्द नाथ अमुकी देव्यम्बा श्री पादुका पूजयामि नमः इति दशधा जपित्वा अखण्ड मण्डलाकार मित्यादिना प्रणम्य श्वासानु सारेण भूमौ पादं निधाय स्वामिनी जगदम्बिकामिति कुण्डलिनीं ध्यात्वा यथा शक्ति मूलं जपित्वा गुरु पङ्क्ति नमः स्कृत्य समुद्रमेखले' इति भूमिं प्रार्थ्य दन्तधावनान्तकं कृत्वा तडित्कोटि प्रतीकाशां विष तन्तु तनीयसीं इति कुण्डलिनीं ध्यात्वा अशेष व्यवहाराय शरभेशाष्टकं त्रिवारं मनसा जपेत् अस्य श्री शरभेशाष्टक

मन्त्रस्य कालाग्नि रुद्र ऋषिः जगती छन्दः भगवान् श्री शरभेश्वरो देवता खं बीजं स्वाहा शक्तिः चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगः। कालाग्नि रुद्राय ऋषये नमः शिरसि जगति छन्द से नमः मुखे भगवते श्री शरभेश्वराय देवतायै नमः हृदये खं बीजाय नमः गुह्ये स्वाहा शक्तये नमः पादयोः मन्त्राक्षरैः वक्ष्यमाणदिशा षडङ्गन्यासं विधाय ध्यायेत्।

ज्वलन कुटिल केशं सूर्य चन्द्राग्नि नेत्रम्,
निशितकरनखागैर्धूम्र होमादि देहम्।
शरभमथ मुनीन्दैः स्तूयमानं सिताङ्ग,
प्रणत भय विनाशं भावये पक्षिराजम्।।

इति ध्यात्वा वक्ष्यमाणरीत्या मानसोपचारैराराध्य पठेत्।

ॐ देवाधि देवाय जगन्मयाय शिवायनालीक निभाननाय,।
शर्वाय भीमाय शराधिपाय, नमोऽस्तु तुभ्यं शरभेश्वराय।।१।।
हराय भीमाय हरि प्रियाय भवाय शान्ताय परात्पराय।
मृडाय रुद्राय त्रिलोचनाय नमोऽस्तु तुभ्यं शरभेश्वराय।।२।।
शीतांँशु चूडाय दिगम्बराय, सृष्टि स्थिति ध्वंसन कारणाय।
जटाकलापाय जितेन्द्रियाय नमोऽस्तु तुभ्यं शरभेश्वराय।।३।।
कलंक कण्ठाय भवान्तकाय, कपाल शूलाढ्य कराम्बुजाय।
भुजङ्ग भूषाय पुरान्तकाय नमोऽस्तु तुभ्यं शरभेश्वराय।।४।।
शमादि षट्काय यमान्तकाय यमादि योगाष्टक सिद्धिदाय।
उमाधि नाथाय पुरातनाय नमोऽस्तु तुभ्यं शरभेश्वराय।।५।।

घृणादि पाशाष्टक वर्जिताय, लेखी कृतास्मिन् पथि पुङ्गवाय।
गुणादिहीनाय गुणत्रयाय नमोऽस्तु तुभ्यं शरभेश्वराय।।६।।
कलादि वेदामृत कन्दलाय कल्याण कौतूहल कारणाय।
स्थूलाय सूक्ष्माय सुरूपकाय नमोऽस्तु तुभ्यं शरभेश्वराय।।७।।
पञ्चाननायाखिल भासनाय पञ्चाशदर्णाय पराक्षराय।
पञ्चाक्षरेशाय जगद्धिताय नमोऽस्तु तुभ्यं शरभेश्वराय।।८।।
नील कण्ठाय रुद्राय शिवाय शशि मौलिने।
भवाय भव नाशाय पक्षिराजाय ते नमः।।६।।
परात्पराय घोराय शम्भवे परमात्मने।
शर्वाय निर्मलाङ्गाय शालुवाय नमो नमः।।१०।।
गङ्गाधराय साम्बाय परमानन्द तेजसे।
सर्वेश्वराय शान्ताय शरभाय नमो नमः।।११।।
वरदाय व गङ्गाय वामदेवाय शूलिने।
गिरिशाय गिरीशाय गिरिजा पतये नमः।।१२।।
कनक जठर कोद्यद्रक्त पानोन्मेदन, प्रथित निखिल
पीडा नारसिंहेन जाता। शरभ हर शिवेश त्राहि नः
सर्व पापादनिशमिह कृपालु शालुवेश प्रभोत्वम्।।१३।।
शरभेश शर्वाधिक शान्तमूर्ते कृतापराधानमरानपायान्।
विनीत विश्व द्विविधायतेन नमोऽस्तु तुभ्यं शरभेश्वराय।।१४।।
दंष्ट्राननोग्रः शरभः सपक्षश्चतुर्भुजश्चाष्ट भुजश्चतुर्विधः।
कोटीर गङ्गेन्दु धरोनृसिंह क्षौभायहृत्यास्मद्रिपुहास्तु शम्भुः।।१५।।
हुंकारी शरभेश्वरोऽष्ट चरणः पक्षी चतुर्बाहुकः पादाकृष्ट

नृसिंह विग्रहधरः कालाग्नि कोटि द्युतिः। विश्वक्षोभहरः सहेतिर्रानशं ब्रह्मेन्द्र मुख्यैस्तुतो गङ्गा चन्द्रधरः पुरत्रय हरः सद्यो रिपुघ्नोस्तुमः।।१६।। मृगाङ्क लाङ्कल सुचञ्चुपक्षो दंष्ट्राभिरष्टांघ्रि भुजा सहस्रः त्रिनेत्र गङ्गेन्दु धरः प्रभाढ्यः पायाद–पायाच्छरभेश्वरोनः।।१७।। नृसिंहमत्युग्रमदिव्यतेजः प्रकाशिनं दानवभङ्ग दक्षम्। प्रशान्तमन्त विदधाति योऽमुँ सोऽव्यादपायाच्छरभेश्वरोनः।।१८।। योऽभूत् सहस्रांशु, शतप्रकाशः सपक्षिसिंहाकृतिरष्टपादाः नृसिंह संक्षोभ शमात्तरूपः पायादपायाच्छरभेश्वरोनः।।१६। त्वां मन्युमन्तं प्रवदन्ति वेदाः त्वां शान्तिमन्तं मुनयो गृणन्ति दृष्टे नृसिंहे जगदीश्वरेते सर्वापराधं शरभः क्षमस्व।।२०।। करचरणकृतं वा कायजं कर्मजं वा श्रवण नयनजं वा मानसं वापराधम्। विहितमविहितं वा सर्वमेतत् क्षमस्व शिव शिव करुणाब्धे श्री महादेव शम्भो।।२१।। रुद्रः शङ्कर ईश्वरः पुरहरः स्थाणुः कपर्दी शिवो वागीशो वृषभध्वज स्मरं हरो भक्ति प्रिय स्त्र्यम्बकः। भूतेशो जगदीशश्वरश्चशरभो मृत्युञ्जय श्री पति रस्मान्कालगलोऽवतात् पशुपतिः शम्भुः पिनाकी हरः।।२२।। योऽस्मान्पाहि भगवन्नः प्रसीद च पुनः पुनः। इति स्तुतो महोदवः प्रसन्नो भक्त वत्सलः।।२३।। यतो नृसिंहं हरसे हर इत्युच्यसे बुधैः।

यतो विभर्ति सकलं विभज्यतनुमष्टधा।।२४।।
सुरान्नाह्लादयामास वरदानैरभीप्सितैः।
प्रसन्नोऽस्मि स्तवेनाहमनेन विबुधेश्वराः।।२५।।
मयिरुद्रे महादेवे भजध्वं भक्ति पूरिताः।
ममाँशोऽयं नृसिंहोऽपि मयि भक्ततमोऽस्त्विह।।२६।।
इमं स्तवं पठेद्यस्तु शरभेशाष्टकं नरः।
तस्य नश्यन्ति पापानि रिपवश्चसुरोत्तमाः।।२७।।
नश्यन्ति सर्व रोगाणि क्षयरोगादिकानिच।
अशेष ग्रह भूतानि कृत्रिमाणि ज्वराणि च।।२८।।
सर्प चौरादि शार्दूल गजपोत्रिमुखाणि च।
अन्यानि च वनस्थानि नास्ति भीतिर्न संशयः।।२९।।
इत्युक्तवान्तर्दधे देवि देवान्सर्व शालुवः।
ततस्ते स्वस्वधामानि गताश्चाल्हाद पूर्वकम्।।३०।।
एतच्छारभकं स्तोत्रं मन्त्रभूतं जपेन्नरः।
सर्वान्कामानवाप्नोति शिवलोकञ्च गच्छति।।३१।।

इति जपित्वा गणेंश शरभं च नमस्कृत्य स्नान सामग्रीमादाय नद्यादौ गत्वा तीर्थं नमस्कृत्य जलेन मुखनासाक्षि शोधनं मूल मन्त्रेण विधाय मलापकर्षण स्नानोत्तरं स्व शाखोक्तं स्नान विधाय–मन्त्रस्नानं कुर्यात्। अद्येत्यादिः श्रीमच्छरभ प्रीतये स्नानमहं करिष्ये। इति संकल्प्य जले चतुर्हस्तात्मकं क्षेत्रं विचिन्त्य तत्र पूजाप्रकरणोक्तं यन्त्रं विचिन्त्य प्राणायाम षडङ्गौ कृत्वा

अङ्कुश मुद्रया अर्कात् तिर्थानि गङ्गे च यमुने चेत्यादिना आवाह्य मूलं त्रिर्जपित्वा त्रिरुन्मज्जेत् ततो वैदिकीं सन्ध्यां विधाय मूलेन त्रिराचम्य त्रिधा प्रोक्ष्य त्रिः जलमभिमन्त्र्य प्राशयेत्। ततो वाम हस्ते जलं गृहीत्वा दक्षेणाच्छाद्य यं रं लं वं इति संजप्य गलितोदकविन्दुभिः सप्तवारं मूर्द्धानभिषिञ्च्य तदुदकं दक्षिण हस्तेगृहीत्वा इडयाकृष्य देहान्तः पापं प्रक्षाल्य पिङ्गलया विरेच्य पुरः कल्पित वज्र शिलायां क्षिपेत्। ततो देवर्षि पितॄन् सन्तर्प्य गुरुं परमगुरुं परापत्रगुरुं परमेष्ठिगुरुञ्च त्रिः त्रिः सन्तर्प्य मूलान्ते श्रीमच्छरभपादुकां तर्पयामि नमः इति त्रिः तर्पयेत्।। ततो हंसः मार्तण्ड भैरवाय प्रकाश शक्ति सहिताय श्री सूर्याय इदमर्घ्यं समर्पयामि नमः स्वाहा।। इति अर्घ्यं सूर्याय दत्वा मूलान्ते सूर्य मण्डल स्थाय श्रीमच्छरभाय इदमर्घ्यं नमः स्वाहा त्रिरर्घ्यं दत्वा मूलेन त्रिवारं भस्माभिमन्त्र्य ललाटादिषु धारयेत् अथवा भस्म धारणं कृत्वा सान्ध्यं कर्म समाचरेत् तत उपस्थानात्मक ध्यानं कुर्यात् यथा–सूर्य मण्डल मध यस्थं ज्योतिर्मय मुखाम्बुजम् चारु कुण्डल संयुक्तं चन्द्रमालावतंसितम्।। दश बाहुं महाकायं सुवर्णसदृशप्रभम्। चक्रशूलगदा खड्ग वाण कार्मुक खेटकैः।। घण्टा कपाल शं–खैश्च भासमान कराम्बुजम् दिव्याभरण संयुक्तं दिव्यवासं त्रिलोचनम्। एवं ध्यात्वा जपेन्मन्त्रमष्टोत्तरशतं सुधीः। द्वि चत्वारिंशदथवा कृत्वा चावश्यकं सुधी।। ततो

दश कृत्वो गायत्री जपेत् यथा:–

ॐ पक्षि शाल्वाय विद्महे वज्रतुण्डाय धीमहि तन्नः शरभः प्रचोदयात् ॐ। इति एतदुद्धारो वातुले तारमादौ वरेद्देवी पक्षिशाल्वाय वै पदम्। विद्महेति पदंचोक्त्वा वज्र तुण्डाय धीमहि। तन्नः शब्दं समुचार्य शरभेति ततोच्चरेत्। प्रचोदयात् पद् चोक्तवा तारञ्चैव पुनर्वदेत्।। एषा शालुव गायत्री जपतां सर्व कामदा। ततो जल सम्भृतं पात्रमादाय यागमण्डप द्वारमागत्य हस्तौ पादौ प्रक्षाल्याचम्य सामान्याध्र्यं संस्थाप्य द्वां द्वारदेवताभ्यो नमः इति द्वार देवताः सम्पूज्य वामाङ्ग संकोचेन दक्षिण पादपुरस्सरं गृहं प्रविश्य नैऋत्यां वास्तु पुरुषाय नमः ब्रह्मणे मूलमन्त्रेण दिव्यदृष्ट्या दिव्यान् विघ्नानुत्सार्य फडिति जलेनान्तरिक्षगान् फडितिवाम पार्ष्णि घातत्रयेण भौमांश्च विघ्नानुत्सार्य अपसर्पन्त्विति सर्व विघ्नानुत्सारयेत्।

ततः त्रिकोणाष्टदल वृत्त भूपूरद्वयात्मकं यन्त्रं निर्माय त्रिकोण मध्ये शक्तिबीजं लिखित्वा कोणत्रये बाला बीजत्रयं लिखेत् ततोऽष्ट दलेषु पाशाङ्कुश मध्यगममृतबीजं लिखित्वा वृत्तं मातृकयाऽऽवेष्टय तत्रासनं स्थापयेत्। एतदाधारयन्त्रं सर्व विघ्न निवारणं सर्व सिद्धिदं चेति वातुल तन्त्रादव धार्यम्। ततो ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं सम्पूज्य पृथिवीतयादिनाऽऽसनं संस्थाप्य स्वस्तिकादिक्रमेणोपविशेत् ततो वामे ॐ गुरुभ्यो नमः।

दक्षिणे ॐ गणेशाय नमः।

मध्ये श्री शरभाय नमः ततः फडिति गन्धपुष्पाभ्यां करौ संशोध्य उर्ध्वं तालत्रयं दत्त्वा छोटिकाभिर्दश दिग्बन्धनं कृत्वार्वामति जलधारया अग्नि प्राकारं विचिन्त्य भूत शुद्धिं समाचरेत् यथा आसने दृढ़ आसनः कनिष्ठिानामिकाङ्गुष्ठै नासापुटं धृत्वा षोडशवारं यमित्युच्चार्य वामेनापूर्य पुनर्वायुबीजं द्विरावृत्या कुम्भयित्वा दक्षिणेन रेचने वाम कुक्षिस्थं पाप पुरुषं कज्जलप्रभं ब्रह्म हत्या शिरस्कं स्वर्णस्तेय भुजद्वयं सुरापान हृदयं गुरु तल्प कटिं तत्संयोगि पद द्वन्द अङ्ग प्रत्यङ्ग पातकमुपपातक रोमाणं रक्त श्मश्रु विलोचनं खड्ग चर्म धरं क्रुद्धं पापं कुक्षौ चिन्तयित्वा पाप सहित पाप पुरुष तनुं संशोष्य तां च शुष्कान्ते एवं क्रमेण रं बीजेन संदह्य पाप रहित स्व शरीरं बं इति जले–नाप्लाव्य लमिति भूम्या दृढी कृत्य पञ्चाशद्वर्ण संख्यावयवान देहे निष्पन्नान विभाव्य तं देहं स्थिरी कुर्यात्। ततः हृदि हस्तं दत्वा आं सोऽहमिति त्रिजपेन देहे जीवं संयोज्य तथा विध देहं स्थिरीकृत्य लिपिंन्यासं कुर्यात् मातृका मन्त्रस्य ब्रह्माऋषिर्गायत्री छन्दो मातृका सरस्वती देवता हलो बीजानि स्वराः शक्तयः लिपिन्यासे विनियोगः। इति स्मृत्वा ब्रह्मणे ऋषये नमः शिरसि गायत्री छन्दसे नमः मुखे सरस्वती देवतायै नमः हृदि हल् बीजाय नमः गुह्ये विनियोगाय नमः सर्वाङ्गे इति

अस्य षडङ्ग कुर्यात्।

अं कं ४ आं अङ्गष्ठाभ्यां नमः।
इं चं ४ ईं तर्जनीभ्यां नमः।
उं टं ४ ऊं मध्यमाभ्यां नमः।
एं तं ४ ऐं अनामिकाभ्यां नमः।
ओं पं ४ औं कनिष्ठिकाभ्यां नमः।

अं यं रं लं वं शं सं षं हं लं क्षं अः करतल कर पृष्ठाभ्यां नमः। एवं हृदयादिन्यासः। अकारादि षोडश स्वरान् कण्ठे प्रादक्षिण्येन तथैव हृदि द्वादश दले कादि ठान्तं नाभौ दश दले डादि थान्तम् लिङ्गेषडदल बादि लान्तम्। आधारे चतुर्दले वादि शान्तं भ्रूमध्ये द्वि दले हं क्षं च न्यसेत् ततो ध्यानम्:–

पञ्चाशल्लिपि भिर्विभक्त मुख दोर्यन्मध्य वक्षस्थलाम्।
भास्वन्मौलि निबद्ध चन्द्रशकलामापीन तुङ्गस्तनीम्।
**मद्रामक्ष-** गुणं सुधाढ्य कलशं व्याख्याञ्च हस्ताम्बुजैर्विभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये।। इति ध्यात्वान्यसेत्।।
अं नमः ललाटे। आं नमः मुख वृत्ते। इं नमः दक्ष नेत्रे। ईं नमः वाम नेत्रे। उं नमः दक्ष कर्णे। ऊं नमः वाम कर्णे। ऋं नमः दक्ष नसि। ॠं नमः वाम नसि। लृं नमः दक्ष गण्डे। लॄं, नमः वाम गण्डे। एं नमः ओष्ठे। ऐं नमः अधरे। ओं नमः ऊर्ध्व दन्त पङ्क्तौ। औं नमः अधो दन्त

पङ्.क्तौ। अं नमः मूर्ध्नि अः नमः मुखे। कं नमः दक्षबाहु मूले। खं नमः कूर्परे। गं नमः मणिबन्धे। घं नमः अङ्गुलि मूले। ङ. नमः अङ्गुल्यग्रे। चं नमः वाम बाहुमूले। छं नमः कूर्परे। जं नमः वाम मणि बन्धे। झं नमः वामाङ्गुलि मूले। ञं नमः वामाङ्गुल्यग्रे। टं नमः वाम पाद मूले। ठं नमः जानुनि। डं नमः गुल्फे। ढं अङ्गुलि मूले। णं नमः अङ्गुल्यग्रे। तं नमः वाम पाद मूले। थं नमः वाम जानुनि। दं नमः वाम गुल्फे धं नमः वाम पादाङ्गुलि मूले। नं नमः वाम पादाङ्गुलि। पं नमः दक्ष पार्श्वे फं नमः वाम पार्श्वे। बं नमः पृष्ठे भं नमः नाभौ। मं नमः जठरे। यं नमः त्वगात्मने हृदि। रं नमः असृगात्मने दक्षस्कन्धे। लं नमः। मांसात्मने ककुदि। वं नमः मेदसात्मने वामस्कन्धे। शं नमः अस्थ्यात्मने हृदादि दक्षकरे। षं नमः मज्जात्मने हृदादि वाम–करे। सं नमः शुक्रात्मने हृदादि दक्षपादे। हं नमः जीवात्मने हृदादि वामपादे। लं नमः प्राणात्मने हृदादि नाभौ। क्षं परमात्मने नमः हृदादि मुखे इति सृष्टि मातृकाः। अथ स्थितिः। ऋषिश्छन्दश्च पूर्वोक्त देवता विश्वपालिनी। उपविप्टां वल्लभाङ्के ध्यायेद्देवीमनन्यधीः।। मृगबालं वरं विद्यामक्षसूत्रं दधत्करैः। माला विद्यालसद्धस्ता वहन्ध्येयः शिवोनिरम्।। एवं ध्यात्वा डकाराद्यां ठान्तां यथा स्थानं न्यसेदितिस्थितिः।

**अथ संहारः-**

ऋषिश्छन्दश्च पूर्ववत्। शत्रु संहारणि मातृका सरस्वती देवता शेषं पूर्ववत्। ध्यानम् :–

अक्षसृक् टंक सारङ्ग विद्या हस्तां त्रिलोचनाम्। चन्द्रमौलि कुचानम्रां रक्ताब्जस्थां गिरां भजे।। इति ध्यात्वाक्षाद्यां अकारान्तानु विलोमान् वर्णान् न्यसेत्। इति संहारः। पुनः सृष्टि स्थितिं कुर्यात्। अथ श्री कण्ठादिन्यासः। श्री कण्ठादि मातृ कायाः दक्षिणामूर्ति ऋषिः गायत्री छन्दः अर्द्धनारीश्वरो देवता हलो बीजानी स्वराः शक्तयः इति स्मृत्वा यथा स्थानंन्यस्य हनां अङ्गुष्ठाभ्यां नमः हनीं तर्जनिभ्यां नमः हनूंमध्यमाभ्यां नमः हनैं अनामिकाभ्यां नमः हनौं कनिष्ठकाभ्यां नमः हनः करतल कर पृष्ठाभ्यां नमः एवं हृदयादि। ततो ध्यानम्–पाशांकुश वराक्षसृक् वाणीं शीतांशु शेखरम्। त्र्यक्षं रक्त सुवर्णाभमर्द्ध नारीश्वरं भजे।। इति ध्यात्वा न्यसेत्। हनौं अं श्री कण्ठेशपूर्णो दरिभ्यां नमः ललाटे। ह्नौं आं अनन्तेश विरजाभ्यां नमः मुखवृत्ते ह्नौं इं सूक्ष्मेश शाल्मलीभ्यां नमः दक्ष नेत्रे ह्नौं ईं त्रिमूर्तीश लोलाक्षीभ्यां नमः वाम नेत्रे ह्नौं उं अमरेश वर्तुलाक्षीभ्यां नमः दक्षकर्णे। ह्नौं ऊं अर्द्धीश दीर्घ घोणाभ्यां नमः वाम कर्णे। ह्नौं ऋं भार भूतेश दीर्घ मुखीभ्यां नमः दक्षनसि। ह्नौं ॠं तिथीश गोमुखीभ्यां नमः वामनसि ह्नौं लृं स्थाण्वेश दीर्घजिह्वाभ्यां नमः दक्षगण्डे। ह्नौं ॡं हरेश कुण्डोदरीभ्यां नमः वाम गण्डे। ह्नौं एं भिन्टीशोर्ध्व केशीभ्यां

नमः ओष्ठे। ह्नौ ऐं भौति केश विकृत मुखीभ्यां नमः अधरोष्ठे। ह्नौं ओं सद्योजातेश ज्वालामुखीभ्यां नमः ऊर्ध्व दन्त पङ्.क्तौ। ह्नौं औं अनुग्रहे शोल्कामुखीभ्यां नमः अधोदन्तपङ्.तौ ह्नौं अं अक्रूरेश श्री मुखाभ्यां नमः मूर्ध्नि। ह्नौं अः महासेनेश विद्या मूखीभ्यां नमः मुखे। ह्नौं कं क्रोधेश महाकालीभ्यां नमः दक्ष बाहु मूले। ह्नौं खं चण्डेश सरस्वतीभ्यां नमः कूर्परे। ह्नौं गं पञ्चान्तक सर्वेश सिद्धि गौरीभ्यां नमः मणि बन्धे। ह्नौं घं शिवोत्तमेश त्रैलोक्य विद्याभ्यां नमः अंगुलिमुले। ह्नौं ङं एक रुद्रेश मन्त्र शक्तिभ्यां नमः अङ्गुल्यग्रे, ह्नौं चं कूर्मेशात्म शक्तिभ्यां नमः वाम बाहु मूले। ह्नौं छं एक नेत्रेश भूत मातृभ्यां नमः कूर्परे ह्नौं जं चतुराननेश लम्बोदरीभ्यां नमः मणिबन्धे। ह्नौं झं अजेश द्राविणीभ्यां नमः अङ्गुलिमूले। ह्नौं ञं सर्वेश नागरीभ्यां नमः अङ्गुल्यग्रे। ह्नौं टं सोमेश खेचरीभ्यां नमः दक्ष पाद मूले। ह्नौं ठं लाङ्गलीश मञ्जरीभ्यां नमः जानुनी। ह्नौं डं दारुकेश रुक्मणीभ्यां नमः गुल्फे। ह्नौं ढं अर्द्ध नारीश वाणीभ्यां नमः अङ्गुलिमूले, ह्नौं णं उमा कान्तेश काकोदरीभ्यां नमः अंङ्गुल्यग्रे। ह्नौं तं आषाढ़ीश पूतनाभ्यां नमः वाम पाद मूले। ह्नौं थं चण्डीश भद्रकालीभ्यां नमः जानुनि। ह्नौ दं अत्रीश योगिनीभ्यां नमः गुल्फे। ह्नौं धं नीमेष शङ्खिनीभ्यां नमः अंगुलिमूले। ह्नौं नं मेषेश तर्जनीभ्यां नमः अंगुल्यग्रे। ह्नौं पं लोहितेश

काल रात्रीभ्यां नमः दक्ष पार्श्वे। ह्नौं फं शिखीश कुब्जिनीभ्यां नमः वामपार्श्वे, ह्नौं बं छगलण्डेश कपर्दनीभ्यां नमः पृष्ठे। ह्नौं भं द्विरण्डेश वज्राभ्यां नमः नाभौ। ह्नौं मं महाकालेश जयाभ्यां नमः जठरे। ह्नौं ञं त्वगात्मभ्यां वालीश सुमुखीभ्यां नमः हृदि। रं असृगात्मभ्यां भुजङ्गेश रेवतीभ्यां नमः दक्षांशे। ह्नौं लं मांसात्मभ्यां पिनाकीश माधवीभ्यां नमः ककुदि। ह्नौं वं मेद आत्माभ्यां खड्गीश वारुणीभ्यां नमः वामांशे, ह्नौं शं अस्थ्यात्मभ्यां बकेश वायवीभ्यां नमः हृदयादि दक्षकरे। ह्नौं षं मज्जात्मभ्यां श्वेतेश रक्षो विदरिणीभ्यां नमः हृदयादि वाम करे। ह्नौं सं शुक्रात्मभ्यां भृग्वीश सहजाभ्यां नमः हृदयादि दक्ष पादे। ह्नौ हं जीवात्मभ्यां लकुलीश लक्ष्मीभ्यां नमः हृदयादि वाम पादे। ह्नौं लं शक्तयात्मभ्यां शिवेश व्यापिनीभ्यां नमः नाभौ। ह्नौं क्षं क्रोधात्मभ्यां संवर्तकेश महामायाभ्यां नमः हृदयादि मुखे। इति श्री कण्ठादि न्यासः। अथ प्राणायामः।

मन्त्राद्यबीजं षोडशवारं जपन् वामेन वायुमापूर्य चतुष्षष्ठि वार जपेन कुम्भयित्वा दक्षिणेन रेचयेत् पुनर्दक्षिणेनापूर्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत् पुनर्वामेनापूर्योंभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेदित्येकः प्राणायामः। एवं त्रिः। अथ पीठन्यासः। आधारे मण्डूकाय नमः। स्वाधिष्ठाने कालाग्नि रुद्राय नमः। नाभौ कूर्माय नमः हृदि ॐ आधार शक्तये नमः। अनन्ताय नमः। पृथिव्यै नमः

क्षीर समुद्राय नमः श्वेत द्वीपाय नमः। मणिमण्डपाय नमः। कल्पवृक्षाय नमः मणिवेदिकायै नमः रत्नसिंहासनाय नमः। दक्षिण स्कन्धे धर्माय नमः वाम स्कन्धे ज्ञानाय नमः। वामोरौ वैराग्याय नमः। दक्षोरौ ऐश्वर्याय नमः। मुखे अधर्माय नमः। वाम पार्श्वे अज्ञानाय नमः। नाभौ अवैराग्याय नमः। दक्ष पार्श्वे अनैश्वर्याय नमः। पुनर्हृदि अनन्ताय नमः। पद्माय नमः अं सूर्य मण्डलाय द्वादश कलात्मने नमः। ओं चन्द्रमण्डलाय षोडश कलात्मने नमः। मं वह्नि मण्डलाय दश कलात्मने नमः। सं सत्वाय नमः रं रजसे नमः तं तमसे नमः आं आत्मने नमः। अं अन्तरात्मने नमः पं परमात्मने नमः ह्रीं ज्ञानात्मने नमः। सर्वत्र प्रणवादि नमोऽन्तता। हृत्पद्मस्थ केशरेषु प्रागादि प्रादक्षिण्येन। वामायै नमः ज्येष्ठायै नमः। रौद्रायै नमः। काल्यै नमः कल विकिरिण्यै नमः। वल विकिरिण्यै नमः। बल प्रमथिन्यै नमः। सर्व भूत दमिन्यै नमः। सर्वत्र प्रणवादि नमोऽन्तम्। मध्ये मनोजमन्यै नमः। तदुपरि ॐ नमो भगवते सकल गुणात्म शक्ति युक्तायान्नताय योग पीठात्मने नमः। इति पीठन्यासः। अथ ऋष्यादिन्यासः। शरभेश्वर मन्त्रस्य कालाग्नि रुद्र ऋषिः। जगती छन्दः भगवान् शरभेश्वरो देवता खं बीजं स्वाहा शक्तिः स्वेच्छा प्रयोग सिद्धयर्थे विनियोगः। इति स्मृत्वा यथा स्थानं न्यस्य षडङ्गं कुर्यात्। वातुलेतु। वाम देवा कालाग्नि रुद्र ऋषिः अति जगती

छन्दः देवता सु पक्षा तरम्। ॐ खें खां अङ्गुष्ठाभ्यां नमः। ॐ खं फट् तर्जनीभ्यां नमः प्राणग्रहासि हुं फट् मध्यमाभ्यां नमः। सर्व शत्रु संहारणाय शरभ शालुवाय कनिष्ठाभ्यां नमः। पक्षिराजाय हुं फट् स्वाहा करतल कर पृष्ठाभयां नमः। एवं हृदयादि। मुष्ठि विनिर्गतांगुष्ठौ हृदि। निस्तर्जनी तादृ शौ शिरसि। निरंगुष्ठ कनिष्ठौतु शिखायाम्। निरंगुष्ठ प्रदेशिनी प्रथग्भूतौ स्कन्धाद हृदयान्तर वर्मणि। तर्जन्यादि त्रयं नेत्रे। तालस्फोटो अस्त्रं। षडंगान्ते ॐ इति दिग्बन्धः। इति प्रपञ्च सार संग्रहे। ध्यानम्–चन्द्रार्काग्निस्त्रिदृष्टिः कुलिशवरनखश्चञ्चलो ऽत्युग्रजिह्वः। काली दुर्गा च पक्षौ हृदय जठरगो भैरवो वाडवाग्निः। अरुस्थौव्याधि मृत्यू शरभवर खगश्चण्ड वातातिवेगः। संहर्ता सर्व शत्रून् सजयति शरभः शालुवः पक्षिराजः। किंच विमल निभ महोद्यत्कृत्तिवासोवसानम्।

द्रुहिणमुखमुनीन्द्रैस्तूयमानं गिरीशम्
स्फटिक मणिजपासृक् पुस्तकोद्यत्कराब्जम्।
शरभमहमुपासे शालुवेशं खगेशम्।।
अन्यच्च–मृगस्त्वर्द्ध शरीरेण पक्षाभ्यां चञ्चुना द्विजः।
अधो वक्त्रश्चतुस्पाद ऊर्ध्व वक्त्रश्चतुर्भुजः।।
कालान्त दहन प्रख्यो नील जीमूत निस्वनः।
अरिस्तद्दर्शनादेव विनष्ट बल विक्रमः।।

सटा छटोग्ररूपाय पक्षविक्षिप्त भूभृते।
अष्टापदाय रुद्राय नमः शरभ मूर्तये।।

इति ध्यात्वा मानसोपचारैर्देवमाराध्येत् यथा लं पृथिव्यात्मने परमात्मने गन्ध तन्मात्र प्रकृत्यानन्दात्मने गन्धं समर्पयामि नमः कनिष्ठाभ्यां हं आकाशात्मने शब्द तन्मात्रात्मने श्री शरभेश्वराय नमः पुष्पं समर्पयामि अङ्गुष्ठाभ्यां यं वायव्यात्मात्मने स्पर्श तन्मात्रात्मने धूपं समर्पयामि नमः तर्जनीभ्यां रं वह्न्यात्मने रूप तन्मात्रात्मने दीपं समर्पयामि नमः मध्यमाभ्यां बं रसात्मने अमृतात्मने रस तन्मात्रात्मने नैवेद्यं समर्पयामि नमः अनामिकाभ्यां सं शक्तयात्मने सर्व तन्मात्रात्मने ताम्बूलं समर्पयामि नमः कर सम्पुटाभ्यां।

स्वागतं देवदेवेश सन्निधो भव शङ्करा गृहाण मानसीं पूजां यथार्थ परिभाविताम्।। इति मनसा सम्पूज्य पात्रं स्थापयेत्। तत्रास्त्रक्षालितमाधारं संस्थाप्य मं वह्निमण्डलाय दश कलात्मने शरभ कलशाधाराय नमः इति सम्पूज्य तत्रास्त्रक्षालितं गन्धादि चर्चितं सुधूपितं कलशं प्रतिष्ठाप्य अं अर्कमण्डलाय द्वादश कलात्मने शरभ कलशाय नमः इत्यभ्यर्च्य मूलेन विलोम मातृका चोच्चरन् तथोदकैः कलशमापूर्य ॐ सोममण्डलाय षोडश कलात्मने शरभ कलशामृताय नमः इति सम्पूज्य तद्दक्षिणतो जलेन चतरस्त्रं कृत्वा मध्ये गन्धादिना वृत्तषट्कोणं त्रिकोणञ्चोर्ध्वग्रं कृत्वा

आग्नेयादि षट्सु कोणेसु षडङ्गानि सम्पूज्य तत्रास्त्रक्षालितमाधारं संस्थाप्य मं वह्निमण्डलाय दशकलात्मने शरमार्ध्य पात्रासनाय नमः इति सम्पूज्य स्वाग्रादि वृत्ताकारेण वह्नेर्दश कलाः पूजयेत्। यं धूमार्चिषे नमः। रं ऊष्मायै नमः। लं ज्वलिन्ये नमः। वं ज्वालिन्यै नमः। शं विस्फुलिंगिन्यै नमः। षं सुश्रियै नमः। सं सुरूपायै नमः। हं कपिलायै नमः। लं हब्य वाहायै नमः। क्षं कव्य वाहायै नमः। इति सम्पूज्य फडिति क्षालितं पात्रं तदुपरि निधाय अं सूर्य मण्डलाय द्वादश कलात्मने शरभार्ध्य पात्राय नमः इति सम्पूज्य तत्र वृत्ताकारेण प्रागादि कं भं तपिन्यै नमः। खं बं तापिन्यै नमः। गं फं धूम्रायै नमः। घं पं मरिच्यै नमः। ङ. णं ज्वालिन्यै नमः। चं धं रुच्यै नमः छं दं सुषुम्णायै नमः। जं थं भोगदायै नमः। झं तं विश्वायै नमः। ञं णं बोधिन्यै नमः। टं ढं धारिण्यै नमः। ठं डं क्षमायै नमः। इति सम्पूज्य मूलं विलोममातृकांचोच्चरन् कलशामृतेनापूर्य तस्मिन् शैव गन्धाष्कमालोड्य ॐ सोम मण्डलाय षोडश कलात्मने शरभार्ध्यामृताय नमः। इति सम्पूज्य तत्र वृत्ताकारेण। अं अमृतायै नमः। आं मानदायै नमः। इं पूषायै नमः। ईं तुष्टायै नमः। उं पुष्टयै नमः। ऊं रत्यै नमः। ऋं धृत्यै नमः। ॠं शशिन्यै नमः। लृं चन्द्रिकायै नमः। लॄं कान्त्यै नमः। एं ज्योत्स्नायै नमः ऐं श्रियै नमः। ओं प्रीत्यै नमः। औं अन्नदायै नमः। अं पूर्णायै नमः। अः पूर्णामृतायै

नमः। इति सोमकलाः पूजयेत्।

चन्दनागरु कर्पूर तमाल जल कुंकुमम्। कुसीतं कुष्ट संयुक्तं शैवं गन्धाष्टकं स्मृतम्। ततोऽर्घ्य जले गंगे चेत्यादिना क्रों इत्यङ्कुश मुद्रया सूर्यात्तीर्थान्यावाह्य स्वहृदयाद्देवमावाह्य जलं स्पृष्टवा अष्टशो मनुं जपेत्। अप्सु चाङ्गानि विन्यस्य हृदा सम्पूजयेदथ। मूलमष्टशो जपित्वा मत्स्य मुद्रयाच्छाद्य अस्त्रेण छोटिका मुद्रया संरक्ष्य हुँ इत्यवगुण्ठ्य वं इत्यमृतीकृत्य सन्निरोधिन्या सन्निरुध्य शंख मुशल चक्र मुद्राः प्रदर्श्य महा मुद्रां दर्शयन् योनि मुद्रां दर्शयेत्। इति सामान्यार्घ्य विधिः। ततस्तद्दक्षिणे पाद्यार्घ्याचमनीय मधुपर्क पात्राणि सामान्यार्घ्यविधिना संस्थाप्य अर्घ्यामृतं प्रोक्षणीपात्रं किंच्चिदुद्धृत्य मूलमुच्चरन् तेनात्मानं पूजा द्रव्याणिच त्रिरभ्युक्ष्य सर्वं ब्रह्ममयं भावयेत् अथ शरीरे न्यास क्रमेण मण्डूकादि पीठमन्वन्तान्सम्पूज्य हृदये श्री शरभं नैवेद्यादिना गन्धाद्यैः पूजयेत् कुण्डलिनीमथोत्थाप्य द्वादशान्ते परं नीत्वा तदुत्थामृतधाराभिरिष्टदेवतां सन्तर्प्य यथा शक्ति मूलं मनस्येव जपित्वा गुह्याति जपं समर्प्य मूर्धा हृन्मूलाधारपादसर्वाङ्गेषु क्रमेण पुष्पाञ्जलीन्दद्यात् सर्वमेतत्प्रोक्षणीपात्रस्थ जलेन कुर्यात् ततः प्रोक्षणि जलं विसृज्य सम्पूज्य वहिः पूजामारभेदित्यन्तर्यागः।

अन्तर्याग वहिर्यागौ गृहस्थः सर्वथा चरेत्। आद्यमेव

ब्रह्मचारी वानप्रस्थो यतिस्तथा।। अथ यन्त्रे शिवलिंगे शालिग्रामादौ वा बाह्य पूजां कुर्यात्। तत्र यन्त्र रचना। त्रिकोणं विलिखेत्पूर्वं तद्वहिर्वृत्तमालिखेत्। तद्बहिश्चाष्टपत्रं तु द्वादशारं ततः परम्।। षोडशारं ततः पश्चात् ततो भूपुर युग्मकम्। त्रिकोणमध्ये देवेशं शरभं शालुवेश्वरम्।। चिरं ध्यात्वा ततो मौनी गुरुपादयुगं स्मरेत्। इति भस्मन्येतद् विलिखेत्। अथ मूलेन प्राणानायम्य पीठस्योत्तरे वायव्यादीश पर्यन्तं क्रमेण गुरून् पूजयेत् दक्षिणे गणेशाय नमः पीठ मध्ये तु मण्डूकाय नमः। कालाग्नि रुद्राय नमः। कूर्माय नमः। आधार शक्तये नमः। अनन्ताय नमः। पृथिव्यै नमः। क्षीर समुद्राय नमः। श्वेत द्वीपाय नमः। मणिमण्डपाय नमः। कल्पवृक्षाय नमः। मणि वेदिकायै नमः। रत्न सिंहासनाय नमः। अग्निकोणे धर्माय नमः। एवं नैऋत वायव्येशानेषु ज्ञानवैराग्यैश्वर्यान् पूजयेत्। पूर्वादि चतुर्दिक्षु अधर्माज्ञानावैराग्यानैश्वर्यान् पूजयेत् मध्ये अनन्ताय नमः। पद्माय नमः। अं सूर्य मण्डलाय द्वादश कलात्मने नमः। उं चन्द्रमण्डलाय षोडश कलात्मने नमः। मं वह्निमण्डलाय दश कलात्मने नमः। सं सत्वाय नमः। रं रजसे नमः। तं तमसे नमः। अं आत्मने नमः। अं अन्तरात्मने नमः। पं परमात्मने नमः। ह्रीं ज्ञानात्मने नमः। पूर्वादि केशरेषु। ज्येष्ठायै नमः। रौद्र्यै नमः। काल्यै नमः। कल विकिरिण्यै नमः। बल विकिरिण्यै नमः। बलप्रमथिन्यै नमः। सर्व

भूतदमिन्यै नमः। मनोन्मन्यै नमः। तदुपरि ॐ नमो भगवते सकलगुणात्मशक्ति युक्तायानन्ताय योग पिङ्गलात्मने नमः। इति सम्पूज्य अथ पूर्वोक्त रूपं देवं स्वहृदये स्वैक्येन ध्यात्वा सुषम्णावर्त्मना पुष्पाञ्जलौ देवं समाबाह्य तामञ्जलिं कल्पितमूर्ते। शिरसि दत्त्वा देवं मूर्तौ समागतं भावयेत्। मूलं श्री शरभेश्वर इहागच्छ इत्यावाहनीं मुद्रां प्रदर्श्य मूलान्ते स्थापितो भवेति स्थापिनीम् ततो लेलिहान मुद्रया देवस्य हृदयं स्पृशन् ओं आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोऽहं श्री शरभेववरस्य प्राणाः पुनर्बीजान्युच्चार्य श्री शरभेश्वरस्य जीव इहस्थितः सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्रजिह्वा घ्राणादीनि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राण प्रतिष्ठां विधाय मूलान्ते सर्वान्तर्यामिणे श्री शरभेश्वराय आसनं कल्पयामि अत्रासने त्वं प्रतिष्ठितो भवेत्यासनं दत्त्वा मूलान्ते सन्निहितो भवेति सन्निधापिनीं प्रदर्शयेत् मूलान्ते श्री शरभेश्वर त्वां सन्निरुणध्मि इति सन्निरोधिनीम् मूलान्ते श्री शरभेश्वराभिमुखोभवेति सम्मुखी करणीं दर्शयेत्। मूलान्ते श्री शरभेश्वर त्वां प्रार्थयामीति। प्रार्थिनीम्। मूलान्ते श्री शरभेश्वर त्वं स्थिरो भवेति स्थिरी करणीम्। देव शरीरे षडंगन्यासं कुर्यादिति सकलीकरणम्। मूलान्ते श्री शरभेश्वर त्वां अवगुण्ठयामीत्यवगुण्ठनीम्। मूलान्ते श्री शरभेश्वर परमीकृतो भवेति परमीकरणीम्। मूलान्ते महामुद्रां विरचयन् श्री शरभेश्वर स्वागतन्ते

सुस्वागतम्। इति स्वागतम्। प्रत्युपचार सामान्यार्ध्य जलेन समर्पणं कुर्यात्। ततस्ताम्रादिपात्रे मापाद्य जलं कृत्वा तत्र श्यामाक विष्णु क्रान्तायवदूर्वाछित्या मूलान्ते श्री शरभेश्वरायैतत्पाद्यं कल्पये स्वाहेति पादाम्बुजे दद्यात्। दूर्वा तिल दर्भाग्र सर्षप यव पुष्पाक्षतयुतं जलं गृहीत्वा मूलान्ते श्री शरभेश्वरायेदमर्घ्यं कल्पये स्वाहेति मूर्ध्नि अर्ध्यं दद्यात् पुनर्लवंग जाति कंकोल युतं जलं गृहीत्वा मूलान्ते श्री शरभेश्वरा यैतदाचमनं कल्पये इत्याचमनं मुखे दद्यात्। दध्याज्यमधूनि पात्रे गृहीत्वा मूलान्ते श्री शरभेश्वरायेमं मधुपर्कं कल्पये सुधेति मधुपर्कं दद्यात् पूर्ववत्पुनराचमनीयं दद्यात् स्नानवस्त्रोपवीतान्ते नैवेद्यं समर्पयेत्। पाद्यादि द्रव्याभावेतु तत् स्मरन् अक्षतान् निक्षिपेत् मूलान्ते श्री शरभेश्वरायेदं सुगन्ध तैलं समर्पयामि इति तैलंदत्वा हरिद्राद्यैः मूलान्ते श्री शरभेश्वराय स्नानीयं निवेदयामि इति स्नानीयं दत्त्वा शतरुद्रियेण पुरुष सूक्तेन च स्नापयित्वा आचमनीयं दद्यात्। एवं वस्त्रं यज्ञोपवीतं भूषणानि शैवाष्टगन्धं यथा सम्भवं वा चन्दनं दत्त्वा गन्ध मुद्रां प्रदर्शयेत् पुष्पाणि दत्त्वा पुष्पमुद्रा प्रदर्शयेत् धूप पात्रस्थितांगारे गुग्गुलं क्षिप्त्वा पात्रमस्त्रेण संप्रोक्ष्य हृदा पुष्पं तत्र क्षिप्त्वा तत्पात्रं वाम तर्जन्या संस्पृशन् मूलं श्री शरभेश्वराय धूपं समर्पयामि। धूपमुद्रां दर्शयामि। ततस्तर्जन्यंगुष्ठयोगेन घण्टां जयध्वनि मन्त्र मातः स्वाहेति

सम्पूज्य वामहस्तेन तां वादयन् नाभि पर्यन्तं देवं दक्ष हस्तेन धूपयेत् एवं दीपं नेत्र पर्यन्तं भ्रामयेत् जलं पुष्पाञ्जलिं चान्तरा दद्यात्। दीपमुद्रांच दर्शयेत्। घृतदीपं दक्षिणे वामेऽन्यं स्थापयेत्। सितवर्तिस्तैलदीपो दक्षिणे रक्तवर्तिर्घृत दीपोऽपि वामे ततः स्वर्णादि निर्मित पात्रस्थमाषान्न पायसान्न धूपात्मकं मन्त्रं अस्त्रेण सम्प्रोक्ष्य चक्रमुद्रां प्रदर्श्य द्वादशवारं वायुबीजं मन्त्रितैस्तोयैः प्रोक्ष्य तज्जातैर्वायुभिः नैवेद्य दोषं संशोष्य दक्षिण हस्ते रं बीजं विभाव्य तं नैवेद्योपरि कृत्वोत्सृष्टे वामकरतलं न्यस्य रं बीजोत्पन्नाग्निना नैवेद्य दोषं दहेत् ततो वाम करेऽमृतं विभाव्य तत्पृष्ठे दक्षिणं दत्वा नैवेद्योपरि दर्शयेत् अमृतबीजोत्थाऽमृतधारया तमाप्लावितं विभाव्य मूलेन प्रोक्ष्य मूलमष्टशो जपित्वा धेनु मुद्रां प्रदर्श्य गन्धपुष्पैः तदर्चयेत्। देवे पुष्पाञ्जलिं दत्त्वा देवमुखोच्छ्रितं वामांगुष्ठेन तत्पात्रं स्पृष्ट्वा दक्ष हस्ते जलं धृत्वा मूल श्रीशरभेश्वरेदं नैवेद्यं गृहाण स्वाहा इति जलमुत्सृजेत्। अंगुष्ठानामिकाभ्यां नैवेद्य मुद्रां प्रदर्श्य सपुष्पकराभ्यांवित्रि नैवेद्य पात्रमुद्धरन् निवेदयामि भवते तुषाणेदं हबिर्हर इति ग्रास मुद्रां प्रदर्शयेत् प्राणाद्याः पञ्च मुद्राः प्रदर्श्य भगवतो भोजनं भावयित्वा मध्ये पानीयं दत्त्वा आचमनीयं करोत्द्धर्तनकं आचमनीयं फलं ताम्बूलञ्च दत्त्वा पुष्पाजलिं दद्यात्।

## अथावरण पूजा

पूजितोसि यथाशक्ति यथा लब्धोपचारकैः।
अनुज्ञां भगवन्देहि परिवारार्चनायमे।।

इत्याज्ञां गृहीत्वा मध्य त्रिकोणस्य पूर्वादिकोणेषु। चन्द्राय नमः सूर्याय नमः। अग्नये नमः। अभीष्ट सिद्धिं मे देहि शरणागत– वत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्। इत्यावरण पूजां निवेद्य मूलं श्री शरभाय सपरिवाराय नमः इति पुष्पाञ्जलिं समर्प्य प्रणमेत्। गीर्वाणाय नमः इति त्रिकोण मध्य चतुर्दिक्षु भैरवाय नमः। वडवाग्नये नमः। दुर्गायै नमः काल्यै नमः। इति प्रथमावरणे विशषः। ततोऽष्ट दलेषु लं इन्द्राय नमः। रं अग्नये नमः यं यमाय नमः छं निर्ऋतये नमः। वं वरुणाय नमः। यं वायवे नमः। सं सोमाय नमः। हं ईशानाय नमः अभीष्ट सिद्धिमिति द्वितीयम्। व्याधये नमः दक्षिण पार्श्वे मृत्यवे नमः वाम पार्श्वे अभीष्टेति तृतीयम् ततो द्वादशदले पूर्वादि मं मदनाय नमः रं रक्तचामुण्डायै नमः मं मोहिन्यै द्रां द्राविण्यै नमः। शं शब्दाकर्षिण्यै नमः। वां वाण्यै नमः रं रमायै नमः। मां मान्यायै नमः। पुँ पुलिन्दिन्यै नमः। शं शास्त्रे नमः क्षं क्षोभिण्यै नमः। जं ज्येष्ठायै नमः। अभीष्टेति चतुर्थम्। इति षोडशारे यजेत्पश्चात् षोडशस्वर देवताः इति शरभ तन्त्रानुसारेण अं अकार देव्यै नमः आं आकार देव्यै नमः इत्यादि। आं अहंकार देव्यै नमः इति केचित्प्रयोगं

कुर्वन्ति गीर्वाण तन्त्रे तु ब्रह्मणे नमः। परायै नमः। शक्त्यै नमः विष्णवे नमः। मायायै नमः। वराहाय नमः पृथिव्यै नमः विधये नमः। शिवायै नमः अश्विभ्यां नमः। वीर भद्राय नमः भारत्यै नमः शिवाय नमः। शंकराय नमः। रुद्राय नमः कालरुद्राय नमः। इति षोडशदलेषु क्रमेण षोडश स्वरपूर्वकाः देवताः पूजयेत्। इत्युक्तम्। तत्र यथानाथ सम्प्रदायमवगन्तव्यम्। अभीष्टेति पञ्चमम्। तद्वहिः प्रथम भूपूरे पूर्वादि दिङ्षु। गणेशाय नमः। यमाय नमः। स्कन्दाय नमः। भैरवाय नमः। वायव्यादि विदिक्षु त्वरितायै नमः बीर भद्राय नमः। वडवानलाय भैरवाय नमः। महामायायै नमः। अभीष्टेतिषष्ठम् बाह्यभूपुरे पूर्वादि दिक्षु। ब्राह्म्यै नमः। माहेश्वयैं नमः। कौमार्यैं नमः। वैष्णव्यै नमः। वाराह्यै नमः। इन्द्राण्यै नमः। चामुण्डायै नमः। महालक्ष्म्यै नमः। अभीष्ट इति सप्तमम्।

तद् वहिः पूर्वादि परितस्तु यजेत्सर्वाः ककाराद्यर्ण देवताः इति शरभतन्त्र स्वारस्यात्। कं ककार दैव्यै नमः। खं खकार देव्यै नमः। इत्यारभ्य क्षं क्षकार देव्यै नमः इत्यन्तं। प्रयोगं केचिदाद्रियन्ते। गीर्वाणे तु। ब्रह्मणे नमः जाह्नव्यै नमः। गणेशाय नमः भैरवाय कालाय नमः। भद्रकाल्यै नमः। भीमकाल्यै नमः। जातवेदसे नमः। अर्द्धनारीश्वराय नमः। परमात्मने नमः। पृथिव्यै नमः। चन्द्राय नमः। शुक्राय नमः। विष्णवे नमः बलभद्राय नमः।

धनदाय नमः। पराशक्त्यै नमः। दुर्गायै नमः। धर्माय नमः। निर्विकल्पाय नमः। अग्नये नमः। भैरवाय नमः। अश्विभ्यां नमः। भार्गवाय नमः। ईश्वराय नमः। वायवे नमः। कृशानवे नमः। शक्ताय नमः। वरुणाय नमः। शंकराय नमः। द्वादशादित्येभ्यो नमः। भारत्यै नमः। सदा शिवाय नमः। पृथिव्यै नमः। नृसिंहाय नमः। इत्थं ककारादि क्षकारान्ता वर्ण देवताः प्रोक्ता एता तत्तद्वर्णपूर्वा पूजयेत्। इत्युक्तं तदपि पूर्वदिशा अवगन्तव्यम्। सर्वत्र प्रणवादि नमोऽन्तेन प्रादक्षिण्येन पूजनम्। अभीष्टेति अष्टमम् पुनर्मूलेन पुष्पाञ्जलिं दत्त्वा धूप दीपौ नैवेद्यञ्च पूर्ववत् दद्यात् तत्र शरभाय सांगाय सपरिवारोयेति विशेषः। यद्यप्यन्यत्र पद्धतिकारैः पुष्पान्त पूजामुक्तवा आवरण पूजोक्ता तथापि मूलेन शालुवें भूयो धूप दीपादिना यजेत् इत्यावरण पूजान्तर्गत ग्रन्थ स्वारस्यात् अस्माभिरन्यथाभिधायि इत्यवसेयम्। ततो मूलेन मध्ये पानीयं दत्त्वा नित्य होमं कुर्यात। स्थण्डिल कुण्डं वा कल्पयित्वा कुशैः सम्मार्ज्य तत्रा तूष्णीमग्निं संस्थाप्य परिसमुह्य परिस्तीर्य परिषिच्याग्निदैवतयोरैक्यं विभाव्य मूलमन्त्रोत्तरैः प्राणादि पञ्चमन्त्रैः पञ्चाहुतीः षडङ्गमन्त्रैः षडाहुतीश्च घृतान्न पायस तिलतण्डुल तदुभयसुगन्धिपुष्पाणामन्यतम द्रव्येण हुत्वा परिस्तरणानि विसृज्य प्रदक्षिणी कृत्य वह्निं विसृजेत्। तान्त्रिक मग्निमुख मंत्रनास्ति अग्न्याधान्नादिकं कर्म नित्य

होमे न विद्यते इति श्री निवास धृत वसिष्ठ संहित वचनात् चरु होम पक्षे तस्यैवाग्नौ पचेत् सिद्ध वा चरुं गृह्णीयात्। इति नित्य होमः। ततः स्व वाम भागे आसनान्तरे उपविश्य वृत्तत्रिकोण चतुरस्त्रमण्डलमालिख्य व्यापक मण्डलाय नमः इति सम्पूज्य तस्यैव ईशानाग्नेय निर्ऋति वायु कोणेषु सामान्यार्ध्य जलेन त्रिकोण वृत्त चतुरस्त्रात्मक मण्डलचतुष्टयं विधाय बं वटुकमण्डलाय नमः यां योगिनी मण्डलाय नमः क्षं क्षेत्रपाल मण्डलाय नमः गं गणेश मण्डलाय नमः इति सम्पूज्य तत्रसान्नोदकोपचारं साधारं पात्र चतुष्टयं निधाय बटुकादिभ्यो बलिं दद्यात्। एह्येहि देवि पुत्र बटुकनाथ कपिल जटाभार भासुर त्रिनेत्र ज्वालामुख सर्व विघ्नान्नाशय₂ सर्वोपचार सहितं बलिं गृह्ण गृह्ण स्वाहेति सामान्य जलेन वामाङ्गुष्ठानामाभ्यांमुत्सृजेत्। ऊर्ध्वं ब्रह्माण्डतोवा दिवि गगनतले भूतले निष्कलेवा पाताले वा तलेवा सलिलपवनयोर्यत्र कुत्रास्थितावा। क्षेत्रे पीठोपपीठादिषुचकृतपदा धूप दीपादिकेन प्रीता देव्यः सदा नः शुभबलि विधिना पान्तु वीरेन्द्र वन्द्याः।। यां योगिनीभ्यः स्वाहा। सर्व योगिनीभ्यो हुँ फट् स्वाहा इति वामाङ्गुष्ठ तर्जनीभ्यां मध्यमोपरि बलिं दद्यात्।

क्षां क्षीं क्षूं क्षैं क्षूं क्षः स्थान क्षेत्रपाल धूप दीपादि सहितं बलिं गृह्णगृह्ण स्वाहा इति सरल तर्जनिकेन वाम मुष्टिना क्षेत्रपाल बलिं विसृजेत्। गां गीं गूं गणपतये वर वरद सर्व

जनं मे वशमानय बलिं गृह्ण गृह्ण स्वाहा इति सरल मध्यमकेन वाम मुष्टिना गणपति वलिमुत्सृजेत् ॐ ह्रीं सर्वविघ्न कृद्भ्यः सर्व भूतेभ्यो हुँ फट् स्वाहा इति त्रिरुच्चार्य तत्व मुद्रया सर्वभूत बलिमुत्सृजेत् इति बलि बिधिः। ततो हस्तौ पादौ प्रक्षाल्य आचम्य प्राणानायम्य स्वासने उपविश्य ततो मूलेन उत्तराचमनं चन्दनादि करोद्वर्तनकं हस्तप्रक्षालनं पुनराचमनीयं दत्त्वा कर्पूरैला लवङ्गादियुतं ताम्बूलं दद्यात् मूलेन पुष्पाञ्जलिं नीराजनं च कृत्वा छत्रचामरादि दर्शयन् श्लोकान् पठेत्। बुद्धिः शवासनाक्लृप्ता दर्पणं मङ्गलानिच। मनों वृत्तिर्विचित्रा ते नृत्यरूपेण कल्पिता।। ध्वनयो गीतरूपेण शब्दा वाद्य प्रभेदतः। छत्राणि तव पद्मानि कल्पितानि मयाप्रभो।। सुषुम्नाध्वज रूपेण प्राणाद्याश्चामरात्मना। अहङ्कारो गजत्वेन वेगः क्लृप्तो रथात्मना।। इन्द्रियाण्यश्वरूपाणि शब्दादीन् रथवर्त्मना। मनः प्रगट रूपेण बुद्धिः सारथिरूपतः। सर्वमन्यत्तथाक्लृप्तं तवोप करणात्मना। इति साष्टाङ्गं प्रणमेत्।। तथा षडङ्गन्यासं पूर्ववद् विधायध्यात्वा अष्टोत्तर सहस्त्रं मूलमन्त्र जपेत्।। मूलमन्त्रं जपेन्मन्त्री अष्टोत्तर सहस्त्रकमितयुक्तेः। पुनः षडङ्गन्यासं विधाय ध्यात्वा चुलुके उदकमादाय गुह्याति गुह्य गोप्ता त्वं गृहाणास्मत्कृतं जपम् सिद्धिर्भवतु मे देव त्वप्रसादान् महेश्वर। इति देव दक्षिण हस्ते जपं निवेदयेत्।। ततो ऐशान्यां चतुरस्त्रमण्डलं कृत्वा

तत्र चण्डेश्वराय नमः इति निर्माल्यं विसृज्य देवं दण्डवत् प्रणिपत्य प्रदक्षिणी कृत्य क्षमापयेत्। अपराधो भवत्येव सेवकस्य पदे पदे को परः क्षमते लोके केवलं स्वामिनं विना इति क्षमाप्य तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे।। इति सम्प्रार्थ्य चुलुके उदकमादाय ॐ इतः पूर्वं प्राण बुद्धि देह धर्माधिकारतः जागृत स्वप्न सुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पदभ्यामुदरेण शिश्ना यद् स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। मां मदीयं सकलं शरभाय ते समर्पये।। ॐ तत्सत् इति देव दक्षिण हस्ते समर्प्यं शंखमुद्धृत्य देवोपरि परितः परिभ्राम्य मूलान्ते "साधु वा साधु वा कर्म यद्यदा चरितं मया तत्सर्वं कृपया देव गृहणाराधनं मम।। इति किंचित् शंखजलं देव दक्ष हस्ते दत्त्वा शंख यथा स्थाने संस्थाप्यतत्सलिलेनात्मा नमभ्युक्ष्य आवरण देवताः शरभांगे लीनाः सन्तु इति पुष्पाञ्जलिनावरणदेव देवताः शरभांगे लीनाः विभाव्य याहि याहि परम स्थानं स्व स्थानं परमेश्वर। यद्ब्रह्म प्रमुखा देवाः न विदुः परमं पदम्।। इत्युच्चार्य संहारमुद्रया निर्माल्यपुष्पमाघ्राय तद्वारा परमं महः स्वहृदये लीनं भावयेत् ततः पादोदकं पीत्वा नैवेद्यमन्यस्मै भक्ताय किञ्चिद् दत्त्वा किञ्चिद् स्वयं स्वीकृत्य निर्माल्यं शिरसा धृत्वा यन्त्राधिकरण भस्म भूतादि निवारणाय पात्रान्तरे धारयेत् यन्त्राधिकारण भस्मना फलमाहः भस्मनागमनं श्रुत्वा कम्पन्ते व ग्रहग्रहाः

किं पुनर्दर्शनादार्ये भूतप्रेतादि राक्षसाः।। ततो यथा सुखं विहरेदिति शिवः शरभार्चा पारिजाते राकृष्ण विनिर्मिते नित्यार्चन नामोदभुतः प्रथम स्तवकोऽगमत्। इति श्रीमद्वाय देवसूरिसूनुरामकृष्णदेवकृते शरभार्चा पारिजाते प्रथम स्तवकः।।

अथ नित्यार्चनस्य मन्त्रमूलमुक्त्वा तदनुक्तौ अपरितोषः इति तत्परिहाराय मन्त्राः विब्रियन्ते शरभतन्त्रे।।

तारं प्रथममुच्चार्य खें खां खं फडनन्तरं। प्राणग्रहासि द्वितयं हुं फट्तु तदनन्तरम्।। शरवेति पदमुक्त्वातु शत्रु संहारणायुत शरभ शालुवायेति पक्षिराजाय इत्यपि। हुं फट् स्वाहेति मन्त्र तु द्विचत्वारिंशदक्षरम्। जपेद्वर्ण सहस्राणि संख्ययातु महेश्वरि दशांशं तर्पणं होम शताशं द्विज भोजनम्। सहस्रांशं यथा देवि क्रमादेवं समाचरेत्।। अस्यार्थः। तारः प्रणवः स्पष्टमन्यत् जपेद्वर्ण सहस्रांणि इत्यादिना चतुरंगं पुरश्चरणं सूचितं अतः पुरश्चरणस्य जपः प्रथममंगं तर्पणं दितीयं होमस्तृतीयं ब्राह्मण भोजनं चतुर्थ अन्यत्र पञ्चांगं तद्धेतुरंगता इति विशेष बोधयितु जपाद्दशांशं तर्पणम्। तद्दशांशो होमः इत्यपि बोधयितुं दशांशं तर्पणं इत्याद्युत्पस्यते। शतांशं द्विज–भोजनं इत्यस्य तर्पणस्यातिशयो बोध्यः। सहस्रांशमितितु अशक्तस्यानुकल्पः। स्पष्टञ्चैतद् अभ्यधायि शवासनं नवम पटले पुरश्चरण द्वयोत्तरं प्रयोग सिद्धः तदुक्तं तत्रैव एवं प्रयोग सिद्धार्थ

पुरश्चर्याद्वयं चरेत्।। ततः स्वेच्छया प्रयोगांश्च भूत वैरिषु कारयेत् इति।।

## होमे विशेषः

स्वगृहे दक्षिणे भागे कल्पिते अस्त्रकुण्डे स्वसूत्रोक्त विधानेन आज्यभागान्तमाचरेत् तत्र दूर्वां, गुड़, चित्रां, तिलं, लाजं, पायसं, अपूप, यवाज्यं च क्रमात् सौम्ये समाहुँनेत्। अपमार्गञ्च वह्निं च खदिरञ्च कटुत्रयम्। सैन्धवं सर्षपंचाज्यं हुनेत् क्रौर्ये क्रमात् सुधीः।। इति पुरश्चरणे तदा तस्य शर्करायूत पायस होमः। तद्दशांश हुनेत् देवि पायसं घृत शर्करा। इति वातुलात् त्रिभिः पुरश्चरणैः सर्ववश्यं चतुर्भिः महाबुद्धिः लक्ष जपेन सर्वस्त्रीणा–माकर्षणम्। लक्षचतुष्केन बृहस्पतिसाम्यं पञ्चभिर्लक्षैः स्मरणादेव रिपुसर्पादीनां नाशः। षड्भीरिपुरोग नाशः। सप्तभिर्वरुणतवम्। अष्टभिर्धनदत्वं नव लक्ष जपेनासाध्य साध्यकत्वं दशभिर्लक्षैः सुरेशत्वं एकादशलक्षं जपतो निग्रहानुग्रहो वादिनः स्यात्। द्वादश लक्षेण दाशरथित्वं षोडशलक्षैर्नारायणत्वं तत्कोपादर्धयामेन भूतादयः स्थावराः जंगमाश्च नश्यन्ति। पञ्चविंशति लक्षेण पञ्चवक्त्रो भवेत्। पञ्चाशल्लक्ष जपेन साक्षात् ब्रह्मस्वरूपो भवेत् अतः परंफलं नास्ति। स्वात्मलाभादिति श्रुतेः। गीर्वाणेड्यां तु मन्त्रान्तरमुक्तम् ॐ नमोष्टापादाय सहस्रबाहवे द्विशिखे त्रिनेत्राय द्विपक्षाय अग्निवर्णाय मृग विहंगरूपाय वीर शरभेश्वराय ॐ ऋष्यादि पूर्ववत्

त्रयोदशाष्ट चतुः पञ्चाष्ट नव वर्णाः अंगानि ध्यानम्:-

अष्टांघ्रिश्च सहस्रबाहुरनल प्रख्यः शिरोयुग्मभृत् वि:त्र्यक्षोऽति जवो द्विपुच्छ उदितः साक्षान्नृसिंहापहा। अर्द्धैनापि मृगाकृतिः पुनरथाप्यर्द्धेन पक्ष्याकृतिः। श्री वीरः शरभः स पातु सुचिरं नीत्वा सदा मां हृदि।। पुरश्चरणं पूर्ववत् क्षीरौदनेन होमः इति। वातुले मन्त्रान्तरान् आदौ तारं समुच्चार्य खें कारत्रय संयुतं खकार विन्दु युक्तञ्च घ्रसौः शब्दं तथोच्चरेत् घ्रसिं शब्द समुच्चार्य कवचास्त्रं तथोच्चरेत्। शरभेति पदमुच्चार्य पुनः सर्व पदं वदेत्।। पुनः शत्रु पदं चोक्त्वा संहारेति पदं वदेत्। कारिणे पदमुच्चार्य शरभ शब्दं तथोच्चरेत्।। शालुवायेति पदं चोक्त्वा पक्षीति पदमुच्चरेत् राजायेति पदं चोक्त्वा हुं फट् स्वाहा समन्वितम् मन्त्रोऽयं शालुवाख्यस्य सर्व काम फलप्रदः। एकोन चत्वारिंशद्वर्णात्मकोऽयं महामनुः।। छन्दोऽति जगती प्रोक्तं वामदेवो ऋषिस्तथा कवचास्त्र हुं फट् अन्यत् पूर्ववत्।

**मन्त्रान्तरम्:-**

तारं सकारान्त सरेफयुक्त वामेन कर्णेन च बिन्दुयुक्तम्।
एतन्महारौद्रमयं सुवीजं पाशाकुशेनान्तरितं च कृत्वा।।

हुंकारश्च पुनस्तारो मन्त्रश्चैव षडक्षरः। सकारान्तो हकारः स इति स्वरूप रेफश्च तैर्युक्तं वा कर्ण षष्ठस्वरः विन्दुश्च त युक्त तेन ह्यमितिकेचित् अन्येतु सकारान्तेन हकारेण सह सहिते रेफेण च युक्तमित्यादि व्याचक्षते

तन्मते हुं इति पूर्वेण प्रणवः ततः पाशबीजम् ततो रौद्रवीजम्, ततो अंकुश बीजं ततो हुं प्रणवस्येति षडक्षर इत्यर्थः ब्रह्मा ऋषिः छन्दो गायत्री पक्षिरूपिशालुवो देवता ॐ बीजं हुं शक्तिः क्रौंक्रीलकं षड्भिर्वर्णैषडंगानि।

**ध्यानम्:-**

उग्राकारोग्रदृष्टि प्रकटितभयदं कोटि दम्भोलिघोषं ज्वालामालापटाग्रे ज्वलदनल समं हार केयूर भूषम्। हालाहाल कलङ्क रन्ध्र सहितं हंसात्मकं केशरम्। वन्देऽहं हरि पार्वती पति विरच्च्यात्मं चिरं शालुवम्।।

एवं ध्यात्वा महेशानि ऋतु लक्षं जपेत् प्रिये। तिलाक्षतेन साज्येत हुनेत्कुने करात्मके।। जपाद्दशांशं च सतर्पणं तथा, हुनेद्दशांशं च सतर्पणैस्तथा विप्रान्नदः षड्रस युक्तभोजनैः शतं सषट्कं समभक्ति पूर्वकम्।।

एवं कृते मन्त्र सिद्धिः ततः षट्कर्माणि साधयेत। माघे कपिला क्षीर भुक् लक्षं जपेत् गोघृतेन होमः क्षीरान्नैर्विप्र भोजनम् एवं कृते चिन्तितार्थप्राप्तिः। कार्तिके अर्क लक्ष जपात् दशांश बिल्व फल होमाद् विप्र भोजनादतीतानागत ज्ञानम्। आश्विने चतुर्विंशति लक्ष जपात् पूर्वोक्त होमार्दिना यक्ष गन्धर्वादीनां दर्शनम्। तैः सह संवादश्च माघमारभ्य श्रावण पर्यन्तं कोटि जपादिनाशालुवः प्रसन्नो भवति अखिलां सिद्धिं विन्दति। अथ मन्त्रान्तरम्।

तारं पाशं रुद्र एकाक्षरीं तां माया बीजं क्रोड बीजस्य

युग्मं वर्मास्त्रान्ता शालुवाष्टाक्षरीयं इति परा ॐ माया ह्रीं क्रोड बीजं हुं वर्मास्त्रे हुं फट् ब्रह्माऋषिरनुष्टुप् छन्दः पक्षिरूपी शालुवः सदाशिवो देवता हुं बीजं ह्रीं शक्तिः हुं कीलकं इति।

ओंकार मूर्ध्नि विन्यस्य पाशं मूर्ध्नि ततोन्यसेत् रुद्र बीजं शिखां न्यस्य माया बीजेन कवचम् वराहत्रय त्रिनेत्रेषु अस्त्रे अस्त्रं प्रकल्पयेत्।

**ध्यानम्**:-

चन्द्रार्कायुत कोटि कान्ति सहितं चण्डीश संसेवितं। खण्डेन्दूज्वलशारदा पति संदाससेव्यमानं मुदा। हृत्पद्मान्तर कर्णिकन्तर चरद्भासं महाभीषणं। संसेवे सकलार्थदं मुनिपतिं श्री शालुवं सिद्धिदम्।। एवं ध्यात्वा महेशानि अष्ट लक्षं जपेन्मनुं। पूर्वोक्तं नियमेनैव पूर्वोक्ताचार संयुतम्।। गोमूत्रेण चरुं कृत्वा भक्षयेच्च समान्त्रिकः। एवं कृत्वा पुरश्चर्यां हुनेत् विल्व फलेन तु। ब्राह्मणान् भोजयेत् पश्चात् दक्षिणाभिश्च तोषयेत्। मन्त्र सिद्धिर्भवेत्तस्य शिवस्य वचनं यथा।। मन्त्रान्तरम्:-

ॐ नमः पादमाभाष्य ततो भगवते पदं खेंकारत्रयमुच्चार्य घ्रसीं शब्दं तथोच्चरेत्। घ्रसौः शब्दं तथोच्चर्य शरभेति पदं वदेति।। शालुवाय पदं चोक्त्वा पक्षिराजाय चोच्चरेत्। सर्वशत्रुपदं चोच्चरेत् संहार पदमुच्चरेत्। कारिणे पदमुच्चार्य तत्पुरुषाय पदं वदेत्।

अघोर पदमुच्चार्य सद्योजात पदं वदेत्।। वामदेव पदं चोक्त्वा ईशानपदमुच्चरेत्। कालशब्दं तथोच्चार्य कालकण्ठेति चोच्चरेत्।। यकारं च तथोच्चार्य गरं शब्दं तथोच्चरेत्। हुं कारत्रयमुच्चार्य प्रस्फुरद्वितयं वदेत्।। उग्रोग्र तममुच्चार्य चटद्वयमथोच्चरेत्। प्रचट प्रचटेत्युक्त्वा बन्धयुग्मं ततो वदेत्।। घातय द्वितयं चोक्त्वा विदारय युगंवदेत्। शरभ शालुवेत्युक्त्वाय कारस्तदनन्तरम्।। पक्षिराजाय उच्चार्य हुं फट् स्वाहा समन्वितं। शतोत्तर षड्विंशद्दर्णात्मकं महामनुः।। कालकण्ठाय इतिच्छेदः। एवमग्रेऽपि यकारात्पूर्वभागस्य उद्धारयेदिति वेदितव्यम् ऋषिर्ब्रह्मा पङ्क्तिश्छन्दः शरभ शालुवो देवता प्रणवो बीजं स्वाहा शक्तिः हुं त्रयं कीलकं द्रामित्यादिषडंगः पञ्च ब्रह्म पदैः पञ्चाङ्गं कुर्यात् तद्यथा तत्पुरुषाय नमः हृदयाय नमः अघोराय नमः शिरसे स्वाहा सद्योजाताय शिखायै वषट् वमदेवाय कवचाय हुं ईशानाय अस्त्राय फट्।

**ध्यानम्:-**

स्फटिकाभं चतुर्वाहुं ज्वालापदसमन्वितं। पञ्चवक्त्रं महाभीमं त्रिपञ्च नयनैर्युतम्।। प्रथमं शालुवं वक्त्रं द्वितीयं शङ्करस्य तु। तृतीय वैष्णवं वक्त्रं चतुर्थं ब्रह्म संभवं। अघोरं पञ्चमं वक्त्रं महाशम्भु स्वरूपिणम्।। एवं ध्यात्वामहेशानं जपं कुर्याद्विधानतः।। अयुतन्तु पुरश्चर्या वीरभद्रालयं प्रिये।। ततो लक्ष जापि वीक्षणादेव भूत प्रेतादि दुष्टान् नशयति।

दुर्गालये द्विलक्षजपात् त्रैलोक्य वशम्। अथापरो मन्त्र।

ॐकार पूर्वमुच्चार्य बालायास्त्र्यक्षरी तथा। वितरिणी त्रयो वर्णा हुंकाराणां त्रयं तथा।। शालुवाय ततोच्चार्य हुंकारत्रयमेव च। वह्निजाया समायुक्तो मन्त्रो ज्वरहरस्तथा। पूर्व प्रयोग शान्त्यर्थं नित्यं दशशतंजपेत्।। अस्य प्रयोगः। माष, मुद्ग, मसूर, कुलत्थ, चणक, शालि, गोधूम, कार्पाश्मस्थि, यावनाला, इति धान्य नवकं संगृह्य तत्समं भस्म चादाय मिश्रीकृत्य तत्सर्वं ताम्र पात्रे स्थापतित्वा अष्टोत्तर सहस्त्रं अष्टोत्तर शतं वाभिमन्त्र्य ज्वर भूत प्रेत ग्रहादि गृहीतं धारयित्वा आवेशय आवेशय रुद्रो ज्ञापयति इति मन्त्रं भूर्ज पत्रे ताम्र पात्रे वा लिखित्वा तदासनाधः क्षिप्वा तदासने भूतादि गृहीतमुपवेश्य धान्य निसृद् भस्म तच्छरीरे सिञ्चन् अष्टोत्तर सहस्त्रमष्टोत्तर शतं वा जपेत् यदि आवेशो भवति मुच्यते। अथ मन्त्रान्तरम्:–

आदौ प्रणवमुच्चार्य लक्ष्मी बीजं तथोच्चरेत् भू वराह मथोच्चार्य वह्निजायामथोच्चरेत्। शरभेति पदं चोक्त्वा शालुवाय पदं वदेत्।। पुनर्मूर्ध्वं समुच्चार्य भूवराहमथोच्चरेत् लक्ष्मी वीजं समुच्चार्य वाराहं बीजमुच्चरेत्।। भुवनेशीं तथोचार्य प्रणवान्तं तथोद्धरेत्। एवं शावर शाल्वाख्यं महामन्त्रं कुलेश्वरि देवः शरभ शाल्वाख्यः साक्षाच्च त्रिपुरान्तकः न्यास ध्यानादि रहितः सर्व सिद्धिप्रदस्तथा। पूर्व मेवायुतं जप्त्वा ततः सिद्धिर्भवेत् ध्रुवम्।। भूवराहं हूं लूँ

वराहं हूं मूर्धा स्वाहा ॐ श्री ह लूँ स्वाहा शरभ शालुवाय स्वाहा ह लूँ श्रीं हूं ह्रीं ॐ। न्यास ध्यानाद्यष्य नास्ति सिद्ध मन्त्रत्वात्। एतस्य संजीवानार्थं अयुत। जपः। कृष्णाङ्गार चतुर्दश्यामारभ्य भौमवार पर्यतं रात्रौ वृष शून्य शिवालये कार्यः पुनः प्रयोग सिद्ध्यर्थमयुतं जपेत् अष्टोत्तर शतवारमभिमन्त्रित भस्म मिश्र शालिना शरीरे शत कृत्वः प्रक्षेपात् भूत प्रेतादिनाशः नद्यादि जलं ताम्र पात्रे गृहीत्वा वाम हस्ते कृन्वा अष्टोत्तर शत कृत्वःत्रिंशत्कृत्वः त्रिसप्तकृत्वो वाभिमन्त्र्य पानात् गुल्मोदर गत शूलादि व्याधिनाशः।। पञ्च वाराभिमन्त्रित जलेन नेत्रं क्षालनात् तद्रोग नाशः।। ज्वरार्तं मूर्ध्नि हस्तं दत्त्वा अर्के भौमे भृगौवा सन्ध्या काले ध्यान पूर्वकं त्रिदिनमष्टोत्तर जपाज्ज्वर नाशः एवं मध्याह्ने सूर्योदये वा त्रिदिनं करणाच्छीतज्वर नाशः। एवमेकादश लवङ्गानि चतुर्दशीमारभ्य प्रातःकाले शतवाराभिमन्त्रितानिभक्षयित्वा तदुपरिपलमात्रमुष्णं जलं प्राशयेत्। यथायथं सप्ताहात् पक्षात् मासात् मण्डलाद्वा सर्वे दुष्ट वातरोगाः नश्यन्ति त्रिकालमेकंकालं अभिमन्त्रणात् पक्षेण व्रणरनाशः। ताम्र पात्रेण नवं जलमानीय ध्यान पूर्वं शतावृत्याभिमन्त्र्य सर्प दंष्ट्रं प्राशयेत् अभिमन्त्रितं भस्म च धारयेत् स्वस्थो भवति। नील्यर्काकोलजं मूलं पेषयेद्वारिणाप्रिये। त्रिसप्तधाभिमन्त्र्यार्थ प्राशयेत् विषवान्नरः। तत्क्षणान् नाशमाप्नोति गरं दारुण सर्पजम्।। बदरी काष्ठं

द्वि सहस्त्रवारमभिमन्त्र्य तत् स्पर्शनात् वृश्चिकादि विष नाशः। शावर शाल्व मन्त्रेण ब्राह्मे मुहूर्त्तें च पार्वति। अश्वत्थं कोमलं पर्णं मौनी भूत्वा तु भक्षयेत्। एवं सत्यर्क वारं तु विधिवद्भक्षयेत्प्रिये।। तस्य वाक्येन भोदेवि वृश्चिकस्य विषं हरेत्। देवागारे श्मशाने च जीर्णे कूपे नदी तटे।। वृक्षाग्रे सन्ति ये सर्पास्तद्दंशे नैव भेषजम्। धन्वन्तरिर्हरिर्ब्रह्मा न जानन्ति प्रतिक्रियाम्।। पादे षृष्ठे च मेढ्रे च नाभि नासिकयोरपि। ब्रह्म स्थाने च जिह्वायां यदि सर्पश्च दंशति। न कुर्यात्तस्यकृत्यञ्च न जीवति कदाचन।। विंशति वाराभिमन्त्रित जल प्राशनादजीर्ण नाशः। गृहे एक विंशति वाराभिमन्त्रित भस्म प्रक्षेपान्मशक नाशः।। अथ फल विशेषावात्तये ऋग्विशेषा उच्यन्ते यस्मान्नरो धनाकांक्षी तत्समीपे जपेदिमाम्। केतुं कृण्वन् ऋचं मन्त्रंशतोत्तर सहस्त्रके। स्वयमेव स सन्तुष्टः तस्मै सर्वं ददाति च।। धनं स सहसालब्ध्वा सुखी भवति निश्चितम्। विजने कानने घोरे राज चौरादि संकटे। अभि व्यये स्वेति ऋचं जपेत्तदभीति शान्तये।। संग्रामे तुमुले प्राप्ते बलं धेहीत्यृच जपेत्। संक्रन्दनंबलं प्राप्य सहसा विजयी भवेत्।।

संग्रामे च तथा युद्धे शत्रूणां माययावृते। वयः सुपर्णेति ऋचं जपेदष्टोत्तरं शतम्।। तरसा वैरिणां मायां क्षपां सूर्य इवोदये। जपित्वा स्वभावेन स मन्त्री विजयी भवेत्।। निम्नगातरणे काले उदगादित्यृचं जपेत्। महाग्राहयुतां घोरां

नदीं तीर्त्वा सुखं व्रजेत्।। विजिहीर्षेति सूक्तेन शतवाराभि मन्त्रितं। तत्तैलं पाययेद्देवि सा नारी सूयते द्रुतम्।। प्रथमे पञ्चमे मासि तृतीये सप्तमे तथा। यदा पीते तदा नारी तत्क्षणादेव सूयते।। व्यतीत काले संप्राप्ते विपिने निवसेद्यदि। यूयमस्मानिति ऋचं जप्त्वा शय्या निवेशने।। तत्रैव काननाधीशो रक्षत्वनिशमम्बिके। तस्मात्सर्व प्रयत्नेन लभेत्सौख्यं जपेत्सदा।। विष्णुरित्यादि सूक्तेन नारीणां पुत्रसिद्धये। सहस्रवारं संमन्त्र्य तदाज्यं प्राशयेच्छिवे।। एवं दिनत्रयं कुर्यात् मासादत्र फलं लभेत्। तदादि रक्षा कर्त्तव्या नारीणां गर्भ वृद्धये।। गणानांत्वेत्यृचं जपेद्विघ्न निवृत्तये। तस्य विघ्नभयंनास्ति जाग्रत्स्वप्न सुषुप्तिषु।। वृहत्सामेत्सृचा मन्त्र्य रक्षां सम्मार्ज्य पार्वति। तद्रक्षाधारणं कुर्यात् जङ्गमाङ्गे वरानने।। तथा विधं समालोक्य यक्ष गन्धर्व राक्षसाः। बहुसोयमितिमाशङ्क्य सन्निकर्षं न यान्ति ते।। भूत प्रेत पिशाचानां किं सर्व ग्रहादिनाम्। नाराणां हीतराणां च जङ्गमानां वरानने।। इति एताश्च ऋचः सिद्ध मन्त्रस्य फलदाः महापुरश्चरणानन्तरं मुक्तत्वादिति शिवम्।।

शरभार्चा पारिजाते रामकृष्णविनिर्मिते मन्त्र भेदामोदभृतो द्वितीयः स्तवकोऽगमत्।। इति आर्यदेव सूरि सूनु कृते शरभार्चा पारिजाते द्वितीयः स्तवकः।।

अथ सङ्गदावरणदेवता मन्त्राः केचन लिख्यन्ते तत्रादौ भैरवप्रपञ्चसरसंग्रहे अघोर ऋषिःविराट् छन्दः भैरवो देवता

भं बीजं फट् शक्तिः भामित्यादि षडङ्गः कालाम्बुदश्यामलमान तास्यं करालमव्याहतप्रमेयम्। लोलालकं लोक विनाश हेतुं लुण्ठद्रिपुं नौमि धृताट्टहासम्।। ॐ नमो भगवते उग्र भैरवाय सर्व विघ्नान् नाशय ठः, ठः, स्वाहा। चतुर्विंशति सहस्त्र जपः। अनल भुवनमध्ये शक्ति बीजं फडर्णं हरि हर जप हुं फट् चाष्ट कोणे ससाध्यम्। वह्हिरपि वसुपत्रे मूलमन्त्रत्रिवर्णान् भुवमथलिपिवीतं भैरवं वैरि वज्रम्।। अस्यार्थः प्रथमं त्रिकोणं तन्मध्ये ह्रीं फडिति तद्वहिरष्ट कोणं तत्कौणेषु।

हरि हर जप हुं फडिति लिखेत् तद्वहिरष्टदलेषु मूलमन्त्रस्य त्रीन् त्रीन् वर्णान् तद्वहिः चतुरस्त्रं मातृकया वेष्ट्य भैरवं वह्नि कोणे समर्थयेत् अष्ट कोणेषु भैरव्यै नमः, अघोराय नमः स्कन्दाय नमः विष्णवे नमः।दक्षिणवे नमः। दक्षिणामूर्त्तये नमः। चण्डोदण्ड गणेशाय नमः आपदुद्धारणाय नमः यथाक्रममर्चयेत् दलान्ते अष्ट मातरः यजेत्। नरान्तकाय नमः भीमाय नमः विजयाय नमः रक्त भैरवाय नमः इति प्रतीच्यादि दिक्षु पूजयेत् इति भैरवार्चाविधिः। अथसिद्ध भैरव मन्त्रस्य शंकर ऋषिः संस्कृति छन्दः सिद्धः भैरवो देवताभं बीजं श्रीं शक्तिः मोहने विनियोगः। भामित्यादि षडङ्गः।

जलद पटल नीलं दीप्यमानोग्रकेशं। त्रिशिखडमरुहस्तं चन्द्र लेखावतंसं।। विमलवृष निरूढं चित्रशार्दूलवासः।

विजयमनिशमीडे विक्रमोद्दण्ड चण्डम् ॐ।। नमो भगवते विजय भैरवाय प्रलयान्तकाय महाभैरव्यै महाभैरवाय सर्व विघ्न निवारणाय शक्तिधाराय चक्रपाणये वटमूलसन्निषण्णाय अखिल गणनायकाय आपदुद्धारणाय आकर्षय आकर्षय आवेशय आवेशय मोहय भ्रामय भ्रामय भाषय भाषय शीघ्रं भाषय ह्रां ह्रीं त्रिपुर ताण्डवाय अष्ट भैरवाय भाषय भाषय स्वाहा। शान्तं त्रिमुखमालिख्य तेन संवेष्टय सर्वतः। अथ शूलं द्वि पार्श्वे च यन्त्रां विजयमद्भुतम्। एवं यन्त्रं लिखित्वातु मन्त्रेनानेन मन्त्रयेत्। भस्म दर्शन मात्रेण क्षणा दावेशमाप्नुयात्।। त्रिविन्दुनि उक्तं षकारं विलिख्य अन्तिम विन्दु रेखाग्रेण परितः संवेष्ट्य पार्श्वयोः शूलद्वयं विलिख्य तद्यन्त्रं भस्मनि विलिख्य भैरव मन्त्रं जपित्वा भस्म क्षिपेत् आवेशो भवति। अथ वडवानल मन्त्रस्य भास्कर ऋषिः अति धृति छन्दः वडवानलो देवता रं बीजं स्वाहा शक्तिः अभीष्ट सिद्धयर्थ विनियोगः। रामित्यादि षडङ्गः। त्रिनयन मरुणन्त्वां वद्ध मौलीषु शुक्लां शुकमरुणमनेकाकल्प मम्भोज। संस्थम्। अभिमत वरशक्ति स्वस्तिकाभीति हस्तं नमत कनकमालालंकृतांगं कृशानुम्।। त्वमग्ने द्युभिस्त्वमाशु शुक्षणिस्त्वमद्भ्यः त्वं भस्म परित्वं वनेभ्यस्त्वमौषधीभ्यस्त्वं नृणां पते जावसे शुचिः इति मन्त्रः। पञ्चाष्ट नवकोणेषु यथाक्रमं वैश्वानर मन्त्रमथ लिखित्वा रेखाग्रे शूलं च तदग्रे साध्यं तारावृत्तं वाडववह्नि यन्त्रम्।

एतद् यन्त्र समालिख्य लोहे ताम्रे च शीशके। आवाह्य पूजयेद् वह्निमाग्नेयाभिमुखोऽम्बिके।। पञ्चाष्टकोणं चत्वारिंशंत्कोष्ठं त्वमग्नेद्युभिरित्यादि चत्वारिंशत्वर्णाः तत्सख्य कोणेषु यथा क्रमं विलिखेत्। शत्रवस्तान् संहराग्ने त्वं तेदगेहं दह सत्वरं फट् स्वाहा इति मन्त्रः अनेनैतद् मन्त्रं तु सपल्लवं जपेन्नूनमष्टोत्तर सहस्त्रकम्। दग्ध योगे खानेद्रात्रौ श्मशाने बलिपूर्वकम्।। ततस्नात्वाजपेन्मन्त्रमष्टोत्तर सहस्त्रकं। तत्पश्चाद्वैरिवेश्मानि निर्दग्धानि भवन्ति हि।। मन्त्रान्ते हुं फडादिस्तत् क्रियोचितपदयोजनम् पल्लव इत्युच्यते। तत्पश्चादुपसंहारः कर्त्तव्यश्च वरानने। तदर्थं मन्त्रश्चसविता ऋषिः अत्यष्टि छन्दः अग्निर्देवता ह्रीं बीजं स्वाहा शक्ति उपसंहारे विनियोगः। मन्त्रपदैःपूर्वोत्तरार्द्धैः षडङ्गानि। ध्यानम्:–

सशराय सशार्ङ्गाय शक्ति हस्ताय वह्नये। कपालिने नमस्तुभ्यं मत्पापं दहमुञ्चतम्।। ॐ भूर्भुवः स्वः अग्नि रस्मि जन्मना जातवेदा घृतं मे च क्षरमृतं म आसन् अर्कस्त्रिधानृजसो विमातो जस्त्रो धर्मों हविरस्मि नाम भूर्भुवः मत्पापदं दह मुञ्चतं स्वाहा। जपेदष्टोत्तरशतं ब्राह्मणान् भोजयेत्ततः। अथाग्नेयास्त्र मन्त्रः। अस्य मन्त्रस्य परब्रह्म ऋषिर्देवी गायत्री छन्दः वडवामुखोऽग्निर्देवता ॐ बीजं व्याहृति शक्तिः प्रणवपूर्वकाभिः अतुलोदः विलोमाभिः पदशो गायत्रीभिः करन्यासाङ्गन्यासौ। बाणाग्रकोणस्थितं एधमानं

परान् दहन्तं स्वमरीचिकोणैः। शोणाम्बरं चन्द्रकलावतंसं नमामि देवं वडवामुखाग्निम्।। शोचिष्केशाय विद्महे वडवामुखाय धीमहि तन्नः शुक्रः प्रचोदयात्। इति मन्त्रः। त्रिकोणे वह्निबीजञ्च वसुकोणेस्त्र मन्त्रकम्। पदशोवात्मके साध्यं प्राणमावाह्य पावकम्।। मनसा तरसा साध्यं पश्चादस्त्रमनुं जपेत्। वसुकोणमष्टकोणमिति। अथ व्याधि मन्त्रस्य वीर भद्र ऋषिरनुष्टुप् छन्दः शिवो देवता व्यां बीजं हुं शक्तिः व्यामित्यादि षडङ्गः। ध्यानम् त्रिपादं त्रिभुजं भीमं त्रिमूर्द्धानं त्रिलोचनं त्रिशूलाहि कपालाढ्यं ज्वालास्य वक्त्र दंष्ट्रकम्। सप्तशृङ्गं वसामाली चर्माम्बर धारिणम्। अशेषांगे वृणोद्भूत कृमिजाले समाकुलम्।। वक्त्रानासं वृहत्स्कन्धं क्षुधया पीडितोदरं। वैरिणां देहमालिंङ्ग्य भक्षयन्तं विकर्णकम्। कलाय कुसुमानीलं महाव्याधिकरं शिवम्।। चिरं ध्यात्वा जपेन्मन्त्र।। सहस्त्र रिपु दिङ.मुखः। अथ मन्त्रः। ॐ नमो भगवते रुद्राय महा व्याधि कराय देवदत्तं पीडय हुं फट् स्वाहा इति मन्त्रः। तिर्यगूर्ध्वं चतुर्दशदरेखा मध्यतो विलिखेदथ मन्त्रः। बाह्यशूल गंत तदग्र साध्यं रोगचक्रमिदं रिपुनाशनं यन्त्रम्। यन्त्रमालिख्य शीर्षे वा साध्यवृक्षोऽथवाम्बिके आराध्य–चाष्टचूर्णेन लिप्त्वा जप्त्वा खनेन्निधिः। श्मशाने बलि पूर्वं तु पुनातुत्वा जपेत्तथा जपमेवं त्र्यहं कुर्याच्छत्रूणां व्याधि वृद्धये।। अहेतुकं महारोगं रिपुः सम्प्राप्य नश्यति।

यत्साध्यं लिख्यते व्याधिस्तत्तद्ब्याधिर्भविष्यति।। तं रोगं रिपुराश्रित्य सर्वांगे नु भवेद्ध्रुवम्।। अयमर्थः। तिर्यगूर्ध्व चतुर्दश रेखा विलिख्य सर्वतो मध्य कोष्ठे मन्त्रं विलिख्य रेखाग्रेशूलानि विलिखेत्। अथ मृत्यु मन्त्रः।

नारायण ऋषिरुष्णिक् छन्दः मृत्युर्देवता ङं बीजं ह्रैं शक्तिः जीव संहारेविनियोगः। ङामित्यादि षडंगः। रक्तास्यं भीम दष्ट्रं प्रकटित वदनं वक्रनास कराब्जैः। शूलं पाशं कपालं फणिमुसजल हलं वज्र खेटं वहन्तं। भीम कालाभ्रनीलं भृकुटित नयनं सैरिभ–स्कन्धरुढं। नाना भूतैः करालैः परिवृतमखिलं प्राणिकालं भजामि।। ॐ नमो भगवते मृत्यवे यमाय सर्व जीव हरणाय उग्राय दण्ड हस्ताय ङं ह्रैं देवदत्तं गृह्ण सर्व लोक भयङ्कराय नाशय२ ह्रैं ह्रूं फट् स्वाहा। इदं काल मन्त्रं निशामध्ये प्रातः पुनः जप्त्वा जपेत् ततो मन्त्रं सहस्र नाम पूर्वकं तज्जपस्यावसाने तु स रिपुर्मरणं लभेत्। अथ रक्त चामुण्डा मन्त्रः। शङ्कर ऋषिरनुष्टुप्छन्दः श्रीं वीजं ह्रीं शक्तिः श्रीं हृदयं ह्रीं शिरः श्रीं शिखा ह्रीं कवच श्रीं नेत्रं श्रीं अस्त्रं इति षडंगः।।

रक्ताभां पीतवस्त्रां स्मितमुखकमलामिन्दुरेखावतंसाम्। दिव्यैर्माणिक्यमुक्तामणिगणखचितै र्भूषणैर्दीप्यमानाम्। पौण्ड्रेक्ष्वीष्वासबाणारिजलज सुभुजां फुल्लपद्मायताक्षीम्। चामुण्डां रक्ततुण्डां रिपुकुलमथिनीं शाकिनीं भावयामि।। श्रीं ह्रीं फट् रक्त चामुण्डेश्वरि शत्रुजीवविनाशिनि एह्येहि

शीघ्रं इष्टानाकर्षय२ स्वाहा। अक्षर सहस्त्रं जपः। अथ मोहिनी मन्त्रः। ईशान ऋषिर्जगती छन्दः मोहिनी देवता ऐं बीजं ह्रीं शक्तिः क्लीं कीलकं मोहने विनियोगः। ऐं ह्रीं हृदयं ऐं ह्रीं शिरः इत्यादि षडंगः।

भुवन विजय दक्षा पुष्पवाणेक्षुचापा जगति विविध रूपं दर्शयन्ती जनानाम्। तरुणतरणि शोभा श्वेतवासो वसाना जयति निखिललोकान् जीवनी मोहनीयम्।। ऐं ह्रीं क्लीं ॐ नमो भगवति महोमोहिनि महामाये सर्वलोक वशङ्करि देवदत्तस्य वाक्चक्षुश्चित्तं मोहय मोहय नानारूपाकृतीः शीघ्रं दर्शय दर्शय ह्रीं स्वाहा। पञ्च सहस्त्रं जपः। पञ्चकोणं लिखेच्छक्ति मध्ये बीजेन वेष्टयेत्। पञ्चकोणे लिखेच्छक्ति बाह्ये साध्य समन्वितम्। देवदत्तामुखो यन्त्रां दर्शयन्प्रजपेन्मनुम्। जङ्गमाजगमानाञ्च देवभूतादिरक्षसाम्। पुरतो विविधं रूपं दर्शयन् विस्मयो भवेत्।। अथ लक्ष्मी मन्त्रः। वामेशऋषिः वृहती छन्दः श्रीर्देवता श्रां श्रीमित्यादि षडंगः।

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी। गंभीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया लक्ष्मी र्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भैर्नित्यं सा पद्म हस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता।। ॐ श्रीं क्लीं महा लक्ष्मि महालक्ष्मि एह्येहि सर्व सौभाग्यं देहि मे स्वाहा। चतुर्विंशति सहस्त्रं जपः। त्रिकोणेषु त्रिबीजं स्याद वसुकोणे

परं लिखेत् त्रयोदश दले शेषं बाह्ये पञ्चाशदर्णकम्। लक्ष्मी बीजावृतं यन्त्र सर्व सौभाग्य दायकम्।। पञ्चाशदर्ण मातृका। अथ मायामन्त्रः। अस्य मंकणऋषिः उष्णिक् छन्दः माया देवता ह्रीं बीजं ह्रीं शक्तिः मायाकरणे विनियोगः। ह्रांमित्यादि षडंगानि। माया पदेन जगतोविवशञ्चमोहं मायाकुतूहल मनोरथ माकरोति। नारायण प्रियतमा सुतमालनीला शूलायुधा विजयते तुरगाधिरूढा।। ह्रीं महामाये जगन्मोहिनि सर्वजनवांङ्.मनः कायचक्षुः श्रोत्रघ्राण प्राणान् मोहय२ स्वेच्छा कुतूहलं शीघ्रं दर्शय ह्रीं स्वाहा पञ्चाशत सहस्त्रं जपः। दर्शनादर्शनञ्चैव तथा दर्शनदर्शनम्। मन्त्रस्मरण मात्रेण भवेदेव न संशयः।। अथ पुलिन्दिनि मन्त्रः। शङ्कर ऋषिरनुष्टुप् छन्दः पुलिन्दिनि देवता ईं बीजं स्वाहा शक्तिः प्रसादे विनियोगः। ईं इत्यनेन षडङ्गः।

**ध्यानम् :-**

वर्हापीडकचाभिराप्तचिकुरां बिम्बोज्वलच्चन्द्रिकां गुञ्जाहारलतां भुजालिविलसत् ग्रीवामधीरेक्षणाम्। माकन्दद्रुम पल्लवारुणपटामर्द्धेन्दु बिम्बाननाम्। देवीं दिव्यमयीं प्रसन्न वदनां ध्यायेत्किरातीमिमाम्।। ईं नमो भगवति श्री शारदा देव्यन्त्यन्तातुल भोयं देहि देहि एह्यागच्छागच्छान्तुकं हृदिस्थं कार्यं सत्यं ब्रूहि पुलिन्दिनि ईं स्वाहा। पञ्चाशत् मात्रं जपः। कार्याकार्य विवेकाभ्यां

नित्यमष्टोत्तरं शतम्। जप्त्वा स्वपिति यस्तस्य स्वप्ने वदति साम्बिका।। साधकस्तद्वचः श्रुत्वा तथैव हि समाचरेत्। तस्य नास्ति भयं क्वापि सर्वकालं सुखी भवेत्।। अथ शास्तृ मन्त्रः। अस्य अर्द्ध नारीश्वर ऋषिरनुष्टुप्छन्दः महाशास्ता देवता ह्रीं बीजं श्री शक्तिः इष्ट सिद्ध्यर्थे विनियोगः। मन्त्र पदैः षडङ्गानि। आश्यामकोमल विशाल विचित्रितंतु वासो वसानमहणोत्पल दान हस्तम्। उत्तुङ्ग रक्तमुकुटं कुटिलार्द्र केशं शास्तारमिष्ट वरदं शरणं प्रपद्ये। ह्रीं हरिहर पुत्राय पुत्र लाभाय शत्रु नाशाय मदगज वाहनाय महाशास्ताय नमः त्रयस्त्रिशज्जपः। अथ संक्षोभिणि मन्त्रः। अस्य अगस्त्य ऋषिः पंक्तिछन्दः क्षं बीजं ह्रीं शक्तिः सर्व संक्षोभणे विनियोगः। क्षामित्यादि षडङ्गः। शिवापञ्चमुखारूढ़ा परिधासिकराम्बुजा सर्वारि हृदिक्षोभ कारणी पातु सर्वदा।। क्षां ॐ नमो भगवति अपवाद हरे महाक्रूरे सर्वशत्रुविमर्दिनिदेवदत्तमवक्षेपं कुरु कुरु स्वाहा। अक्षर सहस्त्रं जपः। मन्त्रावसानके वैरि नाममिश्रितपल्लवम्। सहस्त्रं प्रजपेन्मन्त्रं भ्रष्टचित्तो भवेद्रिपुः। शातानि मन्त्रित भस्म निखनेदष्टदिक्षु सः।। भवनं परितो मन्त्री रक्षणाय स्वकीयकम्। शत्रु तस्कर पीडा च जन्तु भूतादि पीडनम्।। समकालेऽपि नैवास्य वरण्येंनात्र संशयः तत्र पल्लवे मन्त्रान्ते हुं फडित्यादि तत्क्रियोचित तद्योजनम्। वैरिनाम मिश्रितमिति मच्छत्रु मनः क्षोभं कुरु इत्यर्थः। अथ धूमावति मन्त्रः। अस्य नृसिंह ऋषिः पंक्ति

छन्दः ज्येष्ठा देवी देवता धूं बीजं स्वाहा शक्तिः निग्रहे विनियोगः। धामित्यादि षडङ्गः।

**ध्यानम्**:- ध्यायेत्कालाभ्र नीलां विवलितवदनां काक नासाक्षिकर्णाम्। सम्मार्जिन्येकशूर्पैर्युत मुसलकरां वक्रदन्तां विषास्यां। ज्येष्ठां निर्वाणवेशां भ्रुकुटिल नयनां मुक्तकेशामुदाराम्। शुष्कोत्तुङ्गाति तिर्यक् स्तनभर युगलां निष्कृपां शत्रु हन्त्रीम्।

धूं धूमावति स्वाहा। सप्त सहस्रं जपः। ऋतु कोणस्य वृतान्तबीजं कोणे मनुं लिखेत्। कोणाग्रे शूलके साध्यं ज्येष्ठा यन्त्रमिहोच्यते। सम्पूज्य विधिवद्यन्त्रं जपित्वा तु सहस्रकम्।। श्मशाने तु निशामध्ये निखनेद्बलि पूर्वकम्। रिपुगेहेऽथवाकुर्यात् खननंबलि वर्जितम्।। भूयो जपेत् त्रिरात्रश्च तत्कालोचित दिङ्.मुखः। स्तम्भनोच्चाटनेचैव निग्रहेचित्तविभ्रमे शत्रुक्षये च विद्वेषे प्रकुर्यात्सावधानतः।। आनाभिमुखां ध्यात्वा गच्छन्तींवैरिणं प्रति। यो जपेन्निशि साहस्रं तस्य शत्रुर्विनश्यति।। ताडयन्तीं महाबेगं शूर्पेण रिपुवक्षसि। ध्यात्वाजपेत्सहस्रं तु नष्ट चित्तोभवेद्रिपुः।। मार्जयन्तीं क्षणाच्छत्रोः धनधान्यादिकं चिरम्। ध्यात्वाष्टोत्तर साहस्रं जपेद् भाग्य क्षयाय च।। दीप्यमानोल्मुके नैव दहताञ्चापि वैरिणम्। ध्यात्वा जपेत्तथा मन्त्रां स्तम्भनायाम्बिके बुधः। त्रिकोणं विलिखेत्पूर्वं तन्मध्ये बीजमालिखेत्। कोणाग्रे तु लिखेच्छूलं तच्छूलान्तरं

लिखेन्मनुम्।। तदग्रे विलिखेत्साध्यं ज्येष्ठा यन्त्रं वरानने। सम्पूजय विधिवद्यन्त्रं निशामध्ये श्मशानके। बलिपूर्वं खनित्वा तु पुनः स्नात्वा जपेन्मनुम।। अष्टोत्तराष्टसाहस्रं दृढचित्तोऽरिदिङ्.मुखः।। वैरिणस्तत्क्षणादेव यान्ति वैवस्वतं पदम्। विद्वेषे तथा देवि जपेदेकाग्र मानसः।। अन्योन्य कलहं क्षिप्रं शत्रूणां जायते ध्रुवम्। विलोमेन जपैनैव निवृत्तिः स्यात् सहस्रः।। नान्य मन्त्रैर्निवृत्तिः स्यातु प्रयत्नेऽपि कृतेऽम्बिके।। अथ चित्र विद्या मन्त्रः। संवर्त्तक ऋषिः शक्वरी छन्दः चित्र विद्या देवता ठं बीजं सूं शक्तिः इष्ट सिद्धयर्थे जपे विनियोगः। बीजशाक्तिभ्यांकर न्यासः। मन्त्रपदैः षडङ्गानि।

**ध्यानम्-**

अमलकमलमध्ये चन्द्रपीठे निषण्णा अमृत कलश वीणा भिन्न मुद्राग्र हस्ताम्। प्रणत शिरसि पूरं संस्रवन्तीं सुधायाः शरणमहमुपैमि श्रीशिवां चित्रविद्याम्।।

**मन्त्र-** वं सं ज्झ्रं ज्झ्रं जुँ ठं ह्रीं श्रीं ॐ भगवति चित्रविद्ये महामाये अमृतेश्वरि एह्येहि वरे वरदे प्रसन्न वदने अमृतं स्रावय स्रावय अनलं शौतलं कुरु सर्व विषं नाशय नाशय सर्व ताप ज्वरं हन हन सर्व पैत्योन्मादं मोचय मोचय आज्योष्ठं शमय शमय सर्व जनं मोहय मोहय माँ पालय पालय श्रीं ह्रीं ठं जुँ ज्झ्रं ज्झ्रं सं वं स्वाहा। अयुतं सहस्रं वा जपेत्। वृतमालिख्य तन्मध्ये बीज

षट्कं लिखेत्ततः।

माययाच श्रियावेष्टच मनसा साध्य मूर्धनि। तत्सुधा सिंचितं ध्यात्वा देशिकं मूर्ध्नि चिन्तयेत्। विशेत् स्पृशेद्धरेत् सिञ्चेत् चित्रविद्यामनु स्मरेत्।। कारयेद्वाखिलं चान्यैः पैत्योन्मादे तु सुन्दरी। वृत्तद्वयं समालिख्य बहिः शूलाष्टकं लिखेत्।। वृत्तमध्यष्ट बीजं च मन्त्रं तस्यान्तरालके। शुलाग्रे विलिखेत् साध्यमष्टबीजद्वयं तथा। स्पृशन्मन्त्रं द्विधा जप्त्वा वाहनाद्युपचारकान्।। कृत्वा तच्छतवारं च मन्त्री सन् चित्रविद्यया। तत्पत्रं गुडमध्यस्थं खादयित्वा प्रवेशयेत्।। पुष्पवत्सुधरेज्जन्तुं प्रविष्टं हव्यवाहनः। अष्टबीजं द्वयं चैव पितलोमानुलोमितम्।। अष्ट वीजानि मन्त्रादावुक्तानि। अथ सुब्रह्मण्यमन्त्रः। काश्यप ऋषिः त्रिष्टुप् छन्दः सुब्रह्मण्यो देवता संबीजं सां शक्तिः सां सुब्रह्मण्याय स्वाहा। ह्वत् सीमित्यादि मूलसहिसतैः अङ्ग न्यासः।

शक्ति हस्तं विरूपाक्षं शिखिवाहं षडाननम्। दारुणं रिपुरोगघ्नं भावयेत् कुक्कुटध्वजम्।। सुँ सुब्रह्मण्याय स्वाहा। त्रिसहस्त्रं जपः। अथ मन्त्रसारोक्तो बीरभद्र मन्त्रो लिख्यते। ब्रह्माऋषिरनुष्टुप्छन्दः वीरभद्रो देवता ॐ हौं वीरभद्राय ह्वत् अति क्रूराय शिरः। रुद्र कोपं संभवाय शिखा सर्वदुष्ट कवचं निवर्हणाय नेत्रं हुं फट् स्वाहा अस्त्रं। गोक्षीराभंदधानं परशुडमरूकौ खड्गखेटौ कपालम्। शूलञ्चाभीतिदाने त्रिनयनमसितं व्याघ्र चर्माम्बराढ्यं।

वेतालारूढमुग्रं कपिशतर जटावद्ध शीतांशुखण्डं। ध्यायेद्भो–गीन्द्रभूषं निजगणसहितं सन्ततं वीरभद्रम्। ॐ हां वीरभद्राय अति क्रूराय रुद्रकोप संभवाय सर्वदुष्ट निवर्हणाय हुँ फट् स्वाहा।। द्वात्रिंशदक्षरः रक्षा प्रधानमन्त्रः। द्वादशलक्षं जपः रक्तहयारि पुष्पैर्वा त्रिमधुराक्तैः कमले र्वा दशांश पुरश्चरण होमः। हयारिः वोकरं। अथ पूजाप्रसादोक्ते पीठे तत्पुरुषाय अघोराय सद्योजाताय वामदेवाय ईशानायेति। प्राग्दक्षिणोत्तर पश्चिम दिक्षु ईशमैशान्ये च पूजयेत्। निवृत्यैः प्रतिष्ठायैः विद्यायैः शान्त्यै, शान्त्यतीतायै० इति तच्छक्तयः आग्नेयादि कोणेषु शान्त्यतीतामै–शान्ये एवं प्रथमावृत्तिः। अङ्गैः द्वितीया। परशवे० डमरुकाय० खड्गाय० खेटाय० कपालाय० शूलाय० अभयाय० वरदाय० इति तृतीया। इन्द्राद्यैश्चतुर्थी। वज्राद्यैः पञ्चमी अथ प्रयोगः।

सम्पूज्यदेवमेवं जुहुयादिध्मैश्च पंचगव्याक्तैः। खर मञ्जरी समुत्थै स्त्रिशतं कृत्वादिशान्तये रात्रौ।। खर मञ्जरी–अपामार्गः।। अमुं वीरभद्रं हरिद्राभमुग्रं गदामुष्टि हस्तं करालाह हासम् समावाह्यवह्नौ रिपुस्तम्भनार्थं हरिद्रा रजोभिः सहस्त्रं जुहोतु।। प्रयोगान्तरम्।। भुजङ्गगणभूषणं भुजगतत्रिशूलाहत स्वशत्रु रुधिरोक्षितंभजद्भाल नेत्रानलं दिगम्गबरमनुस्मरन् जपतु वीरभद्रं मनुम्।। निशीथ समयेशतं सितमतिर्निहन्तुँ रिपुम्।। अथ वीरभद्र वलि प्रकारः–

अतः परं प्रवक्ष्यते मनोरमुण्य संग्रहान्। बलिक्रमो विधानतो हिताय मन्त्रजापिनाम्।।

कृत्वा गोमय सलिलैः स्थण्डिलमस्मिन्विलिख्ययन्त्रवरं, वीरेश्वरस्यभूयो रजोभिरापूरयेत्क्रमान्मन्त्री।। पीतेनमध्य मरुणेन च कोण षट्कं श्यामेन सन्धिमरुणेन दलाष्टकञ्च। कृष्णेन सन्धिमसितेन कुगह्वरं सीमाः सितेन परिपूर्य पश्चात्। अस्यार्थः– अथ यन्त्रलेखनप्रकारो पीतेन मध्यमित्यादिना अर्थादुक्तः। तत्र कर्णिकादि स्थानेषु मन्त्रवर्णानेकैकं दलेषु त्रिंशत् त्रिंशत् पुनः वलिमण्डलमस्य च दक्षिणतः प्रविधाय चतुष्षष्ठि पदं सितपाटल रजोभिरर्णा परिपूर्य च हौमिति तत्र लिखेत्। तत्र सितादि द्रव्यं खण्डक्रमेणेत्यर्थः। अस्योत्तरे पङ्कजमष्टपत्रं विलिख्य तद्वत्परितोऽष्टदिक्षु पदमानि शालीः प्रविधाय तेषु पीठादिकं तत्र निधाय तस्मिन् अरुणांशुकतण्डुलाहि यन्त्रां क्रमुकासिप्रभृती र्निधाय भूयः विधिना चरमामुपास्य सन्ध्यामथ संविदा गुरुनाथादि पञ्च अस्त्रेण तालत्रितयञ्च कृत्वा वाद्यादि बीजैरपिदेह शुद्धिः सवन्द्य देवं परिवार युक्तमावाह्य सम्पूज्य हृदम्बुजेस्वे। यन्त्रोत्तरस्थ पद्मे च शैवं पीठं प्रपूज्य कलशमपिन्यस्य च मृण्मयं यस्मिन् मलयज पुष्पाक्षतानिकूर्च च निक्षिप्य रक्ततोयैः प्रपूर्य चूतादि पल्लवान् न्यस्य तण्डुल पुष्पाण्येतानि विनिक्षिपेत्। चक्रकान् तदूर्ध्वं च रक्ततोयमिति हरिद्रा चूर्णं प्रसिद्ध चूर्ण लोहितं

तोयमित्यर्थः चक्रकेति पत्रपटुस्याक्षतम्। पुनः रक्तांशुकेन कुम्भं संस्थाप्य बाह्य बीरभद्रमिहेष्ट्वा जप्त्वा च मनुं वसु संख्यं व्यापकं ततोऽङ्गञ्च। कृत्वारक्षां च पश्चात् पाशुपतास्त्रेण मन्त्रवित्कुर्यात् पिप्पल पत्रे रक्ताः प्रतिपदमन्त्रेण कल्पिता मुद्राः। अस्यार्थ :– पिप्पलोऽश्वत्थः मुद्रा पिण्डान् इत्यर्थः प्रतिपदं प्रतिकोष्ठं पुनर्वलिं मण्डले निधाय क्रमेण सम्पूज्य मूलमन्त्रेण पूर्वोदितेषु पीठेष्वावाह्य ततः पुष्पाद्यै ईशादि पूजनीया ब्राह्माद्यामातरः क्रमादष्टौ तदनुयन्त्रवरे विधिनानलं प्रतिनिधाय परिस्तरणादिकं सकलमग्नि मुखं च करोतु तत् स्वचरणोदित वन्मनुवित्तमः आहूय विप्रौ द्वा शुद्धौ तयोरेकन्नियोज्य च साध्य संरक्षणायान्यमपि नीराजनाय च। ततः सुरक्ते परिधाय वस्त्रे जलैसमाचम्य विशुद्धिदेहः। खड्गैपरिस्तीर्य निशीत धारै द्रव्यैरभि जुहुयात्क्रमेण।।

तिल सर्षप पञ्चगव्य दुर्वा वट दुग्धान्न मयूरकाक्षतैश्च। अस्यार्थ :– पञ्चगव्यमिति एकं द्रव्यं पुनः मयूरमपामार्गः वसु संख्यमथो पृथक् घृताक्तैरपि पूर्णाहुती मन्तरामन्तराच मुद्राश्चतुषष्टि मिता पुरोक्ता सुधामया दीपकया समेता। दीपका दीपवर्तिः नीराज्य नीराज्य हुतान्ते एता संस्थाप्यास्तथेषादि पुरोवदेवम्। अयमर्थः एकैकेन द्रव्येन एकैकाहुत्यनन्तरं एकैक मुद्राया साध्यं नीराज्य ईशानादि कोणेषु एव संस्थापनीया इति। पुनः प्रतिहुतं

मनुजप कर्त्ता सुमनोगन्धान्नसंयुतो दीपं साध्यं नीराज्य ततो मूलेन विनिक्षिपेच्चरक्तोदे। अस्यार्थः- एकैक द्रव्य होमानन्तरं मनुजपकर्त्ता गन्धपुष्प धूप दीप युक्त नान्येन पिण्डेन साध्यं नीराज्य नीराज्य मूल मन्त्रेण हरिद्रा चूर्ण प्रसिद्ध चूर्ण मिलित रक्तमयोदके विनिक्षिपेदिति। अनेनाष्टौ हुत्वा परिवारं व्याहृतीभिरेकैकं हुत्वा घृतेन भूयः समापयेद्धोम कर्म विशुद्धमतिः। सम्पूज्य भूयः परिवार युक्तं गन्धादिभिस्तमसुं प्रसन्नम् आराध्य पुष्पैर्निज वाञ्छितानि सम्प्रार्थ्य चोदवास्य यथोपदेशं, मातृः समुद्वास्य शिवञ्चभूयः पुरोनिधायान्यकृतं सुरक्तम्। तारेण सम्पूज्य सदीपकान्तं नीराज्य कुम्भस्य मुखे विधिज्ञा। आवङ्मुखो रक्तजलैर्युतस्य दीपोज्वलेनापि च तेन मन्त्री। नीराज्यमूलेन पुरोवदेव निक्षिप्य संक्षाल्य करौ जलेन।। गत्वा प्राङ्गणदेशे गोमय सलिले समुद्रिये पश्चात्। कदलिकानन बुद्धया सदलां कदलीं निर्वर्ण्य फलसहिताम्। तस्या मूले पीठं निधाय चावाह्य तत्र वीरेशम्। सम्पूज्य पूर्ववत्कृत्वा आदाय च पुत्तलीं तया साध्या।।

# पक्षिराज तन्त्रम्

## आकाश भैरव कल्पोक्तम्

३

तत्र अन्येन सक्तुना वा पुत्तलीं पुनः नीराज्य पीठकायां स्थापयित्वा समज्वलैस्तथा दीपैः समलङ्कृत्य च कदली रक्तोदकमग्रतोनिधाय सुरभि समाख्यां मुद्रां संदर्श्य सुधामयं विचिन्त्य जलैः सन्तर्पयेत् पुरस्तादेकैकं पीठमन्त्रपरिवारैः मूलेनाष्टोध्र्वशतं पञ्चशतं वा सहस्र संख्यं वा सन्तर्प्यसुप्रसन्नं संचिन्त्यदेवं प्रपूज्य गन्धाद्यैः।

तत शंखतोयैः समुभ्युक्ष्य साध्यं समुद्वास्य देवं गृहाभ्यन्तरे च प्रवेश्य साध्यस्य रक्षां च कृत्वा घटरन्यादि सर्वं गृहीत्वा सशिष्यः। गृहाद्विनिष्कृष्य च चत्वरेऽथो गत्वा समुभ्युक्ष्य च तत्र कुम्भं संस्थाप्य तस्यापि च दक्षिणेऽग्निम् निधाय वह्निं परितश्च दर्भैः, सम्यक्परिस्तीर्य च भूतक्रूर, युक्तेन चान्येन वलिं च कुर्यात्। अनेन मन्त्रेण सपुष्पतोयं प्रीत्यै गणानां परितोऽष्टभिक्षु। ॐ नमो रुद्र गणेभ्यः सर्व शान्ति करेभ्यः प्रतिगृह्णत्विमां वलिं स्वाहा। वलिमन्त्रोऽयमुद्दिष्टो भूतानां प्रीतिवर्द्धनः। पललं रजनी चूर्णं लाजा दधि सक्तवश्च सन् पञ्चैते मिलितास्तु भूतक्रूरं भूतानां प्रीतिदं बुधाः प्राहुः। पललं तिलं विसृज्य वह्निम् निज रक्षणाय पञ्चाक्षरं मन्त्रं प्रजप्य तत्सर्वमग्रेऽथनिरीक्षमाणः शिष्यैः समं मन्दिरमाशुयायात् त्रिरात्रमेवं नियमेन कुर्याद्वलिं सहोमं विधिना यथावत्।। कृत्या ज्वरापस्मृति रोग नाश पिशाच भूता यदि तन्निवृत्यै।। ततः स्थण्डिलं गोमयादिभिः समालिप्य शुद्धे प्रगे वह्निमामन्त्र्य

प्रगे–प्रातः काले निधाय आज्य संस्कारमारभ्य कृत्वा स्व गृह्योक्त मार्गेण वह्निर्मुखञ्च वह्नेर्दक्षिभागे वसुपत्रं कमलं आरचय्य अत्र कलशं कशायादि जलैः प्रपूर्य चूतादि पल्लवा–न्नयस्य कषायजलंक्षीरद्रु चर्म क्वथित तोयमावाह्य अस्मिन देवं प्रपूज्य वसन द्वयेन संवेष्ट्य संरक्ष्यास्त्रेण ततो घृतेन च अष्टोत्तरं हुत्वा दुग्धाक्तेन च तावद्धुत्वा शिष्टेन भोजयेद् विप्रान्। द्वादश संख्यानपिवा वसु संख्यान् जलधि परमितानथवा समर्प्य होमकलशस्थतोयैः संसिच्य सम्पातममुष्य दत्त्वा साध्यस्य सोऽपि प्रतिपूज्यविप्रान्। सुवर्ण गोधान्य धनाम्बराद्यैस्ततो यथा शक्ति मही सुवर्णम्। धोन्वम्बरादीन् गुरवे वितीर्य, तेन प्रसन्नेन समीरिताभिःन्नराशीर्भिरिद्धः सुचिरं सजीवेत् इति वीरभद्र वलि प्रकारः।

अथ काली मन्त्रः।

क्रोधीशत्रितयं वह्नि वामाक्षि विधि भिर्युतम्। वराह द्वितयं वाम कर्ण चन्द्र समन्वितम्।। माया युग्मं दक्षिणे च दीर्घाः सृष्टिः सहक्रिया। चक्रीझिण्टीशमारूढः प्रागुक्तं बीजसप्तकम्।। मन्त्रोवह्नि प्रियान्तोयं द्वाविंशत्यक्षरोमेतः। क्रोधीशः ककारः वह्नि रेफः, वामाक्षि–ईकारः, विद्युरनुस्वारः, वराहो–हकारः, वाम कर्ण ऊकारः चन्द्रोऽनुस्वारः, दीर्धा–सृष्टिः 'क' सह्रक क्रिया, 'लि' चक्री झिण्टीश मारूढ़ः (के) बह्नि प्रिया स्वाहा। भैरव ऋषिरुष्णिक् छन्दः काली

देवता ह्रीं बीजं हुं शक्तिः क्लीं कीलकं पुरुषार्थ सिद्धयै विनियोगः। इति स्मृत्वा यथा स्थानं न्यस्य ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति षडङ्ग कुर्यात्। क्रां क्रीं क्रूं क्रैं क्रौं क्रः इति वा। अं आं इं ईं उं ऊं ऋं लृं लृं नमः इति हृदि एं ऐं ओं औं अं अः कं खं गं घं नमः इति दक्षिण बाहौ ङं चं छं जं झँ ञं टं ठं डं ढं नमः इति वाम बाहौ णं तं थं दं धं नं पं फं बं भं नं इति दक्षिण पादे मं यं रं लं वं शं षं सं हं लं क्षं नमः इति वाम पादे। ध्यानम्–सद्यश्छिन्नशिरः कृपाणमभयं हस्तैर्वरंविभृतीम्। घोरास्यां शिरसां स्रजा सुरुचिरामुन्मुक्त केशावलिम्।। सृक्कासृक्कवहां श्मशाननिलयां श्रुत्योः शवालंकृतिं। श्यामांगी कृतमेखलां शवकरैर्देवीं भजे कालिकाम्।। एवं ध्यात्वा जपेल्लक्षं जुहुयात्तद्दशांशतः। प्रसूनैः करवीरोत्थैः पूजा यंन्त्रमथोच्यते।। आदौ षट्कोणमालिख्य त्रिकोण त्रितयं ततः। पद्ममष्टदलं बाह्ये भूपूरं तत्र पूजयेत्।। ज्याख्या विजया पश्चादजिता चापराजिता। नित्या विलासिनी चापि दोग्ध्रथघोरा च मंगला। पीठ शक्तय एता स्युः कालिका योग पीठतः।। आत्मने हृदयां तोय मायादिः पीठ मन्त्रकः। अस्मिन् पीठे यजेद्देवीं शव रूपशिवस्थितां। महाकाल रता सक्तां शिवाभिः दिक्षुवेष्टिताम्।। अंगानि पूर्वमाराध्य षट्कोणेषु समर्चयेत्। कालीं कपालिनीं कुल्लां कुरु कुल्लां विरोधिनीम्।। विप्रचित्तां सु सम्पूज्य नव कोणेषु पूजयेत्। उग्रामुग्रप्रभां

दीप्तां मात्रांमुद्रां तथामित्रां पूज्याः पत्रेषु मातरः।। पद्मस्याष्ट सुपत्रेषु ब्राह्मी नारायणीत्यपि। माहेश्वरी च चामुण्डा कौमारी चापराजिता, वाराही नारसिंही च पुनरेतास्तु भूपुरे।। भैरवी महदाद्यांतां सिहाद्यां धूम्र पूर्विकाम्। भीमोन्मत्तादिकाञ्चापि वशीकरण भैरवीम्।। मोहनाद्यांसमाराध्य शक्त्या दीन्यायुधान्यापि। एवमाराधिता काली सिद्धा भवति मन्त्रिणाम्।। ततः प्रयोगान् कुर्वीत महाभैरव भाषितान्। सुदृशो मदनावासं पश्यन् यः प्रजपेन्मनुम्। अयुतं सोऽचिरादेव वाक्पतेः समतामियात्।। दिगम्बरों मुक्तकेशः श्मशानस्थो धियामिति। जपेद्योऽयुत् मेतस्य भवेयुः सर्व कामना।। अथ प्रसंगात् श्मशान काली मन्त्रः ॐ फ्रें फ्रें क्रों पशून् गृहाण हुं फट् स्वाहा। अत्र न्यासादिकं नास्ति। तथा च। न्यास शुद्ध्यादिकं किञ्चिद नात्र कार्या विचारणा। कृष्णा तोयैश्च सम्पूर्णे कृष्ण कुंभेऽथ कालिका।। पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोचनां। शक्तिशूल धनुर्वाण खंगखेट वराभयान्।। धारयन्तीं भजेद्देवीं विभ्राणां भूरि भूषणाम्। ध्यात्वैवं साधकः साध्यं साधयेन्मनसेप्सितम्।। ब्राह्मी माहेश्वरीञ्चैव कौमारीं वैष्णवीं तथा। वाराहीं च तथा चैन्द्रीं चामुण्डां–चण्डिकाष्टमीम्।। पूर्वादीशान पर्यन्तं कुम्भाग्रे त्वि स्थिता इमाः। तत्रकमः देवींध्यात्वा यथाविध्युपचारैः सम्पूज्याष्ट शक्तिः पूर्वादि क्रमेण पूजयेत्। तथा नामोच्चारण सम्बद्धं वह्नौ

प्रज्वलितेऽम्बरे। जुहुयाद्वैरि संशुद्ध्यै देवी मन्त्रं जपंस्तथा।। समिधाप्यपिचुमन्दस्य विभीत काष्ठजा। गृहधूम श्मशानान्तर विभीतङ्गार होमतः।। सप्ताहाद्वैरिणं हन्ति कालिका मन्त्रयोगतः। उच्चाटनञ्चापराह्ने संध्यायां मारणं तथा। दक्षिणस्यां दिशि स्थित्वा ग्रामादेर्दक्षिणा मुखः।। अथ विद्वेषे मन्त्र।

ॐ नमो भगवति श्मशान कालिकेऽमुकं विद्वेषय हन हन पच पच मथ मथ हुं फट् स्वाहा। अमुना मन्त्र राजेन होमेत प्रयतः सुधीः। वह्नौ च निम्बपत्रेण कटु तैलान्वितेन च। प्रज्वाल्य खादिरं वह्निं श्मशानजं ततः पुनः।। दश साहस्र संयुक्तं तिल यवाक्षतान्वितं। भावयेत् कालिकां देवीमिन्द्र–नीलसमप्रभाम्।। व्योमनीलां महाचण्डां सुरासुर–विमर्दिनीम्। त्रिलोचनां महारावां सर्वाभरण भूषिताम्।। कपाल–कर्तृकाहस्तां चन्द्रसूर्यौ परिस्थितां। शरजाल–गतां चैव प्रेतभैरव वेष्टिताम्।। वसन्ती पितृकान्तारे सर्व सिद्धिप्रदायिनीम्। होमयेद्विविधैः पुष्पैर्वलि छागोपहारकैः।। पूजयित्वा महेशानीं भक्ति युक्तेन चेतसा। तद्भस्म च समादाय धारयेदभिमन्त्रितम्।। भस्मना तेन यं हन्यात् विद्वेषं तद्भवेन्नृणाम्। वह्निः शीतलतां यायात् पतेद्भू मौ तथा रविः।। तथा शुष्यति पाथोधिश्चन्द्रमा प्रपतेद्यदि। तदा मिथ्या भवेद्देवि योगराजः सुदुर्लभः।। अथ दुर्गामन्त्रः।

तारं माया सबीजञ्च, दुर्गायै हृदयं ततः।। स्व बीजं

दुँ शक्ति अस्य नारद ऋषिगायत्री छन्दः दुर्गा देवता इष्ट सिद्ध्यै विनियोगः। इति स्मृत्वा यथा स्थानं न्यस्य कर षडङ्गकुर्यात्। ह्रां ॐ ह्रीं दुं दुर्गायै नमः अङ्गुष्ठाभ्यां नमः। ह्रीं ॐ ह्रीं दुँ दुर्गायै नमः तर्जनीभ्यां नमः।

ह्रूं ॐ ह्रीं ० ० मध्यमाभ्यां०।

ह्रैं ॐ ह्रीं ० ० अनामिकाभ्यां०।

ह्रौं ॐ ह्रीं ० ० कनिष्ठिकाभ्यां ००।

ह्रः ॐ ह्रीं ० ० करतलकरपृश्ठ ००।

एवं हृदयादिः। ध्यानम्

सिंहस्था शशि शेखरा मरकत प्रख्यैश्चतुर्भिर्भुजैः। शखं चक्र धनुश्शरांश्चदधती नेत्रैस्त्रिभिः शोभिता। आमुक्ताङ्गदहार कङ्कण लसत्काञ्ची क्वणन्नूपुरा, दुर्गा दुर्गति नाशिनी भवतु नो रत्नोल्लसत्कुण्डला।। एवं ध्यात्वा मानसैः सम्पूज्य शंखस्थापनादि कृत्वा ह्रीं ज्ञानात्मने नमः इत्यन्तं सम्पूज्य केशरेशु मध्ये च पूर्वादिः आं प्रभायै नमः। ईं मायायै नमः। ॐ जयायै नमः। ऐं सूक्ष्मायै नमः। अं नन्दिन्यै नमः। औं सुप्रभायै०। ॐ बीजायै नमः। अः सर्व सिद्धिदायै०। तदुपरि ॐ वज्रनख दंष्ट्रायुधाय महासिंहाय हुँ फट् नमः इति पूजयेत्। मूर्तिं मूलेन संकल्प्य ध्यात्वा वाहनादि पञ्चपुष्पाञ्जलिनान्तं विधायावरण पूजामारभेत्। अग्न्यादि कोणेषु मध्ये दिक्षु च ह्रां ॐ ह्रीं दुं दुर्गायै नमः इत्यादिना

पूजयेत्। पत्रेषु पूर्वादि जं जलायै नमः। वं विजयायै नमः। कं कीर्त्यै नमः। पं प्रीत्यै नमः। पं प्रभायै नमः। शं श्रद्धायै नमः। मं मेधायं०। शं श्रुत्यै० पत्राग्रेषु। ॐ शंखाय नमः। ॐ चक्राय नमः। ॐ गदायै नमः। ॐ खड्गाय०। ॐ पाशाय नमः। ॐ अङ्कुशाय०। ॐ शराय०। ॐ चापाय०। तद्वाह्ये इन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादि विसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणमष्ट लक्ष जपः। अष्ट सहस्त्रं त्रिमधुराक्तैः तिलैः पयसा वा होमः। इति शर्भार्चा पारिजाते रामकृष्ण विनिर्मिते। मन्त्र यन्त्रामोद भृतस्तृतीयस्तवकोऽगमत्।। इत्यापदेव सूरि सूनु रामकृष्ण देव विरचिते शरभार्चा पारिजाते आवरण देवता मन्त्रयन्त्राख्यस्तृतीयस्तवकः सम्पूर्णः।।

## । अथ पुरश्चरणम्।

गुरोराज्ञां समादाय शुद्धान्तः करणो नरः। ततः पुरस्क्रियां कुर्यान्मन्त्र संसिद्धि काम्यया।। जीव हीनों यथा देहः सर्व कर्मसु न क्षमः। पुरश्चरण हीनोहि तथा मन्त्रः प्रकीर्तितः।। तस्मादादौ स्वयं कार्यं गुरुवां कारयेद्बुधः। गुरोरभावे विप्रंवा मित्रंवासङ्गणणां स्त्रियम्।

## । तत्र स्थानानि ।

पुण्यक्षेत्रं नदी तीरं गुहापर्वत मस्तके। तीर्थं प्रदेशः सिन्धूनां संगमः पावनंवनम्। उद्यानानि विविक्तानि बिल्वमूलंतटं गिरेः। तुलसी काननं गोष्ठं वृषशून्यं

शिवालयम्।। अश्वत्थामलकी मूल गोशाला जलमध्यतः। देवतायतनं कूलं समुद्रस्य निजंगृहम्।। वातुले–शिवालये नदी तीरे शिवशक्तयोश्च सन्निधौ। बीर भद्रालये चैव जपहोमार्चनादिकम्।।

योगिनी हृदये–गृहे शतगुणं विद्यात् गोष्ठे लक्षगुणं भवेत्। कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ।। म्लेक्ष–दुष्ट–मृग–व्याघ्र शङ्कातङ्कविवर्जिते। एकान्त–पावने निन्दा–रहितेभक्ति संयुते।। स्वदेशे धार्मिके देशे सुभिक्षे निरुपद्रवे। रम्ये भक्त जनस्थाने निर्वसेत्तापसप्रिये।। गुरुणां सन्निधाने च चित्तैकाग्रस्थले तथा। एवमन्यतमं स्थानं आश्रित्य जपमाचरेत्।। यत्र ग्रामे जपेन्मन्त्री तत्र कूर्म विचिन्तयेत्।

गौतमीये–पर्वते सिन्धुतीरेवा पुण्यारण्ये नदी तटे। यदि कुर्यात्पुरश्चर्यां तत्र कूर्मं न चिन्तयेत्।। ग्रामे वा यदि वा वास्तौ गृहेतञ्चविचिन्तयेत्।। अथ पुरश्चरणे भक्ष्यादि नियमः– गौतमीये–पुरश्चरणकृन्मन्त्री भक्ष्याभक्ष्यं विचारयेत्। अन्यथा भोजनाद्दोषात् सिद्धि हानिः प्रजायते।। अगस्त्य संहितायाम्।

दधिक्षीरं घृतं गव्यमैक्षवं गुड वर्जितम्। तिलाश्चैव सितामुद्गा कन्दः केमुल–वर्जितः। नारिकेल फलञ्चैव कदली लवली तथा।। आम्रमामलकंञ्चैव पनसञ्च हरीतकी। व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधः।।

भुञ्जानो वा हविष्यान्नं शाकं पावकमेववा। पयोमूलंफलं वापियत्र यश्चोपलभ्यते।। चिञ्चानालिकाशाकं कलायं लकुचं तथा। कदम्बं नारिकेलञ्च ब्रते कूष्माण्डकं त्यजेत्।। इति योगिनी तन्त्रवचनं तद्व्रतान्तविंषयम्। अथ वर्ज्यानि।

विवर्जयेन्मधुक्षारं लवणं तैलमेव च। ताम्बूलं कांस्यपात्रं च दिवाभोजनमेव च।। क्षारं च लवणं मास ग्रञ्जनं कांस्यभोजनम्। माषाढकीं मसूरांश्च कोद्रवाश्चाणकानपि।। अन्नं –पर्युषितञ्चैव निस्नेहं केशदूषितम्।।

## वातुले

स्व देह धारणार्थञ्च भिक्षाँ वा ब्रह्मचर्यतः। गृहस्थोऽपि हविष्याशी पयोभुक् फलमूलभुक्।। चित्तस्थैर्यं प्रकुर्वीत फलमूलादिकैः प्रिये। मैथुनं तत्कथालापं तद्गोष्ठीः परिवर्जयेत्।। ऋतु कालं बिना नैव स्वस्त्रियं नाभिसंस्पृशेत्। कौटिल्यं क्षौरमभ्यङ्गमनवेदित भोजनम्।। असङ्कलित कृत्यञ्च वर्जयेन्मर्दनादिकम्। स्नायाच्च पञ्चगव्येन केवलामलकेनवा।। मन्त्रंजप्त्वात्र पानीयैः स्नानाचमन–भोजनम् कुर्याद्यथोक्तविधिना त्रिसन्ध्यं देवतार्चनम्।। फलासने च कर्त्तव्ये न कुर्यात्फल सङ्करम्। अगव्यं तत्फलाहारं पृथक् तत्र व्यवस्थितम्।। हिक्वां कासं तथा जृम्भां निद्रांच परिवर्जयेत्।।

वातुले–नित्यं त्रिषवणस्नानं मृत्तिकास्नानमेव च। वर्जयेच्चत्रिकालञ्च स्नानमुष्णोदकेन च।।

अथ भोजन नियमः–

जठरं पूजयेदर्धमर्धभागं जलेन च। वायोः सञ्चरणार्थंतु चतुर्थमवशेषयेत्।। नारदीये–मृदुशोष्णं सुपक्वञ्च कुर्याद्वैलघु भोजनम्। कुलार्ण–यस्यान्नपानपुष्टाङ्गः कुरुतेधर्म सञ्चयम्।। अन्नदातुः फलस्यार्द्ध कर्त्तुरर्द्धं न संशयः। तस्मात्सर्व प्रयत्नेन परान्नं वर्जयेत्सुधीः।।

परान्नं भिक्षेतर विषयम् :–

भिक्षाहारश्चोक्तत्वात् तथा तन्त्रान्तरे–विहाय वह्निं नहिवस्तु किञ्चित् ग्राह्यं परेभ्यः सति सम्भवे च। असम्भवे तीर्थ बहिर्विशुद्धयात् पर्वातिरिक्ते प्रतिगृह्य जप्यात्।। तत्रासमर्थोऽनु दिन विशुद्धयात् याचेतयावद्दितमात्र भक्ष्यम्। गृहणाति रागादधिकं न सिद्धिः प्रजापते कल्पशतैरमुष्य।। तथान्यदपिसकृदुच्चरिते शब्दे प्रणवं समुदीरयेत्। प्रोक्ते पारशिके शब्दे प्राणायामं सकृच्चरेत।। बहुप्रलापी आचम्य न्यस्याङ्गानि ततो जपेत्। क्षतेप्येवं तथा स्पृश्य स्थानानां स्पर्शनेऽपि च।। एवमादींश्च नियमान् पुरश्चरण कृच्चरेत्। विण्मूत्रोत्सर्गशङ्कादि युक्तः कर्म करोतियः।। जपार्चनादिक सर्वमपवित्रं भवेत्प्रिये। मलिनाम्बरिकेशादि मुखदौर्गन्धसंयुतः। यो जपेत्तं दहत्याशु देवता गुह्य संस्थिता।। आलस्यं जृम्भण निद्रांधूतं निष्ठीबनंभयम्। नीचाङ्गस्पर्शनंकोपं जपकाले

पिवर्जयेत्।। देवता गुरु मन्त्राणामैक्यं सम्भावयेन्धिया।। जपेदेकमनः प्रातः कालान्मध्यादिनावधि यत्संख्यया समारब्धं तत्कर्त्तव्यमहर्निशम्। भूशय्या ब्रह्म चारित्वं मौनमाचार्य सेवनम्।। नित्यपूजा नित्यदानं देवता स्तुतिकीर्त्तनम्। नैमित्तिकार्चनञ्चैव विश्वासो गुरुदेवयोः।। जपनिष्ठे द्वादशैते धर्माः स्युर्मन्त्रसिद्धये। स्त्रीशूद्र पतितव्रात्य नास्तिको विण्ट भाषणम्।। नृशंशभाषणं जिह्मभाषणं परिवर्ज येत्। सत्येनापि न भाषेत जपहोमार्चनादिषु।। अन्यथानुष्ठितं सर्वंभवत्येव निरर्थकम्।। पुरश्चरण कालेतु यदि स्यात् मृत सूतकम्। तथापि कृत संकल्पों व्रतं नैव परित्यजेत्।। योगिनी तन्त्रेशयितो कुश शय्यायाँ शुचिरस्त्रधारः सदा। प्रत्यहंक्षालयेच्छय्यामेकाकी निर्भयः स्वपेत्।। तथा च।। नैकवासा जपेन्मन्त्रं बहुवस्त्रा कुलोऽपिवा। पतितानामन्त्यजानां दर्शने भाषणे क्षुते।। क्षुद्रेऽधोवायुगमने जृम्भणे जपमुसृजेत्। तथा तस्य च प्रत्प्राप्तौ प्राणायामषड़ङ्गके।। कृत्वा सम्यक् जपेच्छेषं यद्वासूर्यादि दर्शनम्। आदि शब्दादद्रिं ब्राह्मणञ्च। तन्त्रान्तरे। मनः संहरणं शौचं मौनं मन्त्रार्थ चिन्तनम्।। अव्यग्रत्वमनिर्वेदो जप सम्पत्ति हेतवे। उष्णीषी कञ्चुकी नैवोन्मुक्त केशो गणावृतः अपवित्र करोऽशुद्धः प्रलपन् न जपेत् क्वचित्। अनासनः शयानो वा गच्छन् भुञ्जान एव वा।। अप्राक्ततौ करौकृत्वा शिरसा प्रावृतोऽथवा। चिन्ता

व्याकुल चित्तौ वा क्रुद्धोभ्रान्तः क्षुधान्वितः। रथ्यायामशिवे स्थाने न जपेत्तिमिरान्तरे।। प्रसार्य न जपेत्पादो भ्रष्टासनएव च। न यज्ञ काष्ठे पाषाणे न भूमावासने स्थितः।। मार्जारं कुक्कटं चैव क्रोञ्चं शूद्रं कपिं खरम्। दृष्ट्वाचम्य चरेन्कर्म स्पृष्ट्वा स्नानं विधीयते।।

सर्व जपेऽयंनियमों नास्ति मानसे जपे। यावन्तः कर्मयज्ञः स्युः पवित्राणितपांसिच।। सर्वैते जपयज्ञस्य कलां नार्हन्ति षोडशीम्। माहात्म्यं वाचिकस्यैतज्जप यज्ञस्यकीर्तितम्।। तस्माच्छतगुणो पांशुः सहस्रो मानसस्मृतः। मानसः सिद्धि कामनां पुष्ट कामै रूपांशुकः।। वाचिको मारणे चैव प्रशस्तो जप ईरितः। शक्तया त्रिषवणं स्नानमन्यथी द्वे सकृच्चवा।। त्रिसन्ध्यं प्रजपेन्मन्त्रं पूजनं तत्समं भवेत्। एकदा वा भवेत्पूजा न जपेत्पूजनं विना।। जपान्ते वा भवेत्पूजा पूजान्ते वा जपेन्मनुम्। प्रातःकाले समारभ्य जपेन्मध्यं दिनावधि।। मध्यन्दिनावधीति न नियम परम् किन्तु अधिक काल व्यवच्छेदपरम्।। अन्यथा जिह्वाया जाड्येन अताड्येन वा प्रतिनियत संख्याया वा पूर्णत्वेवा नियत भङ्गः स्यात्। तन्त्रान्तरे :-

अति ह्रस्वो व्याधि हेतुरतिदीर्घो वसुक्षयः। अक्षराक्षर संयुक्तं जपेन्मौक्तिक हारवत्।। मनसायः स्मरेत् स्तोत्र वचसा वा मनुँ जपेत्। उभयं निष्फलं याति

भिन्न–भाण्डोदकं यथा।। कुलार्णवे :–

जातसूतकमादौस्यादन्ते च मृत–सूतकम्। सूतकद्वय संयुक्तो यो मन्त्रः सन सिद्धयति।। गुरोस्तत्र हितं नत्वा मन्त्रं यावज्जपे द्धिया। सूतक द्वय निर्मुक्तः स मन्त्रः सर्वसिद्धिदः।। ब्रह्मबीज मनोर्दत्वा चाद्यन्ते परमेश्वरि। सप्तवारं जपेन्मन्त्रं सूतकद्वय मुक्तये।। रुद्रयामले :–

कार्तिके, चाश्विने, माघे, वैसाखे मार्गशीर्ष के। फाल्गुने मासि दीक्षा पुरश्चर्या च शस्यते।। वाराही तन्त्रेः–

चन्द्र तारानुकूले च शुक्ल पक्षे शुभेऽहनि। आरभेत्पुरश्चर्यां हरौ सुप्तेनचाचरेत्।। ग्रहणे च महातीर्थे न कालमवधारयेत्। तन्त्रान्तरे :–

पुण्यक्षेत्रादिकं गत्वा कुर्याभूमि परिग्रहम्। तथा चामुकमन्त्रास्य पुरश्चरण सिद्धये।। मयेयं गृह्यते भूमिमन्त्रोऽयं सिद्धय तामिति। नगरादावपि क्रोशं क्रोश युग्ममथापिवा। आहारा दिविहारार्थं तावतीं भूमिमाक्रमेत्।। अथ प्रयोगः।। तत्र तावद्भूमेः परिग्रहं कृत्वा पुरश्चरण प्राक् तृतीय दिवसे क्षौरादिकं विधाय वेदिका चतुर्दिक्षु क्रोशं क्रोशद्वयंवा चतुरस्त्र विहारमा हारार्थंवा परिकल्प्य तत्रेव कर्मचक्रानुगणं मन्त्रं विधायैक भक्तङ्कुर्यात् ततः पूर्व दिने स्नानादिकं विधाय शुद्धः सन् चतुर्दिक्षु अश्वत्थोदुम्बर प्लक्षानां अन्यतमस्य वितस्तिमात्रान् दशकीलान् ॐ नमः सुदर्शनास्त्राय फट् इति मन्त्रेणाष्टोत्तर शताभिमन्त्रितान्

दशदिक्षु। ॐ ये चात्र विघ्नकर्त्तारो भुवि दिव्यन्तरिक्षगाः। विघ्नभूताश्च ये चान्ये मम मन्त्रास्य सिद्धिषु।। मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः। अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे।। इत्यनेन निखन्य तेषु ॐ सुदर्शनाय अस्त्राय फट् इति मन्त्रेण अस्त्रं सम्पूज्य पूर्वादि क्रमेण इन्द्रादि–लोकपालान् ॐ भूर्भुवः स्वः इत्यनेन लोक–पालाः इहागच्छत इत्यावाह्य पञ्चोपचारैः पूजयेत्।

ततो मध्यस्थाने क्षेत्र पालाय नमः। वास्तु पुरुषाय नमः इति सम्पूज्य गणपतिं पूजयेत्। यथा ॐ अद्येत्यादि अमुक गोत्रोऽमुक शर्मा मत्कर्त्तव्य शरभ मन्त्र पुरश्चरण कर्मणि विघ्न विघातार्थं गणेश पूजनं करिष्ये। इति सङ्कल्प्य वेदिकामध्ये गणेशं पूजयेत्। ततो माष भक्तादिना पूजित देवताभ्यो बलिं दद्यात्। ततः ॐ ये रौद्रा रौद्र कर्माणा रौद्र स्थान निवासिनः। मातरो रौद्र रूपाश्च गणाधिपतयश्चये।। विघ्न भूताश्चये चान्ये दश दिक्षु समाश्रिताः। सर्वे ते प्रीतिमनसः प्रतिगृह्णन्त्विमंबलिम्।। इत्यष्ट दिक्षु भूतेभ्यों बलिं दद्यात्। ततो गायत्रीं जपेत्। उक्तञ्च। प्रातस्नात्वा तु गायत्र्याः अयुतं प्रयतो जपेत्। विद्या–धराचार्यस्तु सहस्त्रं जपमाहुः। तदल्पादिसंख्यया।। ॐ अद्येत्यादि ॐ अमुक गोत्रोऽमुक शर्मा ज्ञाताज्ञात पापक्षय कामोऽयुतं अष्टोत्तर सहस्त्रं वा गायत्री जपमहं करिष्ये।

इति संकल्प्य जपेत्। तद्दिनमुपवासं हविष्याशनं वा कुर्यात्। ततः पर दिने उषसि स्नात्वा स्वस्ति वाचन पूर्वकं संकल्पं कुर्यात्। ॐ अद्येत्यादि अमुक गोत्रोऽमुक शर्मा शरभस्य द्विचत्वारिंशत् अक्षर मन्त्रस्य प्रतिबन्धकी भूत समस्त दुरितक्षय पूर्वकं तन्मन्त्रं सिद्धिकामोऽद्यारभ्य यावता कालेन सम्पत्स्यते तावत्कालं शरभस्य द्विचत्वारिंशदक्षर मन्त्रस्य द्विचत्वारिंशत् संख्य जप तद्दशांश तर्पण तद्दशांश होम तद्दशांश ब्राह्मण भोजन रूप पुरश्चरणमहं करिष्ये। इति संकल्प्य भूत शुद्धि प्राणायामादिकं कृत्वा पूर्वोक्त क्रमेण देवताः सम्पूज्य प्रज्वलिते दीपके देवतां हृदये कृत्वा प्रातरारभ्य यावन्मध्यन्दिनं जपं कुर्यात्। अथवा द्विचत्वारिंशत् संख्यया महेश्वरीतिशरभ तन्त्रात् जपेत्। पत्र पञ्चाशत् सहस्र संख्यं जपेयुः जपेद्वर्ण सहस्राणि संख्यया तु महेश्वरि अथवा पूजयेत् प्राज्ञो ह्यर्धलक्षं तु निश्चलम्। इति वातुलात् यत्तु अयुतं पुरश्चरणं सदा द्विज गृहे जपेदिति तत् सुकृत युगाभिप्रायम्। कृते चायुतं संख्या त्रेतायां चा युतद्वयम्। द्वापरे त्रियुतं चैव कलौ वेदायुतन्तथा इति वातुले। ततः शुक्लाम्बरधारो भूत्वा गन्धा माल्यादिभिर्युतः। गुरोर्लब्धवरं मन्त्रं प्रजपेद्ध्यान पूर्वकम्।। ततो जप दशांशेन गोदुग्धेन शर्करोदकेन वा तर्पणम्।। तद्दशांशेन घृत शर्करपायसेन गोघृतेन पायसेन वा होमः।। तद्दशांशं ब्राह्मण भोजनम्। तद्दशाशं तर्प येद्धीमान् क्षीरेण च

यथाक्रमम्। तद्दशांश हुनेद्देवि पायसं घृतशर्करा मन्त्रं जप्त्वा तर्पयेच्च होमं ब्राह्मणभोजनम्। जपान्ते विधिवत्कृत्वा मन्त्रासिद्धिमवाप्नुयात्।। शर्करोदक–संयुक्तं तर्पयेत्तत्प्रकारवित्। इति तन्त्रान्तरे। यद्धा पुरश्चरण होमो गोघृतादियुक्त युक्त पायसेनैव। पूर्वोक्त दशद्रव्य करणक होमस्तु क्रूर सौम्य क्रियास्वेव।

होमयेद्विधिनादेवि क्रूर सौम्यक्रियादिषु इति शारभात्। तर्पण वाक्यन्तु मूलान्ते श्री शरभं तर्पयामि नमः।। अभिषेकस्त्वत्रनास्ति चतुरङ्गत्वात्। ततो ब्राह्मण भोजनम् ततो दक्षिणा। अद्य कृतैतच्छरभस्यामुक मन्त्रस्य पुरश्चरण कर्मणः साङ्गता सिद्ध्यर्थं दक्षिणां इदं काञ्चनं वह्नि दैवतं यथा नाम गोत्राय गुरवे तुभ्यमहं सम्प्रददे।। ततोछिद्रावधारणङ्कुर्यात्। अथ ग्रहण पुरश्चरण संकल्पः समुद्र गामिन्यां नद्यां नाभि मात्रोदके स्थित्वा अभावेयत्र कुत्रापि स्नात्वा आचम्भ ॐ अद्येत्यादि अमुक गोत्रोऽमुक शर्मा राहुग्रस्ते दिवाकरेनिशाकरे वा श्री शरभस्यामुक मन्त्रस्य सिद्धि कामों ग्रासाद्विमुक्त पर्यन्तं जपरूप पुरश्चरणमहं करिष्ये। इति संकल्पयेत् ततस्तद्दिने तत्पर दिनेवा तर्पण होमौ विधाय महापूजां कृत्वा ब्राह्माणान् भोजयित्वा मन्त्र प्रसिद्ध्यर्थं गुरुं सम्पूज्य तोषयेत्। एवञ्च मन्त्र सिद्धिः स्यात् देवता च प्रसीदति।। तोषयेदिति दक्षिणादिनेति शेषः। मन्त्र देव प्रकाशि कायाम्। अथवा

देवता रूपं गुरूं भक्त्या प्रतोषयेत्। पुरश्चरण होतोऽपि मन्त्री सिद्धेन्नसंशयः। वातुले च शुद्ध स्वर्णैः प्रकुर्वीत सालुवप्रतिमान्यथा मन्त्र सिद्धिकरं देवि प्रतिमादानमेव च।। पलं वार्ध पलंवाय तदर्धं चार्धमर्धयोः। पलार्धं तदर्ध योरित्यर्थः।। चतुर्भुजं पक्षिरूपं त्रिनेत्रंचोग्र विग्रहम्। कृत्वातु दक्षिणा युक्तं विप्राय च कुटुम्बिने।। वेदशास्त्र पुराणार्थ कोविदे वेदपारगे। मन्त्रदीक्षा समायुक्ते तन्त्रविद् यन्त्रकोविदे।। दद्यादन्नं वसुयुतं शरभ प्रीतये तथा एवमुक्त पुरश्चर्यां कृत्वा विध्युक्त प्रादरात्।। देवता मन्त्ररूपेण साक्षात्कारो भवेद्ध्रुवम्।

## ।।अथ कूर्मचक्रम्।।

दीपस्थानं समाश्रित्य कृतं कर्म फल प्रदम्। दीप्यते पुरुषो यत्र दीपस्थानं तदुच्यते।। चतुरस्त्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत्। पूर्वं कोष्ठादि विलिखेत् सप्तवर्गाननुक्रमात्।। लक्ष्मीशे मध्यकोष्ठे स्वरान् युग्मक्रमान् लिखेत् दिक्षु पूर्वादितो यत्र क्षेत्राद्यक्षर संस्थितिः। मुखं तत्तस्य जानीयात् हस्तावुभयतस्थितौ। कोष्ठे कुक्षी उभे पादौ द्वे शिष्टे पुच्छमीरितम्।। क्रमेणानेन विभजेन्मध्यस्थमपि भागतः मुखस्थो लभते सिद्धिः करस्थः स्वल्प जीवनः।। उदासीनः कुक्षिसंस्थः पादस्थो दुःख माप्नुयात्। पुच्छस्थः पीड्यते मन्त्री

बन्धनोच्चाटंनादिभिः कूर्मं चक्रमिदं प्रोक्तं मन्त्राणां सिद्धि साधनम्।। कूर्म चक्र मविज्ञाय यः कुर्याज्जप यज्ञकम्। तस्य यज्ञ फलं नास्ति सर्वानर्थाय कल्पते।।

**।।इति कूर्मचक्रम्।।**

## अथ दश संस्कारः

गौतमीये :- जननं जीवनं पश्चात् ताडनं बोधनं तथा। तथाभिषको विमली करणाप्यायने तथा।। तर्पणं दीपनं गुप्तिर्दशैता मन्त्र संस्क्रिया।। स्वर्णादि पात्रे संलिख्य मातृका यन्त्रमुत्तमम्।। काश्मीर चन्दनेनापि भस्मनावाथ सुब्रते।। काश्मीरं शक्ति संस्कारं चन्दनं वैष्णवे मनौ। शैवे भस्म समाख्यातं मातृका यन्त्र लेखने।।

तद् यन्त्रं तु- व्योमेन्द्वौ रसनार्णकर्णिकमचां द्वं द्वैः स्फुरत् केशरम्। वर्णोल्लासिवसूच्छदं वसुमती गेहेन संवेष्टितम्।। आशास्वस्त्रिषुलान्त लाङ्गलिभुजाक्षोणी पुरेणावृतम्। यन्त्रं वर्ण तनोः परं निगदितं सौभाग्य संम्पत्करम्।। इति शारदायाम्। अस्यार्थः-

आदावष्ट दलं पद्म कृत्वाकार्णिकाया सौः बीजं लिखेत्। व्योमः हकारः। इन्दु शाकारः औ इति स्वरूपम् रसनार्णो विसर्गः एते कर्णिकायां यस्यतत्। केशरेषु द्विशोऽचोलिखित्वा दलेषु कु चु टु तु पु य शवर्गान् लिखित्वा लक्षावन्तिमे दले लिखेत्। तस्योपरि भूपुर कृत्वातच्चतुर्दिक्षु वकारं लिखित्वा तत्कोणेषु टकारञ्च

विलिख्य तस्योपरि चतुरस्त्रं चतुर्द्वारं लिखेत्।

**इति वाग्देवता पूजा यन्त्रम्।।**

इतिजननं। प्रणवान्तरितंकृत्वा मन्त्रवर्णान जपेत् सुधीः। प्रत्येकं शतवारन्तु जीवनं तदुदाहृतम्।। मन्त्रवर्णान् समालिख्य ताडयेच्चन्दनाम्भसा। प्रत्येकं वायुवीजेन पूर्ववत्ताडनं मतम्।। शतं विलिख्य मन्त्रार्णान् प्रसूनैः करवीरजैः। तन्मन्त्रवर्ण संख्यातैर्हन्याद्रेफेन बोधनम्।। ततः मन्त्रोक्त विधिना अभिषेकः प्रकीर्तितः। अश्वत्थ पल्लवैः सिञ्चेमन्त्री मंत्रार्ण संख्यया।। सचिन्त्य मनसा मन्त्रं सुषुम्णा मूल सन्ध्यतः। ज्योति मन्त्रेण विधिना दहेन्मन्लत्रयंसुधी।। तारं व्योमाग्नि मन्युग्दण्डी ज्योति–र्मनुर्मनः। तारं प्रणवः, व्योम हकारः अग्नी रेफः, मनुरौकारः, दण्डी अनुस्वारः, ॐ ह्रौमिति सिद्धम्। स्वर्णैन कुश तोयेन पुष्पतोयेनवा तथा। तेन मंत्रेण विधिवदाप्यायन विधिस्मृतः।। मन्त्रेण विधिना मन्त्र देवता तर्पणं स्मृतम्। शैवेघृतेन दुग्धेन तर्पणं सम्यगीरितम्।। तारमाया रमायोगो मनोदीपनमुच्यते। जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम्।। संस्कारा दश सम्प्रोक्ता सर्वतन्त्रेषु गोपिता। यान् कृत्वा सम्प्रदायेन मन्त्री वाञ्छितमाप्नुयात्।।

मलत्रयमिति–आणवं मायिकं कार्मणञ्चेति। मायिकं नाम योषोत्यंपौरुषं कार्मणं मलम्। आणवं तदद् ज्ञेयं निषिद्धं तन्मलत्रयम्। योषिन्मात्रोपासितं पुरुषमात्रोपासितं तारमाया

ोत्तर शंत जपेदित्यर्थः। अथ
ोतमीयेः–
दि सिद्धिर्नजायते। पुनस्तेनैव
ुवम्।। पुनरनुष्ठिते मन्त्रे यदि
ेनैव कर्त्तव्यं ततं सिद्धो न
मन्त्रो यदि सिद्धिर्नजायते।
शङ्कर भाषिताः।
पीडनं योषणोषणे। दहनान्तं
वेद् ध्रुवम्।। भ्रामणं वायुबीजेन
तन्मन्त्रां यन्त्रामालिख्य
ीर चन्दनाभ्यान्तु मन्त्रं ग्रसितं
ानां मध्ये तल्लिखितं भवेत्।।
सिद्धिदोभवेत्। भ्रामितश्चेन्नसिद्धः
सारस्वतेन बीजेन सम्पुटीकृत्य
्मन्त्रो नौचेत्सिद्धो व शंकुरु।।
हरिद्रा च मनःशिला। एतैस्तु
ोधनम्।। धार्यः कण्ठे भवेत्सिद्धः
रोत्तर यामेन् पदानि परजप्यवै।।
रूपिणीम्। विद्यामादित्य दुग्धेन
तथा भूतेन मन्त्रेण होमः कार्यो
याविष्टः सिद्धःस्यादथयोषयेत्।।

बालायास्त्रितयं बीजमाद्यन्ते तस्य सो जपेत्। गोक्षीरमधुना लिख्य विद्यां पाणौ विभावयेत्।। योषितोऽयं भवेत्सिद्धो न चेत्कुर्वीत शोषणम्। द्वाभ्यां च वायुबीजाभ्यां मन्त्र कुर्याद्विदर्भितम्।। एषा विद्या गले धार्या लिखित्वा वर भस्मना। शोषितोऽपि न सिद्धः स्यात् दहनीयोऽग्नि बीजतः।। आग्नेयेन तु बीजेन मन्त्रस्ये मन्त्रत्येकैमकरम्। आद्यन्तमधऊर्ध्वञ्च योजपेद्दाह कर्मणि।। ब्रह्म वृक्षस्य तैलेन मन्त्रमालिख्य धारयेत्। कण्ठदेशे ततो मन्त्रः सिद्धः स्याच्छङ्करोदितम्।। इत्येवं कथितं सम्यक्केवलं तव भक्तितः। एकैनैव कृतार्थः स्यात् बहुभिःकिञ्च सुब्रते।।

अथान्यत्संप्रवक्ष्यामि मन्त्रसिद्धेस्तु कारणम्। मातृका पुटितं कृत्वा मन्त्रं च प्रजपेत्सुधीः। क्रमात्क्रमाच्छतावृत्या तदन्ते केवलं मनुम।। एवन्तु प्रत्यहं कुर्यात् यावल्लक्षं समाप्यते। निश्चितं मन्त्रं सिद्धि स्यादित्युक्तं तन्त्र वेदिभिः।।

## अथ मन्त्र सिद्धेर्लक्षणम्

मनोरथा नाम क्लेशः सिद्धेरूत्तमलक्षणम्। मृत्यूनां हरणं तद्वद्देवता दर्शन तथा। प्रयोगास्याक्लेश सिद्धिः सिद्धेस्तु लक्षणं परम्। ख्यातिर्भूषणवाहादि लाभः शुचिर्जीवनम्।। नृपाणां तद् गणानाञ्च रक्षीकरणमुत्तमम्। सर्वत्र सर्व लोकेषु चमत्कार–करं सुखी।। दुःखापहरणं दृष्टया विषापहरणं तथा। पाण्डित्यं लभते मन्त्री चतुर्विधमयत्नतः।। वैराग्यञ्च मुमुक्षुत्वं त्यागिता सर्व वश्यता। इत्यादि गुण सम्पत्तिर्मध्य

रमाबीज पुटितं मंत्रमष्टोत्तर शंत जपेदित्यर्थः। अथ मंत्रसिद्धे रूपायान्तरम्। गौतमीये:–

सम्यगनुष्ठिते मन्त्रे यदि सिद्धिर्नजायते। पुनस्तेनैव कर्त्तव्यं ततः सिद्धो भवेद्ध्रुवम्।। पुनरनुष्ठिते मन्त्रे यदि सिद्धिर्न जायते। पुनस्तेनैव कर्त्तव्यं ततं सिद्धो न संशयः।। पुनरनुष्ठिते मन्त्रो यदि सिद्धिर्नजायते। उपायास्तत्र कर्त्तव्या सप्त शङ्कर भाषिताः।

भ्रामणं रोधनं वश्यं पीडनं योषणोषणे। दहनान्तं क्रमात्कुर्यात् ततः सिद्धो भवेद् ध्रुवम्।। भ्रामणं वायुबीजेन ग्रन्थान क्रमयोगतः। तन्मन्त्रां यन्त्रामालिख्य सिद्धकैर्तरुचन्दनैः।। उशीर चन्दनाभ्यान्तु मन्त्रं ग्रसितं लिखेत्। क्षीराज्यमधुतोयानां मध्ये तल्लिखितं भवेत्।। पूजनाज्जपनाद्धोमात्भ्रमितः सिद्धिदोभवेत्। भ्रामितश्चेन्नसिद्धः स्याद्रोधनं तस्य कारयेत्।। सारस्वतेन बीजेन सम्पुटीकृत्य सञ्जपेत्। एवं रुद्धो भवेन्मन्त्रो नौचेत्सिद्धो व शंकुरु।। अलक्तं चन्दनं कुष्ठं हरिद्रा च मनःशिला। एतैस्तु मन्त्रंमालिख्य भूर्जपत्रेषु शोधनम्।। धार्यः कण्ठे भवेत्सिद्धः पीडनं चास्य कारयेत्। अधरोत्तर यामेन् पदानि परजप्यवै।। ध्यायेच्च देवतां तद्वधरोत्तर रूपिणीम्। विद्यामादित्य दुग्धेन लिखित्वा क्रम्य चांध्रिणा। तथा भूतेन मन्त्रेण होमः कार्यौ दिने दिने। पीडितो लज्जयाविष्टः सिद्धःस्यादथयोषयेत्।।

बालायास्त्रितयं बीजमाद्यन्ते तस्य सो जपेत्। गोक्षीरमधुना लिख्य विद्यां पाणौ विभावयेत्।। योषितोऽयं भवेत्सिद्धो न चेत्कुर्वीत शोषणम्। द्वाभ्यां च वायुबीजाभ्यां मन्त्र कुर्याद्विदर्भितम्।। एषा विद्या गले धार्या लिखित्वा वर भस्मना। शोषितोऽपि न सिद्धः स्यात् दहनीयोऽग्नि बीजतः।। आग्नेयेन तु बीजेन मन्त्रस्ये मन्त्रत्येकैमकरम्। आद्यन्तमधऊर्ध्वञ्च योजपेद्दाह कर्मणि।। ब्रह्म वृक्षस्य तैलेन मन्त्रमालिख्य धारयेत्। कण्ठदेशे ततो मन्त्रः सिद्धः स्याच्छङ्करोदितम्।। इत्येवं कथितं सम्यक्केवलं तव भक्तितः। एकैनैव कृतार्थः स्यात् बहुभिःकिञ्च सुब्रते।।

अथान्यत्संप्रवक्ष्यामि मन्त्रसिद्धेस्तु कारणम्। मातृका पुटितं कृत्वा मन्त्रं च प्रजपेत्सुधीः। क्रमात्क्रमाच्छतावृत्या तदन्ते केवलं मनुम।। एवन्तु प्रत्यहं कुर्यात् यावल्लक्षं समाप्यते। निश्चितं मन्त्रं सिद्धि स्यादित्युक्तं तन्त्र वेदिभिः।।

## अथ मन्त्र सिद्धेर्लक्षणम्

मनोरथा नाम क्लेशः सिद्धेरूत्तमलक्षणम्। मृत्यूनां हरणं तद्वद्देवता दर्शन तथा। प्रयोगास्याक्लेश सिद्धिः सिद्धेस्तु लक्षणं परम्। ख्यातिर्भूषणवाहादि लाभः शुचिर्जीवनम्।। नृपाणां तद् गणानाञ्च रक्षीकरणमुत्तमम्। सर्वत्र सर्व लोकेषु चमत्कार–करं सुखी।। दुःखापहरणं दृष्टया विषापहरणं तथा। पाण्डित्यं लभते मन्त्री चतुर्विधमयत्नतः।। वैराग्यञ्च मुमुक्षुत्वं त्यागिता सर्व वश्यता। इत्यादि गुण सम्पत्तिर्मध्य

ातिर्वाहन भूषादि लाभः
नित्वञ्च पुत्रदारादिसम्पदः।।
ामाद्य भूमिका। सिद्ध मन्त्रस्तु
शयः।। शरभार्चा पारिजाते
ते। पुरश्चर्यामोद
इति श्रीभद्रामदेव सूरिसूनु
र्या पारिजाते चतुर्थस्तवकः

मनैरर्चयेद्धरम्। वर्षार्चा फल
तत्र दमनार्चन प्रयोगः। पूर्व
स्थानं गत्वा क्रमेण त गृहीत्वा
ाय नमस्तुभ्यं कामस्त्रिशोक
नित्यमानन्दं जनयस्वमे।। इति
ाम देवाय नमः। इति मन्त्राभ्यां
महेशस्य पूजार्थ नेष्यामि त्वां
च्य जलैः प्रक्षाल्य नमः इति
स्त्रेणाच्छाद्य गीत वाद्य पुरस्सरं
स्थापयेत्। ततो देवस्य पुरतः
खं प्रणवाद्याभ्यां वंशभवेपात्रे
त्वा तद्वहिः पीत वर्ण भूपुरं
पीत वर्ण वृत्तत्रयं कुर्यात्।
रचयित्वा दमन पात्रं मण्डल

मध्ये स्थापयेत्। ततो रात्रिपूजान्तेऽधिवासनम्। यथा पूर्वोक्ताभ्यांरतिकाम मन्त्राभ्यां दमने रतिकामौ सम्पूज्याष्टसु दलेषु प्रणव कामबीजाद्यान् कामादि नमोऽन्तान् यजेत्। ते च कामा भस्म शरीरश्च ततोऽनङ्गश्च मन्मथः। वसन्त सरव संज्ञस्यस्मर इक्षु धनुर्धरः।। पुष्पवाणइमे कामाः। इति। कर्पूर रोचनात् मकं नाभिजागरुकुंकुमै धात्फलैः चन्दनेन पुष्पैः कामान् यजेत् क्रमात्। ततो दमनं गन्ध पुष्पैः सम्पूज्य। कामदेवाय विद्महे पुष्पवाणाय धीमहि तन्नोऽङ्गः प्रचोदयात्। इति कामगायत्र्याष्टोत्तर शतमभिमन्त्र्यस्य नमः इति पुष्पाञ्जलिं दत्त्वा।

नमोऽस्तु पुष्पवाणाय जगदानन्द कारिणे। मन्मथाय जगन्नेत्ररति प्रीति प्रदायिने।। इति प्रणमेत्। ततः आमन्त्रितोऽसि देवेश प्रातः काले मया विभो। कर्त्तव्यं तु यथा लाभं पूर्णं पर्व तवाज्ञया।। इति देवमामन्त्र्य पुष्पाज्जलि दत्त्वा दण्डवत्प्रणम्य दमने हुं इत्यवगुण्ठनं कृत्त्वा फडिति रक्षणं कुर्यात्। इत्यधिवासनम्।। ततो देवंस्मरन् गायन् जागरं कुर्यात्। सद्योऽधि वासने तु न जागरः। प्रातः स्नात्वा नित्यार्चनं विधाय देश कालौ स्मृत्वा वर्षाचार्यया: सम्पूर्ण फलप्राप्तिद्वारा श्री शरभेश्वर प्रीत्यर्थ श्री शरभेश्वरं दमनेन पूजयिष्ये इति संकल्प्य। हस्ताभ्यां दमन मंजरी गृहीत्वा नमः इत्यभिमन्त्र्य। सर्वरत्नमयीं नित्यां सर्व गन्धमयीं शुभाम्।। गृहाण मञ्जरीं देव नमस्तेऽस्तु

सिद्धेस्तु लक्षणम्।। ख्यातिर्वाहन भूषादि लाभः सुचिरजीवनम्। महैश्वर्य धनित्वञ्च पुत्रदारादिसम्पदः।। अधमा सिद्धयः प्रोक्ताः मन्त्रिणामाद्य भूमिका। सिद्ध मन्त्रस्तु यः साक्षात् सशिवोनात्र संशयः।। शरभार्चा पारिजाते रामकृष्ण विनिर्मिते। पुरश्चर्यामोद मृतश्चतुर्थस्तवकोऽगमत्।। इति श्रीभद्रामदेव सूरिसूनु रामकृष्ण विरचिते शरभार्चा पारिजाते चतुर्थस्तवकः समाप्तः।।

चैत्र शुक्ल चतुर्दश्यां दमनैरर्चयेद्धरम्। वर्षार्चा फल सिद्धयै पवित्रैश्रीवणेयजेत्।। तत्र दमनार्चन प्रयोगः। पूर्व दिने नित्यार्चनं कृत्वा आसन स्थानं गत्वा क्रमेण त गृहीत्वा शुचौ देशे उपविश्यअशोकाय नमस्तुभ्यं कामस्त्रिशोक नाशन। शोकार्स्तित्र हरमे नित्यमानन्दं जनयस्वमे।। इति प्रार्थ्य ह्रीं रत्यै नमः। क्लीं काम देवाय नमः। इति मन्त्राम्याँ तत्र रतिकामौं सम्पूज्य। श्री महेशस्य पूजार्थ नेष्यामि त्वां इति ब्रुवन् पच्ञ्गव्येनाभिषिच्य जलैः प्रक्षाल्य नमः इति गन्धादिमिरभ्यर्च्य पत्रं पीतमवस्त्रेणाच्छाद्य गीत वाद्य पुरस्सरं गृहमानीय शिवं स्मरन् सद्देशे स्थापयेत्। ततो देवस्य पुरतः सित कृष्ण रक्त पीत वर्णैः खं प्रणवाद्याम्यां वंशभवेपात्रे निधाय षष्ठ दलं पद्मं कृत्वा तद्वहिः पीत वर्णं भूपुरं कृत्वा तद्वहिः सित रक्त पीत वर्णं वृत्तत्रयं कुर्यात्। तद्बाह्ये रक्त वर्णं चतुरस्त्रं रचयित्वा दमन पात्रं मण्डल

मध्ये स्थापयेत्। ततो रात्रिपूजान्तेऽधिवासनम्। यथा पूर्वोक्ताभ्यांरतिकाम मन्त्राभ्यां दमने रतिकामौ सम्पूज्याष्टसु दलेषु प्रणव कामबीजाद्यान् कामादि नमोऽन्तान् यजेत्। ते च कामा भस्म शरीरश्च ततोऽनङ्गश्च मन्मथः। वसन्त सरव संज्ञस्यस्मर इक्षु धनुर्धरः।। पुष्पवाणइमे कामाः। इति। कर्पूर रोचनात् मकं नाभिजागरुकुंकुमै धातूफलैः चन्दनेन पुष्पैः कामान् यजेत् क्रमात्। ततो दमनं गन्ध पुष्पैः सम्पूज्य। कामदेवाय विद्महे पुष्पवाणाय धीमहि तन्नोऽङ्गः प्रचोदयात्। इति कामगायत्र्याष्टोत्तर शतमभिमन्त्र्यस्य नमः इति पुष्पाञ्जलिं दत्त्वा।

नमोऽस्तु पुष्पवाणाय जगदानन्द कारिणे। मन्मथाय जगन्नेत्ररति प्रीति प्रदायिने।। इति प्रणमेत्। ततः आमन्त्रितोऽसि देवेश प्रातः काले मया विभो। कर्त्तव्यं तु यथा लाभं पूर्णं पर्व तवाज्ञया।। इति देवमामन्त्र्य पुष्पाज्जलि दत्त्वा दण्डवत्प्रणम्य दमने हुं इत्यवगुण्ठनं कृत्त्वा फडिति रक्षणं कुर्यात्। इत्यधिवासनम्।। ततो देवंस्मरन् गायन् जागरं कुर्यात्। सद्योऽधि वासने तु न जागरः। प्रातः स्नात्वा नित्यार्चनं विधाय देश कालौ स्मृत्वा वर्षाचार्ययाः सम्पूर्ण फलप्राप्तिद्वारा श्री शरभेश्वर प्रीत्यर्थ श्री शरभेश्वरं दमनेन पूजयिष्ये इति संकल्प्य। हस्ताभ्यां दमन मंजरी गृहीत्वा नमः इत्यभिमन्त्र्य। सर्वरत्नमयीं नित्यां सर्व गन्धमयीं शुभाम्।। गृहाण मञ्जरीं देव नमस्तेऽस्तु

घण्टादि घोषैर्देवेषु मूर्ध्नि तां समर्प्य
हृदाभिमन्त्र्य। सर्व रत्नमयीं नाथ
गृहाण देव पूजार्थं सर्व गन्धमयीं
भिमन्त्र्य। मूलमन्त्रेण देव मुकुटे तां
रान् पूजयेत् ततो धूप दीप नैवेद्य
न्नत्वा दमनार्चां देवाय निवेदयेत्।।
ाञ्छितार्थ प्रदायक। कृत्स्नान् पूरय
येति च।। ततो मूलमन्त्रं जपित्वा
ूज्य गुरुं दमनैः सम्पूज्य ब्राह्मणान्
दितं स्वयं भुञ्जीत। इति दमन
शुक्ल चतुर्दश्यां पवित्रं पूजनम्।
र्ण रौप्य ताम्रोत्पन्न तन्तुभिः पदसूत्रैः
र्मितं कार्पासतन्तुभिर्वा यथा सम्भवं
नव सूत्रिकां निर्माय पञ्चगव्येन
ाभिषिच्य मूलेनाष्टोत्तर शतमभिमन्त्र्य
त्र्य तया नव सूत्रोत्तम मध्यम
कुर्यात् उत्तमानि जानु परिमितानि
तुकानि षड्विंश ग्रन्थ युक्तानि
् नव तन्तुकानि ऊरु परिमितानि
ने कनिष्ठानि सप्तविंशति नव
द्वादश ग्रन्थिकानि एवमुत्तम मध्यम
कृत्वा कुंकुम रोचनादिभिर्ग्रभ्न्थीन्

रञ्जयित्वा तानि वैणव पात्रे संस्थाप्य सितवस्त्रेणाच्छाद्य द्वादश ग्रन्थिकं द्वादश नव सूत्रीकं ग्रन्थि पवित्र कृत्वा सप्त विंशति नव सूत्रीभिर्गुरु पवित्रं सप्त विंशति नव सूत्र्याग्नि पवित्रं षड्विंशत्या स्व पवित्रञ्च यथाशोभं तत्र ग्रन्थीन् दत्त्वा गोरोचनादिना रञ्जयित्वा तानि पात्रान्तरे न्यस्य पूजार्थं षोडशदलं पद्मं नील पीत शोण माञ्जिष्ठ श्वेत सिन्दूर धूम्र कृष्णाख्यैरष्टवर्णैरचयित्वा तद्बहिः सूर्य सोमाग्नि संज्ञं सित पीतारुणं क्रमान्मण्डलत्रयं कृत्वा तद्बाह्ये सितरुणं वाष्टदलं कृत्वा कुसुमादिभिः सम्पूज्य तस्योपरि अलंकृत वितानं वध्वा मण्डले कलशं संस्थाप्य तत्र देवं सम्पूज्य पायस नैवेद्यं दद्यात् देवाग्रे पवित्रं पात्रंन्यस्याधिवासयेत्। उक्त सूत्रस्यालाभे यथा रुचिः ज्येष्ठादीनि पवित्राणि कुर्यात्। अथ तेषु पवित्रेषु द्वाविंशति देवानावाह्य पूजयेत्।। ब्रह्मणे नमः। विष्णवे नमः। महेश्वराय नमः। एतास्त्रिसूत्रो देवताः।

ॐकाराय नमः। चन्द्रमसे नमः। ब्रह्मणे नमः। नागाय नमः। कार्तिकेयाय नमः। सूर्याय नमः। सदाशिवाय नमः। विश्वेभ्योदेवेभ्यो नमः। इति नव सूत्री देवताः। क्रियायै नमः। पौरुषायै नमः। वीरायै नमः। अपराजितायै नमः। विजयायै नमः। जयायै नमः। मुक्तिदायै नमः। सदाशिवायै नमः। मनोन्मन्यै नमः। सर्वतोमुख्यै नमः। एताः ग्रन्थिदेवताः। आवाहनी। स्थापिनी। संन्निधापनी। सन्निरोधिनी। सम्मुखी

कृपानिधे। इति पठित्वा घण्टादि घोषैर्देवेषु मूर्ध्नि तां समर्प्य दमन निर्मितां मालां हृदाभिमन्त्र्य। सर्व रत्नमयीं नाथ दामनिंनव मालिकाम्। गृहाण देव पूजार्थं सर्व गन्धमयीं विभो।। इति श्लोकेनाभिमन्त्र्य। मूलमन्त्रेण देव मुकुटे तां समर्पयेत्।। ततः परिवारान् पूजयेत् ततो धूप दीप नैवेद्य ताम्बूलानि दत्त्वा दण्डवन्नत्वा दमनार्चां देवाय निवेदयेत्।।

देव देव महेशान वाञ्छितार्थ प्रदायक। कृत्स्नान् पूरय मे कामान् कामेश्वरिप्रियेति च।। ततो मूलमन्त्रं जपित्वा दशांशेन हुत्वा देवं विसृज्य गुरुं दमनैः सम्पूज्य ब्राह्मणान् संभोज्य देवाय निवेदितं स्वयं भुञ्जीत। इति दमन पूजाविधिः।। श्रावण शुक्ल चतुर्दश्यां पवित्रं पूजनम्। पूर्वोदीर्णे नित्यपूजान्ते स्वर्ण रौप्य ताम्रोत्पन्न तन्तुभिः पदसूत्रैः सदाचारया सधवया निर्मितं कार्पासतन्तुभिर्वा यथा सम्भवं त्रिगुणं त्रिगुणीकृत्य नव सूत्रिकां निर्माय पञ्चगव्येन प्रक्षाल्योष्मवारिणा प्रणवेनाभिषिच्य मूलेनाष्टोत्तर शतमभिमन्त्र्य मूलगायत्र्या चाभिमन्त्र्य तया नव सूत्रोत्तम मध्यम कनिष्ठानि पवित्राणि कुर्यात् उत्तमानि जानु परिमितानि अष्टोत्तर शत नव तन्तुकानि षड्विंश ग्रन्थ युक्तानि मध्यमानिचतुः पञ्चाशन् नव तन्तुकानि ऊरु परिमितानि चतुर्विंशति ग्रन्थिकानि कनिष्ठानि सप्तविंशति नव तन्तुकानि नाभिमात्राणि द्वादश ग्रन्थिकानि एवमुत्तम मध्यम कनिष्ठानि पवित्राणि कृत्वा कुंकुम रोचनादिभिर्ग्रभ्न्थीन्

रञ्जयित्वा तानि वैणव पात्रे संस्थाप्य सितवस्त्रेणाच्छाद्य द्वादश ग्रन्थिकं द्वादश नव सूत्रीकं ग्रन्थि पवित्र कृत्वा सप्त विंशति नव सूत्रीभिर्गुरु पवित्रं सप्त विंशति नव सूत्र्याग्नि पवित्रं षड्विंशत्या स्व पवित्रञ्च यथाशोभं तत्र ग्रन्थीन् दत्त्वा गोरोचनादिना रञ्जयित्वा तानि पात्रान्तरे न्यस्य पूजार्थं षोडशदलं पद्मं नील पीत शोण माञ्जिष्ठ श्वेत सिन्दूर धूम्र कृष्णाख्यैरष्टवर्णैरचयित्वा तद्बहिः सूर्य सोमाग्नि संज्ञं सित पीतारुणं क्रमान्मण्डलत्रयं कृत्वा तद्वाह्ये सितरुणं वाष्टदलं कृत्वा कुसुमादिभिः सम्पूज्य तस्योपरि अलंकृत वितानं वध्वा मण्डले कलशं संस्थाप्य तत्र देवं सम्पूज्य पायस नैवेद्यं दद्यात् देवाग्रे पवित्रं पात्रंन्यस्याधिवासयेत्। उक्त सूत्रस्यालाभे यथा रुचिः ज्येष्ठादीनि पवित्राणि कुर्यात्। अथ तेषु पवित्रेषु द्वाविंशति देवानावाह्य पूजयेत्।। ब्रह्मणे नमः। विष्णवे नमः। महेश्वराय नमः। एतास्त्रिसूत्रो देवताः।

ॐकाराय नमः। चन्द्रमसे नमः। ब्रह्मणे नमः। नागाय नमः। कार्तिकेयाय नमः। सूर्याय नमः। सदाशिवाय नमः। विश्वेभ्योदेवेभ्यो नमः। इति नव सूत्री देवताः। क्रियायै नमः। पौरुषायै नमः। वीरायै नमः। अपराजितायै नमः। विजयायै नमः। जयायै नमः। मुक्तिदायै नमः। सदाशिवायै नमः। मनोन्मन्यै नमः। सर्वतोमुख्यै नमः। एताः ग्रन्थिदेवताः। आवाहनी। स्थापिनी। संन्निधापनी। सन्निरोधिनी। सम्मुखी

वगुण्ठनी। अमृत करणी।
पवित्र देवतानां ब्रह्मादीनां
न काण्डानु समयेनवाकृत्वा
धूपयित्वा नमः इत्यभिमन्त्र्य
न्त्रितोऽसि देवेश सार्ध देव्या
सहितं परिवारकैः। आगच्छ
रक। प्रातस्त्वां पूजयिष्यामि
ततो गन्ध पवित्रो प्रभोः
यन् रात्रौ जागरणं कुर्यात्।
ासन पक्षे न जागरणम्।
ष्ठं पवित्रं मूलेनाष्टोत्तर
दि घोषं कारयन् जय शब्द
एवमेव मध्यमोत्तमे अर्पयेत्।
क्रमाद्देवं श्वेतं रक्तं पीतं
मन्त्रितं देवस्य मुकुटेऽर्पयेत्
ष्पं मूलाभिमन्त्रितं देव मूर्ध्नि
। ततो मूलं जपित्वा अग्नि
मं विधाय मूलेनाग्नि पवित्रं
येत्। ततो देवं समुद्वास्य
लिं विधाय।
क्तिहीन कृपानिधे। पूजनं

पूर्णतामेतु पवित्रेणार्पितेनमे।। इति सम्प्रार्थ्य देवं हृदये संयोज्य गुर्वन्तिके गत्वा स्वांगे गुरौच षडङ्गं विन्यस्य पाद्यादि दत्वा वस्त्रालङ्करादिभिः सम्पूज्य तत्पवित्रं तद्हस्ते समर्प्य दक्षिणां दत्वा प्रणम्य स्व पवित्रं धृत्वा ब्राह्मणान् भोजयित्वा बन्धुभिः सह भुञ्जीत। गुर्वभावे तत्पुत्रादि पूजनम्। इति पवित्रार्पणम्। अन्येस्वपि उपरागादौ अपि सौम्यायनादिषु। कुर्यादलभ्य योगेषु विशेषं देवतार्चनम्।।

## माघशुक्ल चतुर्दश्यार्चनम्

आषाढ शुक्ल चतुर्दश्यां प्रस्वापनोत्सवः। कार्तिक शुक्ल चतुर्दश्यां उत्थापनोत्सवः। माघशुक्ल चतुर्दश्यां विशेष पूजा। एवं तत्तत्कालिकं पुष्प फलादिभिर्विशेषपूजा कीर्तितेयं शिवम्। शरभार्चा पारिजाते रामकृष्ण विनिर्मिते। नैमित्तिकामोदभृतः पञ्चमस्तवकोऽगमत्।। इति श्रीमदापदेवसूरिसूनुरामकृष्ण विनिर्मिते शरभार्चा पारिजाते नैमित्तिकार्चन स्तवकः पञ्चमः समाप्तिमगमत्।। अथ काम्याः केचन् प्रयोगाः वक्ष्यन्ते।

आज्य माहिषिकञ्चैव नवनीतन्तुयो नरः। हुनेत्तत्र तु मूलेन साध्यनामपुरस्सरम्।। सद्यो वशो भवेत् क्षिप्रं सत्य सत्यं न संशयः।। नारी च दासी भवति शिवेन परिभाषितम्।।

**प्रयोगान्तरम्**

दूर्वानावृताखण्डैर्गोधूमैश्च विशेषतः तिललाजैः सर्षपैश्च

करणी। सकली करणी। अवगुण्ठनी। अमृत करणी। परमी करणी। एताभिर्मुद्राभिः पवित्र देवतानां ब्रह्मादीनां आवाहनादिंक पदार्थानुसमयेन काण्डानु समयेनवाकृत्वा गन्धादिनार्चयेत्। पवित्रं प्रणवेन धूपयित्वा नमः इत्यभिमन्त्र्य देवं प्रणम्य प्रार्थयेत्। ॐ आमन्त्रितोऽसि देवेश सार्धं देव्या महेश्वरः। मन्त्रै सलोकपालैश्च सहितं परिवारकैः। आगच्छ भगवन्नीश विधि सम्पूर्त्ति कारक। प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु शालुव।। ततो गन्धा पवित्रो प्रभोः पादयोर्विन्यस्य देवं स्तुवन् गायन् रात्रौ जागरणं कुर्यात्। इत्यधिवासनम् सद्योऽविधवासन पक्षे न जागरणम्। प्रातर्नित्यार्चनं कृत्वा कनिष्ठं पवित्रं मूलेनाष्टोत्तर शतवारम्भिमन्त्र्य घण्टावाद्यादि घोषं कारयन् जय शब्द पूर्वकं देवकण्ठे मूलेनार्पयेत्। एवमेव मध्यमोत्तमे अर्पयेत्। कनिष्ठादि पवित्रार्पण समये क्रमाद्देवं श्वेतं रक्तं पीतं ध्यायेत्। उत्तमं पवित्रं मूलाभिमन्त्रितं देवस्य मुकुटेऽर्पयेत् ततः शत पुष्पैः सह स्वर्ण पुष्पं मूलाभिमन्त्रितं देव मूर्ध्नि समर्प्य धूप दीपादि समर्पयेत्। ततो मूलं जपित्वा अग्नि संस्थाप्य तत्र देवमाबाह्य होमं विधाय मूलेनाग्नि पवित्रं देवतां स्मरन् अग्नौ समर्पयेत्। ततो देवं समुद्वास्य वह्निमात्मनि संयोज्य पुष्पाञ्जलिं विधाय।

मन्त्रहीनं क्रियाहीनं भक्तिहींन कृपानिधे। पूजनं

पूर्णतामेतु पवित्रेणार्पितेनमे।। इति सम्प्रार्थ्य देवं हृदये संयोज्य गुर्वन्तिके गत्वा स्वांगे गुरौच षडङ्गं विन्यस्य पाद्यादि दत्वा वस्त्रालङ्करादिभिः सम्पूज्य तत्पवित्रं तद्हस्ते समर्प्य दक्षिणां दत्वा प्रणम्य स्व पवित्रं धृत्वा ब्राह्मणान् भोजयित्वा बन्धुभिः सह भुञ्जीत। गुर्वभावे तत्पुत्रादि पूजनम्। इति पवित्रार्पणम्। अन्येस्वपि उपरागादौ अपि सौम्यायनादिषु। कुर्यादलभ्य योगेषु विशेषं देवतार्चनम्।।

## माघशुक्ल चतुर्दश्यार्चनम्

आषाढ शुक्ल चतुर्दश्यां प्रस्वापनोत्सवः। कार्तिक शुक्ल चतुर्दश्यां उत्थापनोत्सवः। माघशुक्ल चतुर्दश्यां विशेष पूजा। एवं तत्तत्कालिकं पुष्प फलादिभिर्विशेषपूजा कीर्तितेयं शिवम्। शरभार्चा पारिजाते रामकृष्ण विनिर्मिते। नैमित्तिकामोदभृतः पञ्चमस्तवकोऽगमत्।। इति श्रीमदापदेवसूरिसूनुरामकृष्ण विनिर्मिते शरभार्चा पारिजाते नैमित्तिकार्चन स्तवकः पञ्चमः समाप्तिमगमत्।। अथ काम्याः केचन् प्रयोगाः वक्ष्यन्ते।

आज्य माहिषिकञ्चैव नवनीतन्तुयो नरः। हुनेत्तत्र तु मूलेन साध्यनामपुरस्सरम्।। सद्यो वशो भवेत् क्षिप्रं सत्य सत्यं न संशयः।। नारी च दासी भवति शिवेन परिभाषितम्।।

**प्रयोगान्तरम्**

दूर्वानावृताखण्डैर्गोधूमैश्च विशेषतः तिललाजैः सर्षपैश्च

मिश्रीकृत्य हुनेत्ततो।। त्रिदिनाच्छत्रु संघाताः पलायन्ते न संशयः

**प्रयोगान्तरम्**

मधुं मधूकं मधुकं दशाहं सहस्रमेकैक दिने वरेण्ये। होमं प्रकुर्यात् प्रयतो मनीषी समस्त दुर्वार भयात् विमुक्त्यै।। लवंगमेलं मधुकञ्च कोष्ठं तिलं घृतं चम्पक कुड्मलञ्च। दिने सहस्र प्रयतो दशाहं उन्माद तापज्वर भूत शान्त्यै।।

श्री भार्गवीभिर्नव रात्रहोमैः प्रयान्ति शान्तिं कुपिताश्च देवाः। उदुम्बराश्वत्थ समित्सहस्रैः कुर्याच्चतुर्थं ज्वर भूतशान्त्यै।। पलाशशाखाभिरभीष्टसिध्यै रक्षां हि कुर्यादथ खादिरोत्थैः। कुर्यात्पुनर्वै वहुमित्रकामस्त्वनन्तरायामश मीसमिद्भिः।।

पुत्राय कुर्यादय दीपिकाभिः प्रसादसिद्धयै करवीरपुष्पैः।। वश्याय कुर्यान्मधुसिक्त पद्मैराकर्षणायस्मर पञ्चबाणैः।। अरविन्दमशोकञ्च चूतञ्च नव मल्लिकाः। नीलोत्पलञ्च पञ्चैते पञ्च बाणस्य सायकाः।। विद्वेषणायाथ द्विषांघ्रियोत्थैः स्तम्भक्रियायै विजया प्रसूनैः। उच्चाटनाय स्नुहि बालपत्रैः संहारणायार्ककटु स्नुहीभिः।। धत्तूरशाखा फल पत्र पुष्पैरुन्मादनायोश्च शिखां विमुक्त्यै। यद्धान्य होमं हुतमस्य शीघ्रं तद्धान्य राशेस्तनुते विवृद्धिम्।। दाडिमीकुसुम जालकैर्नरा मन्मथत्वमुपयान्ति सुभ्रुवाः। एवमेव नियतं

रवेर्दिने कारयेदखिल काम्य सिद्धये।। अन्नेन चान्नं पयसा पयश्च घृतेन भाग्यं मधुना च नादम्।। तैलेन सारं दधिभिश्च पुष्टिं चूतप्रवालैरभि रूप वृद्धिम्।। त्रिकटु सर्षप हिङ्ग्वजमोदा तुरगमौलिससैन्धव जीरकम्। सघृत पारद टङ्कण युक्तं शरभ होम परिक्षयमेतत्।। साध्यर्क वृक्षेण विनिर्मिताकृतो वायुं समुत्पाद्य मनोः शतेन। श्वेतार्क दुग्धेन ततोष्ठ चूर्ण पिष्ट्वा समालिप्य वितप्य वह्नौ। लेप्यं प्रताप्याथ पुनः प्रलिप्य प्रताप्य लिप्त्वा निखनेत् श्मशाने। दत्त्वा वलिं मन्त्रमथत्रिवारं जप्त्वा ततस्नानमथाचरित्वा।। जत्त्वा सहस्रं शरभेश्वराख्य" जपावसाने निखिलैरवद्यः। शरीर पिण्डं तरसा विहाय सद्यो रिपुः काल पुरीं प्रयाति।। तत्र होम द्रव्यानां नामानि–

मधु क्षौद्रं मधुकं मधुकपुष्पं मधुकयष्टिः मधुश्री भार्गवी श्वेतदूर्वा दीपिका पुत्रजीवकाष्टौ कूट त्रिकटु शिफेति मूलम्। गरुड मौलिः तत्संज्ञमेव अष्ट चूर्णं त्रिकटु जीरकद्वयं हिङ्ग्वजामोदमिति प्रयोगान्तरम्।। सङ्गृह्य सत्साध्य विहङ्गमाङ्ग सूत्रेण कोदण्डमिवाथ वद्धवा। साध्याङ्गजैर्दक्षपदाङ्गमृद्भिः कृत्वाथ कृत्तिं प्रतिकल्प्य वायुम्।। मञ्जिष्ठमालिप्य मुखे च कण्ठे त्वलात चूर्णं त्वथ शेष देहे। तदस्थिरोषा करेण कण्ठे मन्त्रं समुच्चार्य विमुच्य चैवम्। शत् प्रयोगात्सरिपुः स्वदेहात् प्रयाति याम्यंपुरमाशुघोरम्।। कृत्वा साध्य चतुष्पदोऽस्थि निचये

मृत्कृष्टिकां कृत्तिकां। तस्याः प्राणक वस्त्रभूषण समालेपाञ्जनै श्चन्दनैः। आभूष्यस्व करेण मूर्द्धिन करे स्पृष्ट्वा स तं मारुतम्।। जप्त्वा मन्त्र सहस्त्रकच्च विधिवत् खड्गेन तां पीडयेत्। यस्मिन्पीडित मन्त्र शत्रु तनुषु क्षिप्तं तु तस्मिन् स्थले। पीडां कुर्वन्ति नून साग्नि तपनादाविज्वराङ्गो भवेत्।। अर्क क्षीर कटु त्रयेण सहिता वह्नौ प्रदग्ध्वा तदा शत्रुः काल पुरं प्रयाति तरसा श्री सालुवाज्ञावशात्।। कृत्तिं कृत्वा तु साध्य क्षितिमुतितितैः रोक्षिमा लिप्य तस्याम्। वायुं संस्थाप्य जप्त्वा मनुमथ शतकं क्षार तोयेन चोक्तम्। कुर्यान्निक्षिप्तमन्त्र प्रपचन करणैः शत्रु लोकस्तदानीं प्रायः संताप पूर्वज्वर वर सहिताः सम्यगार्त्ता भवन्ति।। साध्यद्रुत्वं मनोज्ञां विविध कृति युतां तन्तुनैकीं कृतान्ताम्। वायुं संस्थाप्य तस्याः शिरसि तनयकं जन्तुमालेषयित्वा नाशे मौलिं च कण्ठे भ्रमर युगपथो जाठरे त्वाखुसानुं। जप्त्वा मन्त्रं तु मन्त्री द्वितयमथ खनेद्वैरिनाशाय कोष्ठे।।

**अथकाम्याभिषेकः**

अभिषेक विधिं वक्ष्येऽलङ्कृते मण्डपे शुभे। गोमयेनाथ संलिप्य पृथिवीं चतुरस्त्रकाम्।। गन्धाक्षतैस्तु संकीर्य तण्डुलेन सितेन च। नव कोष्ठं समालिख्यालंकृत्य कुसुमादिभिः। मध्य कोष्ठे लिखेद्यन्त्रं तन्मध्ये चतुरस्त्रकम्। नव कुम्भं च तन्मध्ये प्रतिष्ठाप्य नवोशुकम्।। तन्तुना

परिवेष्ट्याथ धूप दीपौ प्रदर्शयेत्। गन्धमाल्यैरलंकृत्य गन्धयेद्धटमञ्जसा।। पद्मरागं प्रजाकामस्त्वायु कामस्तु मौक्तिकम्। रजतंबृद्धि कामस्तु तेजस्कामस्तु विद्रुमम्। वैडूर्य वश्य कामस्तु सर्वकामत्वशेषकम्।। हिरण्यं वाथ तत्स्थाने–घटमध्ये विनिक्षिपेत्।

देवतावाहनन्तत्र प्रकुर्यादासनादिकम्।। विश्वामित्रेण तत्कुम्भं दुर्वयासंस्पृशन् बुधः। अष्टोत्तर सहस्त्रं तु जपेन्मन्त्रं समाहितः।। कृतस्नातः समाकृष्य भूताङ्गत्वादवाससम्। प्राङ्गमुखं देव दत्तं तं कुम्भपाणिरुदन्मुखः।। अभिषेकं गुरुः कुर्यात् छुद्रपापाद्विमुक्तये।

पञ्चाहं वात रोगस्य शिरोरोगस्य मण्डलम्। अनुभोगं पिशाचस्य त्वपस्मारस्य वत्सरम्।। अभिषेकेन सत्सर्वं प्रशमं याति सुन्दरी। तस्मात्सर्व प्रयत्नेन अभिषेकं समाचरेत्।। अथ वन्ध्या चिकित्साख्यमभिषेकं वदाम्यहम्। वीर्यवती वधूं शुद्धां ऋतु स्नान दिनादितः।। दशाहं जन्म वन्ध्याख्यं द्व्यधिकं काक वन्ध्यमम्। मृतवन्ध्यां षोडशाहं तदन्ते तु विशेषतः।। ऋतञ्चेति ऋचाकुम्भ शतवाराभिमन्त्रितम्। अभिषिञ्चेत्ततः पश्चात् रक्षां कुर्वीत बुद्धिमान्।। सीसं षण्मासवीर्यञ्च ताम्रवत्सुरवीर्यकम्। त्रिलोहं वत्सरार्द्धं तु रजतन्तु त्रिवर्षकम्।। भूर्जपत्रं चतुर्वर्षं पञ्चाब्दं पल्वलोदकम्। दशवर्ष त्रिकार्ष्णायः कनकं यावदायुषम्।। तस्मात् हिरण्मथपदे साध्यमन्त्रं विलिख्य तु। तद्यन्त्रकेऽक्षरं

पद्मं तत्तदावाह्य देवतम् ।। अक्षरदेवतास्तु पूजास्तवके निरूपिताः।

प्रत्येकं शतवारन्तु प्राणमन्त्रां जपेद्बुधः। षोडशाद्युपचारन्तु कुर्यात्सर्वं यथाक्रमम् ।। मूलेन च सहस्रन्तु प्रत्यहं प्रजपेच्छिवे। अथ सा शुद्ध चित्ताख्या शुद्धाङ्गी शुद्ध वाससी। ततस्तदादि षण्मासं निम्नगां नातिलंघयेत् ।। भृगुवारे तु संस्नानं तदा पत्रस्य धूपनम्। ब्राह्मणान् भोजयेद्देवि ऋतुस्नानाद्दिनेदिने। तदा पयो घृताक्तान्नं ऋतुस्नाता पिपेष्य च। भित्वा हृदष्टकं पीडमुपलेपित्तभूतले। निक्षिप्य च करं ध्यात्वा तोयेन परिवेष्टच्य च। आकाश भूतल स्वर्ग वारुणो देवता स्वयम् ।। इहागत्य मुदाकालं वदन्त्वाशु सुतां सुतम् ।।

दशवारमिदं जप्त्वा स्फोटयेत्तु करं पुनः। ततः पश्चात् प्रदेशस्थो जपेन्मन्त्रं पुनः पुनः। प्रथमं काक आगत्य भक्षितमत्तु पिण्डकम्। तद्दक्षिणे युग्मकञ्च पुत्री भवति निश्चयः।। पुत्र स्त्वयुग्मकं नूनं पिण्डेचेत्स्याद्विशेषतः। प्रथमं प्रथमे मासि द्वितीयादि यथा क्रमम् ।। उक्त लक्षण काले तु सा नारी गर्भिणी भवेत्। एतद्विधानकं गुह्यं सर्व शास्त्रोत्तमोत्तमम् ।। इत्थं ज्ञात्वा कलौमन्त्री सर्वकार्याणि कारयेत्। तुलायां वृषभे कुंभे मीने सिंहे च वृश्चिके। रक्षाभिषेकौ कर्त्तव्यौ नान्ये मासि शुभावहौ ।। इत्याभिषेका।

अथ प्रयोगान्तराणि :–

सालुवमन्त्रराजेन शालीं सक्तून् तथैवच। त्रिमध्वाक्तान् हुनेद्देवि योनिकुण्डे द्विरत्निके। योनिमेखलया युक्ते चतुष्पात्र विधानतः। षट्सहस्रं हुनेद्देवि भौमे रात्रौ समारभेत्।। पूर्णाहुतिं पुनर्भौमे एवं कुर्वन् समापयेत्। राजा वा राजपत्नी वा सामान्य वनितापि वा। सम्मोहनं भवेत् सद्यः सालुवस्य प्रसादतः।। अन्यत्र योनिकुण्डे योनि निषेधेऽपि वचनादत्र भवन्ति। भौमे रात्रौ समारभ्य सोम रात्रि पर्यन्तं हुत्वा अवशिष्टं भौमे रात्रौ हुत्वा पूर्णाहुतिं कुर्यादित्यर्थः।

**प्रयोगान्तरम्**

भौमे रात्रौ नग्नो भूत्वा वकुल तरोर्मूले दक्षिणाभिमुखो रक्त कम्बलासनो हरिद्रा मालया भौम पर्यन्तं द्वादश सहस्रजपादाकर्षणम्।

**प्रयोगान्तरम्**

भौम रात्रिमारभ्य सप्तरात्रं प्रत्यहं धत्तूर पुष्पैर्द्विसहस्रं जुहुयात् स्तम्भनं भवति।

**प्रयोगान्तरम्**

कर्पूर कस्तूरी गुञ्जामूलेन मर्दयित्वा तन्मध्ये मन्त्रं लिखित्वा प्राणप्रतिष्ठां कृत्वा रक्त पुष्पैः सम्पूज्य सहस्रद्वयं जपेत्। एतच्च भौम रात्रिमारभ्य–अनुदिनं कुर्यात् ततस्तच्चन्दन गुलिकां कृत्वा ललाटे चन्दनं धारयेत्। यो

पसाक्तैः शमी समिद्भिस्त्रि
नाशः। विभीतक काष्ठं
ज्ञासनेनोपविश्य कृष्ण
पर्यन्तं शत्रुनाम
गंच्छितार्थं लभेत्। सालुवं
शति संख्यान् ब्राह्मणान्
ार्थ्य तद्दिनमारभ्यार्धे रात्रे
णाभिमुखोऽष्टोत्तर सहस्रं
त्रपौत्रः सगणः शत्रुर्यमपुरं
कर्त्तुः प्रायश्चित्तमुक्तम्
कर्तुमिच्छताम्। हस्तमात्र
। स्व गृह्योक्त प्रकारेण
प्राङ्मुखः कुर्याद्धोमं
मात्रेण पापेभ्यो मुच्यते

तर सहस्रमयुतंलक्षं यथा
कार्यं कुत्र न वा इति
मुपालभ्य क्रियते येन यत्र
नैव विचारयेत्। अपवादं
क्रियया हन्तुर्दोषो नास्ति
र्मिणी मर्म सूचकः। यस्तं
यन।। धन धान्य गृहक्षेत्र

धेनु पुस्तक चोरिताम्। कुरुते यस्तु तं हन्तुर्दोषो नास्ति कदाचन।। वनितां ब्रह्म मध्यस्थांयोऽवमानयति द्रुतम्। गिरिजे तं नरं हन्तुर्दोषो नास्ति कदाचन।। व्यभिचारामपि वधूं वलात्कारेण–योऽकरोत्। तं सम्मारयितुर्देवि दोषो नास्ति कदाचन।। दम्पती मेलनं कालं प्रकाशं प्रकरोतितम्। नराधमं समा हन्तुर्दोषो नास्ति कदाचन।। परकीयं स्वकीयञ्च दोषं यत्नेन गोपयेत्। नरोत्तमं समाहन्तुँ मनसापि न चिन्तयेत्।। भूषणं दूषणं वापि न ब्रूत्वा पाति तां बधूम्। यद्वातद्वापि संहन्तुं मनसापि न चिन्तयेत्।। गुरुपुत्रं गुरोर्वन्द्यं दीक्षितं सत्यवादिनं। योगिनं व्रतमध्यस्थं मनसापि न चिन्तयेत्।। दुःखातिरेकात्तु भयाच्च कोपात् राजाज्ञया भीषण भाव भाज्यः पश्चात् क्षमध्वं विवशान्यथोक्तं इति ब्रुवन्तं पुरुषं न कार्यम्। एतद्रहस्यं सुबुधः समीक्ष्य क्रिया विधानं सकरोतु लोके।। तदेव नूनं शरभेश्वराज्ञा नान्यत्र सर्वं विपरीतमेति।

### अथ प्रयोग विशेषे ध्यानानि

अरुण मरुण मालालंकृतांशंकराग्रे विधृत परशु शक्ति पुष्पबाणेक्षुचापम्।। विविध मणिफणीन्द्रैर्भूषणं भूषिताङ्गम्। शरभमखिल नाथं नौम्यहं सालुवेशम्।। त्रिनयनमथशूक श्याम मालावतंसं सहसकलरथाङ्गस्त्विष्टिदाभीति हस्तम्। गृहणरिपु पिशाच स्तम्भ विद्वेष साध्यै प्रतिदिनमिति मन्त्री भावयेत्सालु वेशम्।। ज्वलदनलनिभं तं सूर्य चन्द्राग्निनेत्रम्।

यस्तं पश्यति स वश्यो भवति। पयसाक्तैः शमी समिद्भिस्त्रि दिनमष्टोत्तरशतहोमात् सर्व रोगनाशः। विभीतक काष्ठं वामहस्तेनादाय तत्पीठोपरि वज्रासनेनोपविश्य कृष्ण प्रतिपदमारभ्य तच्चतुर्दशी पर्यन्तं शत्रुनाम ग्रथितमन्त्रमष्टोत्तर शतं जपित्वा वांच्छितार्थं लभेत्। सालुवं विधिना सम्पूज्य तत्प्रीतयेऽष्टाविंशति संख्यान् ब्राह्मणान् सम्पूज्य भोजयित्वा स्वाभीष्टं सम्प्रार्थ्य तद्दिनमारभ्यार्धे रात्रे सर्षप तैलाक्ताभिःष्णुहि समिद्भिर्दक्षिणाभिमुखोऽष्टोत्तर सहस्त्रं दश दिन पर्यन्तं जुहुयात्। सपुत्रपौत्रः सगणः शत्रुर्यमपुरं ब्रजेत्। इति। मारणम्। एतत्कर्त्तुः प्रायश्चित्तमुक्तम् प्रायश्चित्त तु भो देवि सहस्यं कर्तुमिच्छताम्। हस्तमात्र प्रमाणेन कुण्डं कुर्यात्समेखलम्।। स्व गृह्योक्त प्रकारेण अग्निस्थापनमाचरेत्। जपञ्च प्राङ्मुखः कुर्याद्धोमं चोदङ्मुखस्तदा।। पञ्च वासर मात्रेण पापेभ्यो मुच्यते ध्रुवम्।।

जपश्च पापानुसारेण–अष्टोत्तर सहस्त्रमयुतंलक्षं यथा यथमूह्यम्। इदञ्चमारणं कुत्र कार्यं कुत्र न वा इति वि[illegible]चितम् शरभ तन्त्रे। क्रियान्तरमुपालभ्य क्रियते येन यत्र तु। तं प्रति–क्रियया जेतुँ कालं नैव विचारयेत्। अपवादं ब्रुवति यः सहायान्तैव हेतुना तं नरं क्रियया हन्तुर्दोषो नास्ति कदाचन।। गुरुमात् पुत्र द्रोही धर्मिणी मर्म सूचकः। यस्तं मारयितुर्देवि दोषो नास्ति कदाचन।। धन धान्य गृहक्षेत्र

धेनु पुस्तक चोरिताम्। कुरुते यस्तु तं हन्तुर्दोषो नास्ति कदाचन।। वनितां ब्रह्म मध्यस्थांयोऽवमानयति द्रुतम्। गिरिजे तं नरं हन्तुर्दोषो नास्ति कदाचन।। व्यभिचारामपि वधूं वलात्कारेण–योऽकरोत्। तं सम्मारयितुर्देवि दोषो नास्ति कदाचन।। दम्पती मेलनं कालं प्रकाशं प्रकरोतितम्। नराधमं समा हन्तुर्दोषो नास्ति कदाचन।। परकीयं स्वकीयञ्च दोषं यत्नेन गोपयेत्। नरोत्तमं समाहन्तुँ मनसापि न चिन्तयेत्।। भूषणं दूषणं वापि न ब्रूत्वा पाति तां बधूम्। यद्वातद्वापि संहन्तुं मनसापि न चिन्तयेत्।। गुरुपुत्रं गुरोर्वन्द्यं दीक्षितं सत्यवादिनं। योगिनं व्रतमध्यस्थं मनसापि न चिन्तयेत्।। दुःखातिरेकात्तु भयाच्च कोपात् राजाज्ञया भीषण भाव भाज्यः पश्चात् क्षमध्वं विवशान्यथोक्तं इति ब्रुवन्तं पुरुषं न कार्यम्। एतद्रहस्यं सुबुधः समीक्ष्य क्रिया विधानं सकरोतु लोके।। तदेव नूनं शरभेश्वराज्ञा नान्यत्र सर्वं विपरीतमेति।

**अथ प्रयोग विशेषे ध्यानानि**

अरुण मरुण मालालंकृतांशंकराग्रै विंधृत परशु शक्ति पुष्पबाणेक्षुचापम्।। विविध मणिफणीन्द्रैर्भूषणं भूषिताङ्गम्। शरभमखिल नाथं नौम्यहं सालुवेशम्।। त्रिनयनमथशूक श्याम मालावतंसं सहसकलरथाङ्गस्त्विष्टिदाभीति हस्तम्। गृहणरिपु पिशाच स्तम्भ विद्वेष साध्यै प्रतिदिनमिति मन्त्री भावयेत्सालु वेशम्।। ज्वलदनलनिभं तं सूर्य चन्द्राग्निनेत्रम्।

स्वकर कलित शूलं खड्ग खेटं कपालम्।। सकल रिपुजनानां कण्ठ हृद्वक्त्रभेदम्। स्मरतु शरभमेवं मारणोच्चाटनाय।। सजल जलदनीलं चाष्टवाहुँ त्रिनेत्रम् विविध चटुल पक्षं दीप्यमानोर्ध्व रम्यम्। अरिनरहित कोपस्पन्दमानाधरोष्ठं सकल रिपुविनाशं सालुवेशं नमामि।। देह्यभीष्ट मिति याचितंपुरा वाञ्छितं परिददाति साधकैः। दानवारिभिरहर्निशं यथा पारिजात इव मानवैः शिवः।। अथ षट्कर्म प्रयोगे वसन्तादि निर्णयः। सूर्योदयं समारभ्य घटिकादशंक क्रमात्। ऋतवः स्युर्वसन्ताद्याः अहोरात्रं दिनेदिने।। वसन्त ग्रीष्म वर्षाख्य शरद्धेमन्त शिशिराः। हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्य कर्मणि।।

**तथा चामुण्डा तन्त्रे**

जपेत् पूर्व मुखे वश्ये, दक्षिणञ्चाभिचारिके।
पश्चिमे पौष्टिकं विद्यादौत्तरं शान्तिदं मतम्।।

**अथ माला**

मृतस्य युद्ध शून्यस्य दन्तेन गर्दभस्यतु। कृत्वाक्षमालां जप्तव्यं शत्रूणां वधमिच्छता।।

भग्नेभ दन्तमणिभिर्जपेदाकर्ष कर्मणि। साध्यकेश सूत्रप्रोतैस्तुरङ्ग दशनोद्भवैः।। अक्षमालां समादाय विद्वेषोच्चाटने जपेत् तिथयः–

पंचमी च द्वितीयाच तृतीया सप्तमी तथा। बुधेज्य वार

संयुक्ता ज्ञेया विद्वेष कर्मणि।। कृष्ण चतुर्दशी तद्वदष्टमी मन्दवासरः। उच्चाटै तिथिः शस्ता प्रदोषे च विशेषतः।। चतुर्दश्यष्टमी कृष्णा अमावास्या तथैव च। मन्द भौम दिनोपेता शस्ता मारण कर्मणि।।

बुध चन्द्रदिनोपेता पञ्चमी दशमी तथा। पौर्णमासी तु विज्ञेया तिथि स्तम्भन कर्मणि।।

शुभग्रहोदये कुर्याच्छुभानि च शुभोदये। रौद्र कर्माणि रिक्तार्के मृत्युयोगे च मारणम्।।

## अथासनानि

पद्माख्यं स्वस्तिकं भूयों विकटं कुक्कुटं पुनः।
वज्रं भद्रकमित्याहुः आसनानि मनीषिणः।।

## मुद्राः

षण्मुद्रा क्रमतो ज्ञेया पद्मपाशागदाह्वया।
मुसलासन खड्गाख्या शान्तिकेसु सुकर्मसु।।
अग्निकार्ये जपेत् स्वाहा नमः सर्वत्र शस्यते।
शान्ति पुष्टि वशद्वेषा कृष्टोच्चाटनमारणे।।
स्वाहा स्वधा वषट् हुञ्च वौषट् फट् योजयेत् क्रमात्।
वश्याकर्षण सन्ताप ज्वरे स्वाहा प्रकीर्ययेत्।।
क्रोधोपशमने शान्तौ प्रीतौ योज्यं नमो बुधैः।
वौषट् सम्मोहने देयं पुष्टिं मृत्यु जपेषु च।।
हुंकारं प्रीतिनाशे छेदने मारणे तथा। गृहेषु शान्ति

कर्मस्याद्वश्यं च चाण्डिकागृहे। देवालयेषु सर्वाणि श्मशाने क्रूरकर्म च।।

## प्रयोगान्तरम् कुलार्णवे

एकलक्षं जपेन्मन्त्रं ध्यान न्यास समन्वितः। प्रयोग दोष शान्त्यर्थमात्मरक्षार्थ कारणम्।। नोचेत्फलं न प्राप्नोति देवता शापमाप्नुयात्।। शरभार्चा पारिजाते रामकृष्ण विनिर्मिते। काम्यकर्मामोदभृतः षष्ठोऽयं स्तवकोऽगमत। इत्यापदेव सूरिसूनु रामकृष्ण विरचिते शरभार्चा पारिजाते षष्ठः स्तवकः।।

## अथ यन्त्राणि

रंकारं पूर्वमालिख्य तद्बाह्ये वर्त्तुलं लिखेत्। तद्बाह्ये चतुरस्रञ्च तद्बाह्येऽष्ट दलं लिखेत्।। तद्बाह्ये षोडशारञ्च तदग्रेवृत्तमालिखेत् तदग्रे पञ्चकोणञ्च टंकारं साध्यनामकम्। वर्त्तुले मूलमालिख्य चतुरस्रे द्रां द्रीं ह्रीं क्षुः। अथ तत्र कवर्णस्य द्वितीयं कोणतो भवेत्। दलाष्टके लं रं शं षं वं यं सं हं तथैव च।। लोकेश बीजान्येतानि लिखित्वा षोडशे पुनः। षोडशाख्यान् स्वरान्ब्रूते साधकाख्यां समन्ततः।। पञ्चकोणेषु द्रां द्रीं क्लीं ब्लूं सः इत्यादि विन्यसेत्। यन्त्रमेवं समालिख्य ताल पत्रे प्रयत्नतः।। स्नुही क्षीरेण तल्लिप्य तत्र यन्त्रं च निक्षिपेत्। चुल्युपरि घटं स्थाप्य तापयेत् सर्व शत्रवः।। गृहे स्थिताः पलायन्ते प्रसादात् सालुवस्य च। साधकः सर्वमाप्नोति देशान्तरगतोऽपि वा।। अस्यार्थः– प्रथमं

सबिन्दुकं रेफं तदन्तः साध्यनामादि तद् वहिर्वृत्तम्। तन्मूल मन्त्रेणावेट्य तद्वहिश्चतुरस्त्रं तद्दिक्षु द्रां द्रौं ह्रीं क्षुं इत्यस्य एकैकमक्षरं विलिख्य खं इति विदिक्षु लिखेत्। तद्वहिरष्टदलं विलिख्य दलेषु लं रं शं षं वं यं सं हं इति प्रागग्निरीशान निर्ऋति जलेश वायु सोम प्रेतेन दिक्ष्वेकैकेन यथायथं लिखेत्। तद्वहिः षोडशदलं विलिख्य तेषु दलेषु षोडश स्वरान् विलिख्य तद्वहिर्वृत्तं कृत्वा परितः साध्यवर्णैर्वेष्टयेत्। तद्वहिः पञ्चकोणं तत्कोणेषु द्रां द्रीं क्लीं ब्लूँ सः इत्यत्यै कैकमक्षरं लिखेत्। एवं तालपत्रे विलिख्य तद्यन्त्रं स्नुहि क्षीरेण विलिप्य घटे स्नुहि क्षीरं विसृज्य चुल्युपरि सूर्योदयादनन्तरं संस्थाप्य तापयेत्। उच्चाटनं भवति।

**यन्त्रान्तरम्**

त्रिकोणं विलिखेत्पूर्वं तद्वाह्ये तु दलद्वयम्। द्वादशारं तु तद्वाह्ये तद्वाह्ये तु नवास्त्रकम्।। सप्तास्त्रंचापिपाञ्चस्त्रं भूपुरं चक्रमालिखेत्। पावकादि पृथिव्यन्तं लिखेन्मन्त्रं यथाक्रमम्।। तद्वहिः कोण षट्केषु प्रागारभ्य मनुं शिवे। षट् फट् जहि तथा छिन्धि भिन्धि यथा क्रमम्।। पद षट्कमित्यर्थः। अकारादि क्षकारान्तं वेष्टयेद्विन्दु संयुतम्। महामन्त्रमिदं पुण्यं सप्तावरणकं परम्।। सर्वभूतवशीकारं सर्वशत्रु जयं सुखम्। नाना ज्वर हरं यन्त्रं नाना क्षुद्र निवारणम्।। यः इदं धारयेद्भक्तया नासाध्यं तस्य विद्यते। अनेनैव तु यन्त्रेण साक्षाच्छिवसमो भवेत्।। द्विचत्वारिंशदक्षरं मन्त्रं भूपुरपर्यन्तं

लिखेदित्यर्थः।।

## अथ नदितरण यन्त्रण्।

भूपुर द्वन्द्वमालिख्य मध्ये पार्थिवमक्षरम्। चतुःकोणे तु लंकारमष्ट दिक्षु ठमालिखेत्।। परितो वायु बीजञ्च नैरन्तर्यन्तु सम्मुखम्। प्रतिष्ठाप्यानिलं यन्त्रे तोयसन्तरणे बुधः।। कृत्वा यन्त्र जले देवि तत्परं निम्नगां तरेत्। यन्त्रोपरि स्वयं छित्त्वा देवदत्तं प्रकल्प्य च।। त्रिवारं मनसा मन्त्रं जपेदेकाग्र मानसः। निम्नगां तरसा तीर्त्वा सुखं गच्छति मानवः।।

अस्यार्थः–

प्रथममष्ट कोणं मध्ये लकारं वहिश्च तुः कोणे लंकारं कोणे ठं कारं ॐ नमः शरभ सालुव पक्षिराजाय सर्व भूतमयाय मूर्तये रक्ष रक्ष शीघ्रं तारय तारय ॐ ह्रीं क्षं लं टं लं यं मम तरणाय स्वाहा। ॐ नमो भगवते महाशरभ सालुव पक्षिराजाय वरद अष्ट मूर्त्तये अखिल मयाय भक्त वत्सलाय प्राणातार्ति विनाशनाय उत्तारय उत्तारय शीघ्रमुत्तारय श्रां हूं ॐ हां देव देवाय उत्तारणाय स्वाहा। पञ्च वारं जपेनैव सालुवेशो जगन्मयः। तस्य हस्तं समुद्गृह्य तत्क्षणादुद्धरेज्जलात्।।

**यन्त्रान्तरम्ः-**

षट् सप्त कोष्ठेषु विलिख्य शारभम्।

रेखाग्रशूलञ्च तदग्र साध्यम्।।
बाह्ये तु मायावृत मारवेष्टितम्।
जपादिकं साधितमाशु कुर्यात्।।

**यन्त्रान्तरम्:-**

मारं वर्त्तुल मध्यके वसुदले मायाञ्च लक्ष्मी तथा।
वाह्ये क्षोणिपुरं लिखेत् प्रतिदिशं खां कारकं भूपुरे।।
मारं साध्य समन्वितं रिपुजयं लोकाय मोहाकरम।
नारीवश्यमहो विचित्रमचिरात् साम्राज्य लक्ष्मी प्रदम्।।

**अस्यार्थः-**

वृत्त मध्ये कामम् साध्ययुतम् तदुपरि अष्टदलं तत्र मा लक्ष्मी बीजे तद्वाह्ये भूपुरं तत्र प्रति दिशं खां शब्दं लिखेत्।

**यन्त्रान्तरम्:-**

आलेख्यं वृत्त मध्ये महदनलगृहे द्वन्द्वके शक्ति लक्ष्मीः।
तद्वाह्ये षड्दलान्तः शरभमनुमथो सत्यकं सत्यकञ्च।।
ओं कारस्तस्यवाह्ये तदनु परिवृतं साध्यमाकर्षयेति।
त्रैलोक्यस्थामदृष्टां स्त्रियमपि विविधान्याशु भूतानि चैतत्।।

**अस्यार्थः-**

वृत्तमध्ये आं बीजं लिखित्वा तदुपर्यर्द्ध चन्द्राकरं तदूर्ध्वं त्रिकोणञ्च कृत्वा अर्द्धचन्द्रे माया बीजं त्रिकोणे श्री बीजं लिखित्वा तद्वाह्ये षड्दलेषु मन्त्रस्य क्रमेण सप्त

सप्ताक्षराणि लिखित्वा तद्वाह्ये ओंकारं कृत्वा तत्सर्वं अमुकमाकर्षयेति वर्णावृत्या वेष्टयेत्। आकर्षण सिद्धिदं यन्त्रम्। यन्त्रान्तरम् :–

मध्ये वृत्तं सभूमिं वहिरथ पृथिवी कोश कोशे ऋबीजम्।

तद्वाह्ये कोण षट्के शरभमनुमथो वाह्यके भूमि कोणे,

भूमिं शक्तिञ्च बाह्ये प्रणवमथ वहिः साध्यकं स्तम्भनाख्यं शत्रूणामाशु दृष्टि श्रति मुख हनु हृत्प्राणिनां यन्त्रमेतत्।।

**अस्यार्थः-**

मध्ये भू बीज युतं वृत्तं कृत्वा तदुपरि लं बीजाङ्कित कोणं चतुष्कोणं तदूर्ध्वं शरभमनुयुक्तं षट्कोणं तदूर्ध्वं भू शक्ति बीज कोणं चतुरस्रं तदूर्ध्वं प्रणवञ्च कृत्वा पूर्ववद् अमुकं स्तम्भय इत्यादि कृत्वा वेष्टयेत्।

उक्त फलदं यन्त्रम्।

**यन्त्रान्तरम् :-**

खेंकारं त्वातमध्ये तदुपरि कमले लान्तकं शक्ति युक्तं। तद्वाह्ये शक्ति कोणोज्वल वृषभ मुखान्या लिखेत्कोण शूले।।

आलेख्यं साध्यमेतत् सकलमपि ततस्तारमायान्वितंतम्।

विद्वेषो यन्त्रमेतत् त्रिभुवनमपि किं स्यात्पामराणां नराणाम्।।

**अस्यार्थः-**

खं बीज युतं वृत्तम् तदुपरि अष्ट दलं ऋं बीजयुक्तं तद्वाह्ये कोणाग्रशूलम्। त्रिकोणे शूले साध्यंलिखित्वा सकलमपि तारमायाभिर्वेष्टयेत् इति विद्वेषण यन्त्रम्।

**यन्त्रान्तरम् :-**

वायुं सद्‌वृत्तमध्ये तदनु भृगु गृहे यावकं तस्य वाह्ये षट्‌कोणे सालुवेशं त्रितयमथ वहिःतस्य रेखाग्रसाध्यम्। तद्वाह्ये शक्ति बीजं विजययुत मनुँ दीपिकावर्ति यन्त्रम्। शत्रूणां भूत नाग गृहगण समरोच्चाटनं चैवमेतत्।।

**अस्यार्थः-**

वृत्तमध्ये यं बीजम् तस्योपरि त्रिकोणं तत्र कोणेष्वग्नि बीजं तदूर्ध्वं षट्‌कोणं तत्र शरभ मन्त्रं तत्कोणाग्रेषु त्रिशूलानि तदग्रे साध्यं तत्र वाह्यन्तरालेषु क्रमतों ह्रीं विजय जय इति वर्णांश्च लिखित्वा सकलं मातृकया वेष्टयेत् इति उच्चाटन यन्त्रम्।।

**यन्त्रान्तरम् :-**

बीजं स्वाद्वेश कोणे ऋतु गृह विवरे वायु बीजं स साध्यम्। तद्वाह्ये चाष्टकोणे शिखि सहितमथो साध्यकञ्चाष्टपत्रे। वंकारं साध्य पूर्वं भुवि भुव मथो साध्ययुक्तं दशारे। व्योमाख्यं साध्य युक्तं शरभमनुवृतं सर्व संहार चक्रम्।।

**अस्यार्थ :-**

त्रिकोणे शं बीजं तस्योपरि षट्कोणेषु साध्य युक्तं यं बीजं तद्वाह्येऽष्ट कोणे साध्य युक्तं रं बीजं तदुपरि अष्ट पत्रे स साध्यं वं बीजं तदूर्ध्वं चतुरस्त्रं तत्र सं साध्यं लं बीजं तस्योपरि दशारं स साध्यं हं बीजं च लिखित्वा शरभ यन्त्रं वेष्टयेदिति संहार यन्त्रम्। अस्य वक्ष्यमाण यन्त्रस्योप जीव्य भूत शरभास्त्रमन्त्र प्रयोगः प्रकाश्यते। सालुवेशाय विद्महे पक्षि राजाय धीमहि तन्नो रुद्रः प्रचोदयात्। एतदस्त्रं महामन्त्रं जपेन्मन्त्रो सदाम्बिके तस्य सर्वं भयं नास्ति स्वप्नेऽपि च कदाचन।। शरभास्त्रमिदं प्रोक्तममोद्यं जय वर्द्धनम्। तत्प्रभाव वशाद् दृष्टुँ न सहन्ते सुरासुराः। कुतोऽन्ये ये पिशाचाश्च क्षुद्रभूत निवारकाः।

गिरि ग्राम वृताः क्लिष्टाः खेचरा पृथिवीचराः। तस्मादेव जपे चिन्त्यमष्टोत्तरं शतं सुधीः। मन्त्रयुक्तः समाकृष्टुं कालेनापि न शक्यते। बुद्धिमान् शारभं घोर मन्त्रराजं महामनुम्।। न्यासाभावे जपं कुर्यादन्वहं पापमुक्तये।

**यन्त्रान्तरम्:-**

ऊर्ध्वं तु तिर्यग्ग्रह वेध रेखा लिखेत्क्रमाद्यन्त्रमनन्ययन्त्रम्। वाह्येषु शूलं विलिखेत्स साध्यं त्रैलोक्य संहारमिदंत्वमोधम्।।

विष वृक्षो समालिख्य प्राणानावाह्य पूजयेत्। अष्टोत्तराख्य साहस्रं जपेदेकाग्र मानसः। बलि पूर्वं

क्षपामध्ये दक्षिणस्यां खनेद्दिशि। ततस्नात्वा जपेन्मन्त्रमष्टोत्तर सहस्रकम्।। रिपवो मरणं यान्ति संशयो नास्ति सुन्दरि।

**प्रयोगान्तरम् :-**

भानु मण्डल मध्यस्थं वैरिणं दशमेऽहनि। राहु संग्रहणादेव कृष्णवर्णमधोमुखम्।। पुटपाकतनुँ क्रान्तं निर्वाणं प्राण संकटम्। चिरं ध्यात्वा जपेन्मन्त्री अष्टोत्तर सहस्रकम्।। जपान्तेऽर्घ्यंत्रयं कुर्यात् सूर्यमालोकयन्सुधी। भूयो जपेत्सहस्रन्तु स्मृत्वा भस्मीकृतं रिपुम्। सरिपुस्तद्दिनादेव मरणंयात्यहैतुकम्।।

**प्रयोगान्तरम् :-**

द्विषन्तमुद्दिश्य सहस्रवारं जप्त्वावृतं तेन हुनेद्धुताशे।

दिनावसानात्पुरतो रिपूणां शरीर नाशाय सुसिद्धमन्त्री।।

इति शरभास्त्र प्रकरण पाठात्तस्यैवायं प्रयोगः इति गम्यते। गीर्वाणेन्द्यान्तु पापान्तो देवदस्येत्युक्तं तन्मन्त्रस्य यन्त्रन्तुनोक्तम्।

**तद्यथाः-**

बिन्दु वह्निरथ कोणमणाष्ट द्वन्द्वकं च स चतुर्दश पत्रम्। भू पुरञ्चविलिखेदथ मन्त्रं मध्यमादि वहिर्नाम सतारम्।। पायान्नो देवः शरभस्त्वपायात्सदारे रोगाद्वीपिनोरगाभ्यां वैश्वानराखु करि रिक्षकेभ्यो पदेभ्योयो

भूतेभ्यो रुषः कृतान्तात् चतुश्चत्वारिंशद क्षराणि तावत्सु बिन्द्वादिस्थानेषु लिखेदित्यर्थः।।

आथर्वणमिदं मन्त्रं मनोद्यन्दुरितापहम्। सर्वं संरक्षणं श्रेष्ठं सर्व सौभाग्य दायकम्।। एतद्यन्त्रं समालिख्य हैमके पट्टके शुभे। विधिना धारयेद्योऽङ्गे सर्वत्र विजयी भवेत्।।

**यन्त्रान्तरम् :-**

शिखिपुर युग मध्ये शक्ति बीजञ्चकोणे प्रति ग्रहमथ मन्त्रं सत्य वर्णं लिखित्वा। इषु मनुरथ वाह्ये षोडशारेन्त्य वर्णं अहियुगयुतमेतत् सालु वेशस्य यन्त्रम्।

एतत्तु सम्पूज्य तदग्रभूमौ पुरीमलातेन लिखेद्यमस्य। मध्ये तु रूपं विलिखेद्यमस्यत्तदङ्ग देशे सुमनापुमांसम्।। मुखाक्षिनासा पुट कर्ण जिह्वा गलांश वक्षोदर नाभिलिङ्गम् प्रत्यङ्ग साध्यं विलिखेत्स नाम वह्निं समाधाय हुनेत्सहस्रम्। तत्साल शाखाभिरथाष्ट चूर्ण युक्ताज्य सिक्ताभिरनन्यमेताः।। दिनत्रयादेवपुरीं यमाख्यां गच्छे द्रिपूर्धूमइव स्वदेहात्।। इति भूमावन्ते सशक्तिकं षट्कोणं कृत्वा कोणेषु सप्त सप्ताक्षराणि लिखित्वा तत् द्रां द्रीं क्लीं ब्लूं सः इति मन्त्रेणावेष्टय तदूर्ध्वं षोडशदले क्षं बीजं कृत्वोभयतः सर्पद्वयं लिखेत्। तदग्रभूमौ अलातमय्यां यमपुरीं कृत्वा तत्र यमस्य यथोक्तं रूपं मुखादि सर्वावयव युतं कृत्वा तस्य प्रत्यङ्गे अमुकं मारयेति साध्यनाम लिखित्वा

तत्राग्निमुप समाधाय अष्ट चूर्ण युक्ताज्य सिक्ताभिः साल समिद्भिः सहस्रं जुहुयात्। एवं दिनत्राय प्रयोगेण रिपुर्मियतेत्यर्थः।

**अथ यन्त्रान्तरम् :-**

बिन्दुत्रिकोणाष्ट दलं च पद्मं वृत्तद्वयं भूपुर युग्मकञ्च।
बिन्दौ च मायाङ्कित साध्यनाम तत्सालुवेनैव तु वेष्टयेद्बुधः।।

त्रिकोणे विलिखेद्वालामष्टपत्रेतु सालुवम्। पञ्च पञ्च लिखद् वर्णान् आशादि दलेषु च।। विदले विलिखेद्वर्णान् मातृका द्वितयं क्रमात्। वृत्ते वर्णांश्च विलिखेत्पञ्चाशत्परमेश्वरि।। सालुव मालिका मन्त्रं द्वितीयावरणे लिखेत्। लिखेद्भूपुर कोणेषु वाराहं बीजमुत्तमम्।। प्राण प्रतिष्ठा मन्त्रेण वेष्टयेद्भूपुरान्तरे। लघु सालुव यन्त्रञ्च एतत्सर्वार्थ दायकम्।। क्षौरामे कांस्यपात्रेवा भूर्जे वा ताल पत्रके। एतद्यन्त्रं लिखेत्प्राज्ञो मध्याह्ने पूर्वदिङ् मुखः।। सालुवं यन्त्र सिद्ध्यर्थं मूलमन्त्रायुतं जपेत्। हुनेत्तिलाक्षतैर्युक्त त्रिकोणे कुण्ड उत्तमे।। ब्राह्मणान् भोजयेद्धीमान् सहस्रं शतमेव वा। तद्यन्त्रं धारयेद्धीमान् शिखायां कण्ठदेशयोः।। सर्व रोगाद्विमुच्येत् जीवेद्वर्ष शतं नरः। भूतप्रेत पिशाचाद्याः यक्षगन्धर्व राक्षसाः नश्यन्ति दर्शनादेव यन्त्रराजं कुलेश्वरि।।

**प्रेत पट्टे प्रति पदे या -**

लिखेद्यन्त्रं वरिनाम्ना च वेष्टयेत। विष धत्तूरजद्रावैर्वजी क्षीरैस्तथैव च।। काक पक्षश्च लेखिन्या लिखेन्नैऋत दिङमुखः। चण्डाल रुद्र भूमौ तु निखनेद्धस्तंमात्रकम्।। स्थापयेत्तत्रतद्यन्त्रं ब्रह्मा विष्णु महेश्वराः। म्रियन्ते सप्त रात्रेण विष्णुनां यदि रक्षिताः।। प्रेतकर्पटके यन्त्रं महालिमि रसेन तु। चिति काष्ठेन संलिख्य दक्षिणाभिमुखेन तु।। शत्रु गेहे च निखनेत् मार्गे वा शयनस्थले। लंघनाद्वयाधितो भूत्वा षण्मासान्म्रियतेऽचिरम्।। पाषाणे विलिखेद्यन्त्रं चिताङ्गारेण बुद्धिमान्। अर्क क्षीरेण संयुक्तं लेखिनी शल्य सर्पजा।। सार्षपं सैन्धवंचैव वज्राक्षं क्षीरमेव च यन्त्रोपरि च संलिप्य तप्त्वा दीप शिखेन् तत् ज्वरार्तों जायते सद्यो द्वितीय इव शङ्करः।।

भूर्जे कुंकुम कस्तूर्याः पौर्णिमायां लिखेत्प्रिये। धारयेत्कण्ठ देशे तु त्रैलोक्यं वशमाप्नुयात्। एतत्सालुव यन्त्रञ्च गोपनीयं प्रयत्नतः। इति ईशान कोण गत दलमारभ्य दिग्दशषु च पञ्च पंच वर्णान् लिखेत् अन्ते अन्तेत्यव्यः।।

**अथ यन्त्रान्तरम्**

पूर्वादि पंच वर्णान् प्रादाक्षिण्येन तु आलिखेत्। मूलमन्त्रस्य रेखाग्रे शूलमालिखेत् प्राण प्रतिष्ठा मन्त्रेण वेष्टयेद्यन्त्रमुत्तमम्। एतद्यन्त्रं पट्टे वाथ भूर्जपत्रेऽथवा

लिखेत्।। सैवाष्ट गन्धं संयुक्तं लेखिनी कुश संभवा। पश्चिमाभिमुखो भूत्वा भानुवारे लिखेत्प्रिये।। कुड्येवा देवतागारे स्थाप्यं यन्त्रं वरानने। चौरादि बन्धनं व्याघ्र स्फोटकादेश्च बन्धनम्।। सर्प वृश्चिकयोश्चैव नाना ज्वर विसर्पिकाः। नाशयेद्यन्त्र माहात्म्यं सत्यं सत्यं न संशयः।। सर्व रक्षाकरं यन्त्रं संसार सुखदं प्रिये। पशुरक्षा गर्भ रक्षा बालकस्य तथैव च। वाणिज्ये लाभमाप्नोति सेवायां वशदं भवेत्।। बन्ध्याया धारयेद्यन्त्रं सद्यः पुत्रवती भवेत्। लघु सालुव यन्त्रञ्च सुलभेन फलप्रदम्।। इति प्रति ग्रहं मूलमन्त्रास्य आद्यान् पंच वर्णान् लिखेदित्यर्थः।। यन्त्रान्तरम्–आदौ बिन्दुत्रिकोणा दुपरिच वलयं द्वि त्रिकोणेन युक्तम्। वेष्टेयं मण्डले नाप्युपरिच विलिखेदष्ट पत्राम्बुजंच।। मण्डलाभ्यां समावेष्ट्य तदूर्ध्वं भूपुरत्रयम्। बिन्दु मध्ये लिखेन्मन्त्रं सालुवं सर्व कामदम्।। त्रिकोणे तु लिखेत्त्रीणि देवीं मायां च वेष्टयेत्। षट्कोणे सालुवाख्यञ्च षडक्षर मनुं लिखेत्।। अष्ट पत्रे लिखेद्देवि सालुवाष्टाक्षरं मनुम्। विदलेषु लिखेद्देवि स्वरान् युग्म क्रमेण तु।। पंचाशद्वर्ण युक्तन्तु वेष्टयेत्पत्र मध्यगम्। प्राणप्रतिष्ठा मन्त्रेण द्वितीय मण्डलं प्रिये।। ईशानादि समावेष्ट्य बिन्दु युक्तं कुलेश्वरि। भूपुरत्रय मध्ये तु सालुवं मालिकामनुम्। लिखेत् स्पष्टतया वर्णान् यन्त्रोद्धार विचक्षणः।। स्वर्णे वा रौप्य पट्टेवा भूर्जेवा विलिखेत्प्रिये। कस्तूर्या कुश लेखिन्या भूर्ज पत्रे लिखेत्प्रिये।। कृष्णाङ्गार चतुर्दश्यां निशि पूर्व दिशा मुखः।।

लिखो दस्त्राक्षयन्त्रञ्च सालुवं सर्व सिद्धिदम्। पूजयेद्भैरवस्याग्रे वीर भद्रस्य सन्निधौ।। अथवा चण्डिका गेहे पूजयेदुपचारकैः। तत्र संजप्य मन्त्रञ्च सालुवंच षडक्षरम्। पंचायुत प्रमाणन्तु दशांशं तर्पयेत्प्रिये। शर्करोदक संयुक्तं तर्पयामि पदं सदा।। तद्दशांश हुनेद्देवि हस्तमात्रे सुकुण्डके। मोषापूपं त्रिमध्वाक्तं बदरी फल मात्रकम्।। हुनेत्सालुव सम्प्रीत्यै ध्यान युक्तं कुलेश्वरि ब्राह्मणान् भोजयेत्पश्चात् कार्य गौरव लाघवान्।। तद्यन्त्रं धारयेद्देवि शिष्याय च सपुत्रकः। वस्त्वपेक्षा न कुर्वीति एतद्यन्त्रं वरानने।। भौमे वा भार्गवे चार्के निशि यन्त्रं प्रपूजयेत्। षडक्षरं सालुवञ्च अयुतं प्रजपेत्प्रिये।। शत्रोरुच्चावाटनं भूत्वा काकवद् भ्रमते महीम्। कृष्णायाञ्च चतुर्दश्यामारभेद्यन्त्र मुत्तमम्।। रात्रौ पूजा जपश्चैव तावद्धेमो दिवा प्रिये। समापयेत्पौर्णमास्यां पूर्णाहुति समन्वितम्।। रणपलायनाख्यश्च प्रयोगो भुवि दुर्लभः। एतद्यन्त्रं वरञ्चैव द्वादशार्कस्य वासरे।। प्रातः काले लिखेद्यन्त्रं प्रेतवस्त्रे च पार्वती। प्रेतभस्म चिताङ्गार विष तैल समन्वितम्।। आलिखेन्नरस्याङ्गेन यन्त्रमेतद्विचक्षणः। वज्र क्षीणं चार्क क्षीरं श्वेत सर्षप संयुतम्।। मर्दयेन्मोहनद्रावैर्वरशल्येन पार्वति। सालुव मालिका मन्त्र लेपनं सम्यगाचरेत्।। त्रिकालं लेपनं कुर्यात् त्रिकालं तस्य माचरेत्। त्रिकाल वैरिणं ध्यायेत् सम्यज्ञान विचक्षणे। पक्षद्वयेन संयुक्तः शत्रुर्निर्मूलतां व्रजेत।। वज्रक्षीरमथार्कजं सममथो संगृह्यं भौमे निशि। चार्क पर्णतले फणीन्द्र गरयोः

तच्छल्ययोर्लेखिनी।। नवीननर दाहस्थान माश्रित्यतत्। पात्रे नग्न विमुक्त केश सहितः सम्यग् विलिखेत्तन्निशि।। त्रिकाल लेपनं वज्र क्षीरेण कमलेणयत्रिरात्र ज्वरमाप्नोति ग्रामे वा पत्तनेषुवा। एतद्यन्त्र प्रभावेण सर्वतो ज्वर पीडिताः।।

**अस्यार्थ :-**

त्रीणि बाला वीजानि देवी बाला त्रिकोणे विदलेषु केशरेषु मातृकया प्रथमं वेष्टनम्। द्वितीयं प्राण प्रतिष्ठाया।। ईशादिक्रमेणावेष्टनम्। वेष्टन वर्णाः सर्वे विन्दुयुक्ताः।। इति शिवम्।

अथ संप्रोच्यते सर्वं यन्त्रं साधारण क्रिया। स्नातः शुद्धाम्बर धरः पुष्पचन्दनभूषितः।। द्रव्यैः समुदितैरुक्त स्थले यन्त्रं लिखे द्रहः। षष्ठ्यान्तं साधक पदं मध्यबीजोपरि स्मृतः।। द्वितीयान्तं साध्यमधः पार्श्वयोः कुरु युग्मकम्। वियत् भृग्वौ सर्ग बीजं मध्यभागादधो लिखेत।। दशानादिचतुः कोणे हंसः सोऽहमत्युत नेत्रे श्रोत्रे पार्श्वे युग्मे दिग्बीजानि दिक्षु च। यन्त्र गायत्रिका वर्णान् प्रति काष्ठा यन्त्रराजाय सद्वन्ति विद्महे वर्त्तत पर प्रदाय धीमहि इत्यन्ते तन्नो यन्त्रः प्रचोदयात्। एषोक्ता यन्त्र गायत्री स्मृता सर्वेष्ट सिद्धिदा। बहिः प्राण प्रतिष्ठायाः मनुं सर्वत्र वेष्टयेत्।। स्थलानुक्तौ भूर्जपत्रे क्षौमे वा ताडपत्रतः। यन्त्रं विलिख्य गुलिकां वध्वा सूत्रेण वेष्टयेत्। लाक्षया छादितं स्वर्णे रौप्ये ताम्रेऽथवा क्षिपेत्। मध्य बीजेन देवेशं पूजयेदिष्ट सिद्धये।।

शान्तिर्वश्यं स्तम्भनञ्च द्वेषोच्चाटन मारणे। षडेतानि च कर्माणि सम्प्रोक्तानि प्रिये मया। चन्दनं रोचना रात्रिर्गृह धूमश्चिता भवः। अङ्गारोष्ट विशाणि स्युः सालुवो यन्त्र लेखने।। पिप्पली मरिचं शुण्ठीश्येन विष्ठा च चित्रकैः। गृह धूमामत्त रत्यौ लवणंञ्च विषाष्टकम्।। शान्तेवश्ये लिखेद्भूर्जे स्तम्भने द्वीपि चर्मणिखरचर्मणि विद्वेषे उच्चाटे ध्वज वाससि नरास्थीनि लिखेद्यन्त्रं मारणे मन्त्र वित्तमः।। हेमजा रूपजा जाति संभवा लेखनी शङ्ख दूर्वाकुरोत्पन्ना स्तम्भना गस्त्य बृक्षजा।। राज वृक्ष भवा वास्यात् विद्वेष तु करञ्जजा। विभीतकोच्छितोच्चाटे मारणे तु पुमस्थिजा।। शुभे कर्मणि रम्याहे लेखिनी रचयेत्सुधी। रिक्ता तिथौ कुजदिने विष्टौताम शुभे पुनः।। सम्यक्कृत्ता न्यासजामात्म रक्षां विधाय च। काम्यं कर्म प्रकर्त्तव्यमन्यथाभि भवो भवेत्।। शुभं वाप्यशुभं वापि काम्यं कर्म करोति यः। तस्यारित्वं ब्रजेन्मन्त्रो न तस्मात्तत्परोभवेत्।। विषयासक्त चित्ताना सन्तोषाय प्रकाशितम्। नाना तन्त्रोदितं काम्यं कर्म नैतद्धितावहम्।। काम्यं कर्म प्रसक्तानां तावन्मात्रं भवेत्फलम्। निष्कामं भजतामेव अखिलाभीष्ट सिद्धयः।। इति शरभार्चा पारिजाते रामकृष्ण विनिर्मिते काम्य यन्त्राः मोदभृतः मृप्तमस्तव कोऽगमत्।। रामकृष्ण विनिर्मिते शरभार्चा पारिजाते सप्तमः स्तवक।

**।।इति शिवम्।।**

## गारुड़मन्त्र

अस्य श्री आशु गारुडस्तोत्र महामन्त्रस्य शंख ऋषिः अनुष्टुप् छन्दः श्री आशुताक्ष्यों देवता गां वीजं गों शक्तिः गूः कीलकं मम आशुगरुड प्रीत्यर्थे जपे विनियोगः। गां अंगुष्ठाभ्यां नमः गीं तर्जनीभ्यां नमः गूः मध्यमाभ्यां नमः गेः अनामिकाभ्यां नमः गैः कनिष्ठिकाभ्यां नमः गोः करतल कर पृष्ठाभ्यां नमः गां ज्ञानाय हृदयाय नमः गों ऐश्वर्याय शिरसे स्वाहा गूः शक्तये शिखायै वौषट् गेः वलाय कवचाय हुं गैः तेजसे नेत्राभ्यां वौषट् गोः वीर्याय अस्त्राय फट् भूर्भुवस्वरोमिति दिग्बन्धः।

## ध्यानम्

आजानोस्तप्त हेमप्रभममलहिमं प्रख्यमानंहि तस्मा,
दाकर्णं कुंकुभाभं भ्रमरकुलमिवश्यामलं मूर्ध्नि केशम्।
ब्रह्माण्डं व्याप्त देहं भुजमहि प्रवरैर्भूषणैर्भूषिताङ्गं,
पिङ्गाक्षं ताक्ष्र्य दंष्ट्रं वरदमभयदं ताक्ष्र्यमुग्रं नमामि।।

ॐ नमो भगवते श्रीआशुगरुड़ाय गरुड़ाय महागरुड़ाय समस्ताण्डबहिस्त्रैलोक्यनायकाय नाग शोणिततीर्थाय

पक्षिराजाय विष्णु वाहनाय सर्वसर्वान् संहर संहर मं मर्दय मर्दय मोटाय२ त्रोटाय२ भ्रमय२ मुञ्च२ आगच्छ२ आवेशयावेशय शीघ्र२ समस्त भूतवेतालान्नाशय नाशय परमंत्र परहोम परजप परशून्य परक्षुद्रान् छेदय२ स्वविद्या मंत्रान् प्रकटय२।

ॐ नमो भगवते आशुगरुड़ाय स्वर्णपक्षाय विनतादास्य मोचनाय कश्यपानन्द वर्धनाय सर्पशत्रून्निवारणाय ॐहन२ दह२ ॐपच२ हन२ दह२ सर्वसर्पान्ति भक्षय२ सर्प विषान्नाशय नाशय हुं फट् स्वाहा गां अंगुष्ठाभ्यां नमः, गीं तर्जनीभ्यां नमः गूः मध्यमाभ्यां नमः गेः अनामिकाभ्यां नमः गैः कनिष्ठिकाभ्यां नमः गोः करतलकर पृष्ठाभ्यां नमः, गां ज्ञानाय हृदयाय नमः गीं ऐश्वर्याय शिरसे स्वाहा, गूः शक्तये शिखायै वौषट् गेः वलाय कवचाय हुं, गैः तेजसे नेत्राभ्यां वौषट्, गोः वीर्याय अस्त्राय फट्, भू भुंवस्सुवरोम्–इति दिग्बन्धः।

।।गरुड़मन्त्रः समाप्तः।।

## आशुगारुड़ मंत्र

अस्य श्री आशुगारुड़ मन्त्रास्य शंकर ऋषिः जगतीच्छन्दः आशुगारुड़ोदेवता गं वीजं स्वाहा शक्तिः सर्वविष हरणे विनियोगः गामित्यादि षडंगन्यासः।।

### ध्यानम्

आजानोस्तप्त हेमप्रभमलहिम प्रख्यमानाहितस्मात्,
आकण्ठः कुंकुमाभं भ्रमरकुलमिवश्यामलंऊर्ध्वकेशम्।
ब्रह्माण्डव्याप्त देहं द्विज महिप्रवरै र्भूषिताङ्गम
पिङ्गाक्षं तीक्ष्ण दंष्ट्रं वरदमभयदं तार्क्ष्यमुग्रं नमामि।।

**मन्त्रम्**

ॐ श्रीं गरुडाय महागरुड़ाय समस्ताण्डाद्वहि स्त्रैलोक्य नायकाय नागशोणित दिग्धाङ्गाय ॐ पक्षिराजाय विष्णु वाहनाय सर्प सर्प संहर संहर मठ मठ मर्दय२ मोटय२ लोपय२ त्रौटय२ भ्रामय२ मुञ्चय२ आकर्षय२ आगच्छागच्छ आवेश्य२ सिद्धय२ शीघ्र२ समस्त भूतवेतालान् नाशय२ सर्वग्रहान् नाशय नाशय सर्वशत्रून विद्रावय२ सर्वदुष्टान् विनाशय विनाशय सर्वविषं नाशय नाशय स्वाहा–

इतिषट् सप्तत्युत्तर शताक्षरोऽयं मन्त्रः विषहरण भूतनिग्रह प्रधानश्च। द्वादश सहस्त्रं जपः गुरुपदिष्टेन तिलनलैः शतांशं होमः पूर्वोक्तवत।।

**।।अथ दारुण सप्तकम्।।**

अथ दारुण सप्तकम्। वंदे गुरु पद द्वंद्वमवाङ्मनसगोचरम् रक्त शुक्ल प्रभामिश्रमतर्क्यं भैरवंमहः। अस्य श्री दारुण सप्तक माला मन्त्रस्य श्री सदाशिव ऋषिः वृहती छंदः श्री शरभो देवता मम वैरि

विनाशार्थे जपे विनियोगः।। ईश्वर उवाच–कोपोद्रेकाति निर्य्यन्निटिल परिचरत्तार भार प्रभूत। ज्वालामालाग्रताम्यत्स्मरतनु शलभं त्वामहं सालुवेश।। याचेत्त्वत्पाद पद्म प्रणिहित मनसं द्वेष्टि मां यः क्रियाभिस्तस्य प्राण प्रयाणं पर शिव भवतः शूल भिन्नस्य तूर्णम्।। शंभोत्त्वद्धस्तकुंतक्षतरिपुहृदयान्निस्स्रवलौहितौघं पीत्वा पीत्वाति दीर्घा दश दिशि विसरास्त्वद्गणाश्चंड मुख्या।। गर्जन्तु क्षिप्रवेगा निखिलजयकराभीकराः खेल लोलाः संत्रस्ता ब्रह्म देवाः शरभ खगपते त्राहि नः सालुवेश।।२।। सर्वाद्यं सर्वनिष्टं सकल भयहरं त्वत्स्वरूपं शरण्यं याचेहं त्वाम मोघं परिकर सहितं द्वेष्टि मां यः क्रियाभिः। श्री शंभोत्वत्कराब्जस्थितहल कठिना घात वक्षः स्थलस्य प्राणाः प्रेतेशदूत ग्रहण परिभवाः क्रोशपूर्व प्रयांतु।।३।। द्वेष्यक्षोण्यां वयं यत्तव पद कमल ध्यान निर्द्धूतपापाः कृत्याकृत्यैर्विमुक्ता विहग कुलपते खलयाबद्ध मूर्त्ते।। तूर्णं त्वत्पाद पद्म प्रभृत परशुना तुंड खंडी कृताङ्गः सद्वेषी यातुयाम्यं पुरमतिकलुषं काल पाशाग्र वद्धः।।४।। भीम श्री सालुवेश प्रणतभय हर प्राण जिद्दुर्मदानां याचेहं चात्य गर्वप्रशमन विहितस्वेच्छया बद्ध मूर्त्ते।। त्वामेवाशुत्त्वदं घ्रयष्टक नखविदलद्दीन जिह्वो दरस्य प्राणोत्क्राम प्रयाण प्रदलित हृदय स्यायुरल्पाय तांद्राक्।।५।।

श्री शूलं तेकरा ग्रेस्थित मुसल गदावर्त्त वाताभि

घाताद्यातायातारियू थत्त्वरित विघटनोद्भूत रक्तच्छटार्द्रम्।। संहृष्ट्वायो धनेज्यामखिल सुरगणाश्चाशु नन्दन्तुनाना भूतावेताल पूगः पिवतु तदखिलं प्रीत चित्तः प्रमत्तः।।६।। त्वंहो हेलाग्र मुक्त प्रकटित विनमच्चंड कोदंड मुक्तैर्बाणैर्दिव्यैरनेकैः शिथलित वपुषः क्षीण कोलाहलस्य तस्य प्राणावसानं परशरभरिपो र्यत्त्वदीज्याप्रभावैस्तूर्ण पश्यामि यो मां परिहसति सदा त्वादिमध्यांतहेतोः।।७।। इति निशि प्रयतः सनिरामिषो यम मुखः शिव भावमनुस्मरन्।। प्रतिदिनं दशवार दिनत्रयं जपति निग्रह दारुण सप्तकम्।।८।। इति गुह्यं महाबीजं परमं रिपुनाशनम्। भानुवारं समारभ्य मंगलांतं जपेत्सुधीः। इति श्री मदाकाश भैरव तंत्रे प्रत्यक्ष सिद्धि प्रदे नृसिंह कृत शरभ स्तुतिः समाप्ता।।

अथ संकल्पः।। अद्यामुके मासि अमुके पक्षेऽमुक तिथौ यथा नाम गौत्रो अमुक कार्य सिद्धयर्थममुक दैवत कामुक मंत्रस्यामुक संख्य जपम् धारयामियथाकाले।

प्रयोगात्मक :-

## ।।श्री दारुण सप्तकम्।।

### अथ संकल्प

श्री गणेशाय नमः ॐ अस्य श्री दारुण सप्तक स्तोत्र महामन्त्रस्य वामदेव ऋषिः जगती छन्दः शरभ सालुव कालाग्नि रुद्रो देवता खं बीजं ह्रीं शक्तिः हुं फट् कीलकम्

मम ये ते प्रति कूल कारिणः तेषां पलायनार्थे दारुण सप्तकमह करिष्ये। अथ करन्यासः। ॐ ह्रां खाँ अङ्गुष्ठाभ्यां ॐ ह्रीं खीं तर्जनीभ्यां ॐ हूं खूं मध्यमाभ्यां ॐ ह्रैं खैं अनामिकाभ्यां ॐ ह्रौं खौं कनिष्ठिकाभ्यां ॐ ह्रः खः कर तल कर पृष्ठाभ्यां फट्।। अथध्यानम्।। चन्द्रार्काग्निस्त्रि दृष्टिः कुलिशवरनखश्वंचलोत्युग्र जिह्वः काली दुर्गा चपक्षौ हृदय जठरग्नो भैरवो वाडवाग्निः। ऊरूस्थौ व्याधिम्मृत्यू शरभः वरखगश्चण्डवातातिवेगः संहर्ता सर्व शत्रून् स जयति शरभः सालुवः पक्षिराजः। ईश्वर उवाच।। ॐ खें खां घ्रां घ्रं ह्रां ह्रूं फट् सर्व संहारणाय शरभ सालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्रीं दें खीं वं खीं दं खं तममुकनामान शत्रुं नाशय ॐ श्लीं पशु हुं फट् घ्राण्येव हुं फट् त शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फ घृणे हुं फट् कोपोद्रेकाति निर्यन्निखिल परिचरत्ताम्रभार प्रभूत, ज्वालामालाग्रदग्ध स्मर तनु सकलं त्वामहं सालुवेश। याचे त्वत्पाद पद्म प्रणिहित मनसो द्वेष्टिमां यः क्रियाभिः, तस्य प्राणा प्रयाणं पर शिवभवतः शूलभिन्नस्य तूर्णम्।।१।। ॐ नमो भगवते वाडवानल भैरवाय ज्वल २ वैरिकुलं दह २ वर्म २ ठः २ सर्व शत्रूणामुच्चाटनं कुरु २ हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट्।।१।। ॐ खें खां घ्रां घ्रं ह्रां ह्रूं फट् सर्व शत्रु संहारणाय शरभ सालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्रीं दे खीं व खीं दे

खंतमममुक नामानं शत्रुं नाशय ॐ श्लीं पशु हुं फट् घ्राण्येव हुं फट् त शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खं खें फं घृणे हुं फट् शम्भोत्वदधस्त कुन्तक्षतरिपुहृदयान्निः स्रवल्लौहितौघां पीत्वा पीत्वातिदीर्घा दिशि २ विचरास्त्वद्गणाश्चण्डमुख्या, गर्जन्तु क्षिप्रवेगानिखिल जयकराभीकराः खेल लोलाः संत्रस्ता ब्रह्मदेवाः शरभ खगपते त्राहिन सालुवेश ।।२।। ॐ नमो भगवते वाडवानल भैरवाय ज्वल २ वैरिकुलं दह दह वर्मं वर्मं ठः २ सर्वं शत्रूणामुच्चाटनं कुरु कुरु हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फट् घृणे हुँ फट्।।२।। ॐ खें खां घ्रां घ्रं ह्रां ह्रं फट् सर्व शत्रु संहारणाय शरभ सालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा हीं दे खीं दं खीं द ख तममुक नामानशत्रुं नाशय ॐ श्लीं पशु हुँ फट् घ्राण्येव हुं फट् शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खं फ घृणे हुं फट् सर्वाद्यं सर्व निष्ठं सकल भय करं त्वत्स्वरूप हिरण्यं याचेहं त्वाममोघ परिकर मिहतेद्वेष्टि मां यः क्रियाभिः। श्री शम्भोत्वत्कराब्ज स्थित कुलिश कराघात वक्षः स्थलस्य, प्राणा प्रेतेश दूतग्रह गण परिखाः क्रोश पूर्वं प्रयातु।।३।। ॐ नमो भगवते वाडवानल भैरवाय ज्वल २ वैरिकुल दह २ वर्म २ ठः २ सर्वशत्रूणामुच्चाटनं कुरु२ हुं फट् सर्वज्ञ सर्वज्ञ ॐ ह्रीं खं खं फं घृणे हुं फट्।।३।। ॐ खें खां घ्रां घ्रं ह्रां घं फट् सर्व शत्रु संहारणाय शरभ सालुवाय कालाग्नि रुद्राय पक्षिराजाय

हुं फट् स्वाहा ह्रीं देखीं वखीं दखं त्तममुक नामानं शत्रुं नाशय ॐ श्लीं पशु हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खं खें फं घृणे हुं फट् द्विष्मः क्षोण्यां वयंहि तव पद ध्याननिर्धूते पापाः कृत्याकृत्यैर्विमुक्ता विहग कुलपते खेलयावद्ध मूर्ते। तूर्णं त्वत्पाद पद्म प्रभृति परशुना तुण्ड खण्डीकृत्तांगः। स द्वेंषी पातुयाम्यं पुरमति कलुषं कालपाशाग्रबद्धः।।४।। ॐ नमो भगवते वाडवानल भैरवाय ज्वल२ वैरिकुल दह२ वर्म२ ठः२ सर्व शत्रूणामुच्चाटनं कुरु२ हुँ फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हूं फट्।।४।। ॐ खें खां घ्रां घ्रं ह्रां ह्रं फट् सर्व शत्रु संहारणाय शरभ सालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्रीं देखीं वखीं दखंत्तममुकनामांनं शत्रुं नाशय ॐ श्लीं पशु हुं फट् घ्राण्येव हूं फटं तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् भीमः श्री शालुवेश प्रणतभयहरः प्राणजिद्दुर्मदानां याचे हं चास्य वर्ग प्रशमनमिहते स्वच्छया बद्धमूर्ते त्वामेवाशु त्वं दघ्नयष्टक नख विद लद् ग्रीव जिह्वोदरस्य प्राणायात्तु प्रयाणं प्रकटित हृदयस्यायुरल्पायतेश।।५।। ॐ नमो भगवते वाडवानल भैरवाय ज्वल२ वैरिकुलं दह२ वर्म२ ठः२ सर्व शत्रूणामुच्चाटनं कुरु२ हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट्।।५।। ॐ खें खां घ्रां घ्रं ह्रां ह्रं फट् सर्वशत्रु संहारणाय शरभ सालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्रीं देखीं वखीं दखंत्तममुक

नामानं शत्रुं नाशय ॐ श्लीं पशु हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् श्री शूलं ते कराग्र स्थित मुसल गदा वृत्त वात्याभिघाताद् यांतांयातारियूथं त्रिदश विघटनोध्दूत रक्त छटार्द्रं सद्दृष्ट्वा योधने ज्यामखिल सुरगाश्चाशु नन्दन्तु नानाभूता वेताल पूगः पिवतु तदखिलं प्रीतचित्तः प्रमत्तः।।६।। ॐ नमो भगवते वाडवानल भैरवाय ज्वल२ वैरिकुलं दह२ वर्म२ ठः२ सर्व शत्रूणामुच्चाटनं कुरु२ हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट्।।६।। ॐ खें खां घ्रां घ्रं ह्रां ह्रूं फट् सर्व शत्रु संहारणाय शरभं सालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्रीं देखीं वखीं दखंत्तममुक नामानं शत्रुं नाशय ॐ श्लीं पशु हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् अल्पं दोर्दण्ड बाहु प्रकटित विनमच्चण्ड कोदण्ड मुक्तैर्बाणैर्दिव्यैरनेकैः शिथिल तवपुषः क्षीण कोलाहलस्य। तस्य प्राणावसानं परशरभरिपोहंत्वदिज्या प्रभावैस्तूर्णं पश्यामि यो मां परिहसति सदा त्वादि मध्यान्त हेतोः।।७।। ॐ नमो भगवते वाडवानल भैरवाय ज्वल२ वैरिकुलं दह२ वर्म२ ठः२ सर्व शत्रूणामुच्चाटनं कुरु२ हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् इति निशि प्रयतस्तु निराशनोयममुखः शिवभावमनुस्मरन्। प्रतिदिनं दशबारं दिनत्रयं जपति निग्रहे दारुण सप्तकम्।।८।। इति गुह्यं महाबीजं परम रिपु

नाशनम्।। भानुवारं समारभ्य मंगलान्तं जपेत् सुधीः।।६।। इति श्री आकाश भैरव कल्पे प्रत्यक्ष सिद्धि प्रदे नृसिंह कृते शरभस्तुतिः समाप्ता।।

## सभाष्यम् निग्रह–दारुण सप्तकम्

**श्री गणेशाय नमः**

**भाष्यम्**

यतो वा इमानि भूतानि जायन्ते इत्यादि श्रुत्या उत्पत्ति स्थिति संहारा ब्रह्माण एव धर्माः श्रूयन्ते। उत्पत्तिम् आश्रित्य कर्म काण्ड प्रवृतिः, स्थितम् आश्रित्य उपासना मार्गो भक्ति मार्गो वा, संहारम् आश्रित्य ज्ञानकाण्ड इति च त्रिदेव निर्णये व्याख्यातम्। इदम् एव आश्रित्य तस्य च ब्रह्म विष्णु रुद्रादि संज्ञा च क्रमेण भवति। अथ च। दारुण सप्तक नाम–निग्रह दारुण सप्तकम् इति च पूर्ण नाम्नि स्तोत्रे संहारार्थकं भगवच्छिवपरं तत्त्वं निर्णीतम्, तच्च ज्ञानमार्ग प्रधान योग साधनकम्, ज्ञानम् अग्नित्वेन च स्वीकृतं गीतायां यथा–

'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन।' अविद्या रूपध्वान्तावस्थायां काम क्रोध लोभात्मकान्येव 'सर्व कर्माणि' कार्यकारण भावमाश्रित्योक्तानि। प्रतिकूल कारित्वेन च यथा इम एव शत्रु पदवाच्या उच्यन्ते, तथाऽन्तिमे पद्ये दर्शयिष्यामः एतेषामेव मारणार्थं पलायनार्थं

वा स्तोत्र विनियोगः। नच शत्रु पदेनात्र लौकिक शत्रूणां ग्रहणमिति वाच्यं चतुर्थश्लोक विपरीततत्वात्। 'नमस्ते रुद्र मन्यवे' इति भाष्ये अग्नि रूपेण रुद्रः स्तुतः। ऋग्वेदे अग्ने रुद्रत्वमति विशदम। अतएव संहार भाव सिद्धिः। मन्यो राग्नेयभावस्य प्रसिद्धत्वम्।

## मूलम्-

**ध्यानम्**

चन्द्रार्काग्निस्त्रि दृष्टिः कुलिशवरनखश्चञ्चलोऽत्युग्र जिह्वः काली दुर्गा च पक्षौ हृदय जठरगो भैरवो वाडावाग्निः। ऊरूस्थौ व्याधि मृत्यू शरभवरखगश्चण्डवातातिवेगः संहर्ता सर्वशत्रून् स जयतिशरभः शालुवः पक्षिराजः।।१।।

## भाष्यम्

चन्द्रार्काग्निः त्रिदृष्टिः विधुसूर्याग्नि नेत्रवान् विराट् रूपी भगवान् कुलिशवरनखः वज्रसदृशनखः, इत्यनेन भोग सम्पादने क्षमत्वं सूचितम्। चञ्चलः प्रतिक्षणं क्रियाशीलः। अत्युग्रजिह्व अत्युग्रः प्रचण्डाः सप्तजिह्वा यस्याऽसौ, कर्मिणां फलप्रदानं साधनत्वेन मुण्डके प्रसिद्धाः। काली दुर्गा च पक्षौ। काली कालस्य सर्ववस्तु नियामिका शक्तिः। दुर्गा दुःखेन गन्तुं योग्या सर्वदेवमयी पराशक्तिः।, श्रीश्च ते लक्ष्मीश्च' अहो रात्रे पार्श्वें' इतिवत् पक्षौ। इमे द्वे शक्ति भगवतः पक्षस्थानीये जगद्रूपकार्यकरणे आश्रय भूते।

हृदयजठरगः हृदयगतं जठरं वैश्वानरं गच्छतीति हृदयस्थानीयो वैश्वानररूपः वाडवाग्निः जलेऽपि तस्य ज्वलन स्वभावः, सर्वदा विद्यमानत्वात्। भैरवो नित्योद्यमशीलः। 'उद्यमो भैरव' इत्युक्तत्वात् शैव सूत्रे। ऊरुस्थौ व्याधिमृत्यू व्याधिश्च मृत्युश्च तौ पापिनां कृते कामक्रोध रतानां मूढानां कृते आवश्यकत्वात्। शरभवरखगः शृणातीति शरभः मूलाज्ञान निवर्तकः स चासौ वरश्च। खगः खे गच्छतीति आकाशवद् व्यापनशीलः, खं वीजं, तेन गम्यते लक्ष्यते इति वा खगः। खं बीजं भगवतः शरभस्य प्रसिद्धम्। चण्डवाताऽतिवेगः चण्डवायुरिव अतिवेगः भक्तानां रक्षणे, शीघ्र गामी सर्वांतिशा यित्वात्। तदेजदिति मंत्रानुसारं सर्वंशत्रून् काम क्रोधादीन् संहरतीति संहर्ता विनाशकः। पक्षिराजः पक्षिणां जीवानां राजा पक्षिराजः समासान्तः टच्। 'वैनतेयश्च पक्षिणाम' इत्युक्तत्वात्। शालुवः शालते शोभते इति शालुवः उणादित्वात् साधुः। सर्व शोभा सम्पन्नः। क्वचिद् दन्त्यादिः। सार दौर्बल्ये 'रलयोर्न भेदः' इत्यनेन निष्पत्तिः। सारयति शत्रूणां दौर्बल्यं सम्पादयतीति सालुवः। षल् गतावित्यनेन वा चण्डवातातिवेग इत्यनेन गतिशीलत्वस्य प्रतिपादनाच्च। क्वचित् साल्व इत्यपि पाठो दृश्यते। शरभः जयति सर्वोत्कर्षेण वर्ततेतराम् इत्यर्थः।

आध्यात्मतत्त्व साक्षात्कार लब्धये कामस्य प्रधानं शत्रुत्वमभिलक्ष्य स्तोतुमुपक्रमन्नाह कोपोद्रेकेति। यतः

रुद्ररूपिणः शिवस्यैव कामदाहे प्रसिद्धिः। समाधि विघ्न विधायिनं काममेवाह हन्तुं भगवान श्रीकृष्णः—जहि

शत्रुं महाबाहो कामरूपं दुरासदम् इति।।१।

## मूलम्

कोपोद्रेकातिनिर्यन्–निखिलपरिचरत् – ताम्रभारप्रभूतं ज्वालामालाग्रदग्धस्मरतनु सकलं त्वामहं शालुवेश याचे त्वत्पाद पद्मप्रणिहितमनसं द्वेष्टिमां यः क्रियाभिस्तस्य प्राणप्रयाणं परशिव भवतः शूलभिन्नस्य तूर्णम्।।२।।

## भाष्यम्

कोपस्य क्रोधात्मकाग्नेयरूपस्य उद्रेकः वृद्धि तया अतिनिर्यत निर्गच्छत्। निखिलेषु कामजन्य–पदार्थेषु परिचरत् परितः प्रसरणं कुर्वत्। ताम्र–भारवत् प्रभूतं रक्तवर्णवद् राशिभूतम् आग्नेयस्य रक्तवर्णत्वात्। ज्वालामालाग्रदग्धम् ज्वालाया माला अग्निरूपस्य ज्ञानस्य माला अविच्छिन्न–प्रवाहरूपा वृत्तिर्गृह्यते। तदग्रेण प्रधानेन दग्धं भस्मीकृतं स्मरतनुसकलं कामशरीरसाकल्यं येनतं दग्ध कामदेहं त्वाम्, हे शालुवेश अहं याचे प्रार्थये। यथा त्वमकार्षीः तथाऽहमपि कुर्यामिति भावनया त्वत्पादपद्म प्रणिहित मनसं त्वच्चरणारविन्दार्पितचित्तं मां यः कामः क्रियाभिः स्वव्यापारैः द्वेष्टि अप्रीतिं जनयति। परशिव भवतः तव शूलभिन्नस्य शूलेनभिन्नस्य त्रिविधतापद्वैधी भावमापन्नस्य

तस्य कामस्य प्राणप्रयाणं विनाशं तूर्ण शीघ्रं याचे इति पूर्वेण सम्बन्धः।।२।।

सर्वानर्थस्य काम मूलकत्वात् तन्निवृतौ सामर्थ्यविशेषमाह शम्भो इति :–

## मूलमः

शम्भो त्वद्धस्तकुन्तक्षत रिपुहृदयान्निःस्रवल्लोहितौघं पीत्वापीत्वाऽतिदीर्घा दिशिदिशि विचरास्त्वद्गणाञ्चण्ड मुख्याः। गर्जन्तुक्षिप्रवेगा निखिलजयकरा भीकराः खेललोलाः संत्रस्ताब्रह्मदेवाः शरभखगपते त्राहि नः शालुवेश।।३।।

## भाष्यम्

शं कल्याणं भावयतीति शम्भुः शिवः सम्बोधने शम्भो। त्वद्हस्ते धृतः। कुन्तः कुं पृथिवीतत्त्वमनुत्तीति। उन्दी क्लेदने बाहुलकात्तः शकन्ध्वादिः तस्मात् क्षतं विदीर्णं यद् रिपुहृदयो तस्मात् निःस्रवन्तं निस्सरन्तं लोहितौघं रक्तप्रवाहं षट्चक्रभेदमापाद्य रक्तवर्णममृत प्रवाहं पीत्वापीत्वा मुहुर्मुहुःपानं विधाय अतिदीर्घा वलिष्ठाअमृतस्य रक्तवर्णत्वात्। पादुकापञ्चके स्वीकृतमेतत्। त्वद्गणाश्चण्डमुख्याः चण्ड भाव प्रधाना दशप्राणाः। 'सहचरा प्राणाः' इति भगवत्पादाचार्याः। दिशिदिशि विचराः सर्वत्र गतिमन्तः क्षिप्रवेगाः प्रसरणशीलाः प्राणनिरोधेश्रमराहित्यम अनेनगम्यते। अतएव निखिलजयकाराः निखिलेषु इन्द्रियगणेषु जयकराः विजयप्रदाः। भीकराः भियं कुर्वन्तीति,

कामगणानां त्रासकारिणः। खेललोलाः खेलेन लोलाः श्वासप्रश्वासक्रियया चञ्चलाः। संत्रस्ताब्रह्मदेवाः सन्त्रस्ता आब्रह्मदेवा बुद्धीन्द्रियाणि यैस्ते योगिनः गर्जन्तु विजयिनो भवन्तु। प्रश्नोपनिषद्युक्त प्राण–कथादनुसर्तव्या। हे शरभखगपते शालुवेश नः अस्मान् त्राहि रक्ष। कामस्यानङ्ग त्वादपि अङ्गारोपवत् कथनं सुलभेन बोधाय। यथामनुः नीरूपस्यापि दण्डस्य रूपम्।

यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा।
प्रजा तत्र न मुह्यन्ति नेता चेत् साधुपश्यति।।३।।

–अ. ७३५।२०

सर्वव्यापित्वगुणैः स्तुवन् स्वाभिलषितमाह सर्वाद्यमिति।

## मूलम्

सर्वाद्यं सर्वनिष्ठं सकलभयकरं त्वत्स्वरूपं हिरण्यं
याचेऽहं त्वाममोघं परिकरसहितं द्वेष्टिमां यः क्रियाभिः।
श्रीशम्भो त्वत्कराब्जस्थित कुलिशकराघात वक्षः स्थलस्य
प्राणाः प्रेतेशदूत ग्रहणगपरिखाः क्रोशपूर्व प्रयान्तु।।४।।

## भाष्यम्

हे प्रेतेशदूत, प्रेतेशो भगवान्शिवः तस्यदूतः वार्ताहिरः प्रापकः सम्बोधने रूपमिदम्। गुरुरूपेण तत्तत्त्वोपदेष्टा। सर्वाद्यं सर्वप्रमुखं सर्वनिष्ठ सर्वस्मिन् नितरां तिष्ठतीति सर्वव्यापी। कलयासहितं सकलं पापिनां त्वत्स्वरूपं

कम्पनाद् इत्यधिकरणोक्तम्। महद् भयमुद्यतमित्यादि। हिरण्यं हिरण्यवर्ण परिकरसहितं सर्वसाध्यसाधनैक नींडम् अमोधं सफलं सत्यस्वरूपम् श्री शम्भो श्री श्रियासहितः शम्भुः सम्बोधने श्री शम्भो। यः कामः क्रोधो लोभो वा क्रियाभिः स्वस्वव्यापारैः मां द्वेष्टि प्रीत्यभावमुत्पादयति। अतः अहंत्वां भवन्तंयाचे प्रार्थये यत् त्वत्कराब्जस्थितेन कुलिशेन शासनात्मकदण्डभूतेन कराघातेन वक्षः स्थले हृदये यस्य तस्य प्राणाः प्रकर्षेण चेष्टन्ते इति प्राणव्यापाराः ग्रहण परिखा ग्रहगणे स्वानुकुलग्रहैः रक्षिता अपि क्रोशपूर्व प्रयान्तु दूरी भवन्तु। ते स्वव्यापारकरणे निष्फलाः सन्तु इत्यभिप्रायः।।३।। 'योमां द्वेष्टि यं च वयं द्विष्मः' शरभंते शुगृच्छतु यंद्विष्मस्तं तेशुगृच्छन्तु (य० १३) इतिमंत्राभ्यां यदुक्तं, तत् कथयति द्विष्म इति।।४।।

## मूलम्

द्विष्मः क्षोण्यां वयं हि तव पद कमल ध्यान निर्धूत पापाः कृत्या कृत्यैर्विमुक्ता विहग कुलपते खेलया वद्ध मूर्ते। तूर्ण त्वत्पादपद्म प्रवृत परशुना तुण्ड खण्डी कृताङ्गः सद्द्वेषी यातु याम्यं पुरमति कलुषं काल पाशाग्रबद्धः।।५।।

## भाष्यम्

द्विष्मः अप्रीतिं कुर्मः संसार विषयं वैराग्यार्थम्। हे विहगकुलपते पक्षिराज, खेलया लीलया बद्ध मूर्ते गृहीत विग्रह–क्षोण्यां पृथिव्यां हि निश्चयेन। तव पद कमल ध्यान

निर्धूतपापाः तव पद कमल ध्यानेन चिन्तनेन निर्धूत पापाः सर्व दोष रहिताः शुद्धाः। योगिनः कर्म कुर्वन्ति–आत्मशुद्धये इति गीता। कृत्या कृत्यैर्विमुक्ताः कृत्याया कृत्यानि मारणोच्चाटनादीनि कर्माणि तैर्विमुक्ताः रहिताः सन्तः। एतेन मारणोच्चाटनादिषु अयंस्तवो विनियुज्जते इत्यज्ञान मूलकमेव सिद्धयति तद्राहित्यविधानात् प्रमाणाभावाच्च। अथ च कृत्याकृत्यैर्विमुक्ता इत्यनेन कृत्यानि विधि ज्ञाप्यकर्माणि अकृत्यानि निषेध कर्माणि तैर्विमुक्ताइत्यर्थो गृह्यते चेत् तर्हि सर्वथा कर्म मार्ग प्रतिषेधेन ज्ञान मार्गस्य सिद्धिः। एवं सति मारणादिकृत्यस्य कथा दूरादेवा अपास्ता वेदितव्या भवति। अत एव शत्रु पदेन लौकिक शत्रु ग्रहणं सर्वथा विप्रतिषिद्धमेव। मारणाद्यर्थे कृती छेदने तथा कर्माद्यर्थे डुकृञ् करणे च इत्युभयेषां प्रयोगः आंग्ल मराठी कोषे कृत्यापदमेवं व्याख्यातम्–

कृत्या a female deity to whom sacrifices are offered for destruction of magical purposes.

कृत्याकृत्य right and wrong doings proper and improper actions (Page 107)

वयं तव भक्ता विमुक्ता भवाम इति सम्बन्धः। आत्मशुद्धस्य मुक्तावधिकारात्। प्रत्वत्पादिपद्म धृत–परशुना अज्ञानिनां कृते परशु रूपत्वात् तेषां छेदने समर्थत्वादित्यर्थः। तुण्डखण्डीकृताङ्गः तुण्डेन खण्डीकृताङ्गः।

प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया। ध्वस्त मुखो विदग्धशाकल्यवत्। सद्द्वेषी विषयादिषु प्रवृत्तत्वा त् दृढाहङ्कारत्वाच्च अतएव अति कलुषं मलिनं काल पाशा ग्रबद्धः कालस्य यमस्य पाशः विततो मृत्यु पाशः इति श्रुतेः। तस्याग्रेण बद्धः सन् याम्यं पुरं यातु यातुमिच्छतीतयर्थः। इच्छार्थेभ्यो विभाषा वर्तमाने' पा० ३।३।१६० 'पुनः पुनर्वश मापद्यते मे' इति श्रुतेः। परमात्मज्ञानरहितस्य संसारे पच्यमानत्वं श्रुति प्रसिद्धमिति परमार्थः।।५।।

रागद्वेषादकामवर्गस्य निवृत्तिमाह भीम' इति।

## मूलम्

भीम श्री शालुवेश प्रणतभयहर प्राणजिद् दुर्मदानां
याचेऽहं चास्य वर्ग प्रशमनमिह ते स्वेच्छया बद्धमूर्ते।
त्वामेवाशु त्वदङ्ध्यष्टकनख विलसद्ग्रीवजिह्वोदरस्य
प्राणायान्तु प्रयाणं प्रकटित ह्वदयस्यायुरल्पायतेश।।६।।

## भाष्यम्

हे प्रणतभयहर शरणागत रक्षक श्री शालुवेश, हे अल्पायतेश दीनरक्षक, दुर्मदानां राक्षसानां प्राणजिद् नाशकः अत एव भीमः। इह संसारे स्वेच्छया बद्धमूर्ते स्वेच्छया गृहीत देहः कर्तुमकर्तुमन्यथा कर्तुम समर्थत्वात्। अस्य रागद्वेषादिकाम वर्गस्य प्रशमनम्, अस्य संसारस्य वा इदिमा संविधायित्वात् वर्गप्रशमनं निवृतिं ते त सशकाशात् अहंत्वामेवाशु शीघ्रं याचे द्विकर्मकत्वात् प्रकटित ह्वदयस्य

सवृत्तिवस्य प्रकटित बहिर्भावस्य त्वदङ्ध्र्यष्टक नखैः विदलद् ग्रीव जिह्वोदरस्य तव चरणाष्टकैः अष्ट भैरवैः नष्ट सामर्थ्यस्य द्वेष वर्गस्य संसारस्य आयुः जीवन कालः प्राणाः सामर्थ्यं प्रयाणंयान्तु स्वरूपे विलीनतां गच्छन्तु इत्यर्थः रागद्वेषमय संसारस्य निवृतौ सत्यां सम्यक् तत्त्वज्ञानं भवतीति भावः।।६।।

यज्ञ रूपकेणाऽह श्री शूलमिति–

## मूलम्

श्रीशूलं ते कराग्रस्थित मुसलगदा वृत्त वात्याभिघातात् यातायातारियूथं त्रिदश विघटनोध्दूतरक्तच्छटार्द्रम्। सद् दृष्टावऽऽयोधने ज्यामखिलसुरगणाश्चाशु नंदन्तु नाना भूत वेतालपूगः पिबतु तदखिलं प्रीतचित्तः प्रमत्तः।।७।।

## भाष्यम्

हे शरभ खगपते ते तव कराग्रस्थित मुसलगदा वृत्तवात्या तव कराग्रस्थिते मुसलगदे सामर्थ्यविशेषे तयोर्वृत्तेन भ्रमणजात चक्राकारेण वात्या वात समूह रूपेण अतिवेग सामर्थ्येन अभिघाताद् यातायातारियूथं चराचरारिमंडलं त्रिदशानां देवानाम् इन्द्रियाणामित्यर्थः। विघटनम् अस्वास्थीकरणम्, तेन उद्धूतोद्रिक्तं रक्तच्छटार्द्रं रुधिर धारया कर्दमी भूतं रक्तान्यधातुभिः मिश्रीकरणं सद्आयो धनेज्यां युद्ध रूपं यज्ञम् युद्धमायोधनं जन्यमित्यमरः।

भूताश्च प्राणिनः पञ्चभूतानिच
ष्टवा नन्दन्तु प्रसन्ना भवन्तु
प्रसन्नो वेतालपूगः प्राणविशेष
वेतालपूगस्य आग्नेय भाव
क्षेत्रं यज्ञं कृत्वा निर्दिष्टवान्
यज्ञोऽत्राभिप्रेतः देवासुर
युद्धकारित्वेन च प्रसिद्धत्वात्।
वैचित्यरूपं मुसलगदारूपं,
ति प्राणानां वृत्याकारेण

ार्थ्यामवाप्यहर्षितो गर्जितः सन्

नम्

कटित विनम्रच्चण्ड को
थिलितवपुषः क्षीणकोलाहलस्य
भोऽहंत्वदिज्या प्रभावैः तूर्णम
दा त्वादिमध्यान्त हेतो।।८।।

यम्

मध्यान्तहेतो उत्पत्ति स्थिति
तव सङ्गतीकरण रूपैः प्रभावैः
दा मां परहसति इन्द्रियगणः,

त्वत्कृपया वशीभूते तस्मिन्, परहासः कीदृश इति पश्यामि इति साभमानोक्तिः। उक्तिं च तुलसीदासे–परवशदेखहँस्यौ इनि इन्द्रिन स्ववश होय न हंसे हौं।'

अल्पं निम्नं दोर्दण्डो भुजदण्डश्चासौ बाहुश्च तेन प्रकटितो विनमच्चण्डोदण्डः प्रहरण सामर्थ्य विशेषः। प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते,' इति श्रुतिः। तेन मुक्तैरनेकैः दिव्यैः साधनरूप सामर्थ्यैः शिथिलितवपुषः क्षीणकोलाहलस्य क्षीणशरीरस्य कार्श्यमापन्नस्य विक्षेपरहितस्य तस्य इन्द्रियगणस्य प्राणावसानं सामर्थ्यसमाप्ति पश्यामति पूर्वेण सम्बन्धः।।८।।

सप्तक साधने विशेषनियमानाहेति।

## मूलम्

इतिनिशि प्रयतिस्तुनिरासनो यममुखः शिवभावमनुस्मरन्
प्रतिदनं दशवार दिनत्रयं जपतिनिग्रह दारुणसप्तकम्।।६।।

## भाष्यम्

इति पूर्वोक्त क्रमेण प्रयतः संयतः सन्। तु अवधारणे अर्थात् प्रयत एवात्र विनियुज्यते। निरासनः आस्यते अस्मिन्नति आसनं शय्या, तन्निर्गतः जितनिद्र इत्यर्थः। यममुखः यमनयमप्रधानः यमनययोर्योगाङ्गत्वात्। यमपदेन उभयोर्ग्रहणम् प्रयत इति वचनात्। निशि रात्रौ 'यानिशा सर्वभूताना' मिति गीतावचनात्। शिवभावं

अखिलसुरगणाः इन्द्रयाधिदेवा भूताश्च प्राणिनः पञ्चभूतानिच लिङ्गव्यत्यय आर्षत्वात्। दृष्टवा नन्दन्तु प्रसन्ना भवन्तु उभयेषांहितत्वात् प्रीतिचितः प्रसन्नो वेतालपूगः प्राणविशेष समुदायः तदखिलं पिवतु। वेतालपूगस्य आग्नेय भाव विशेषत्वात् समुचितमेव युद्धक्षेत्रं यज्ञं कृत्वा निर्दिष्टवान् अनेन आध्यात्मिक एवं यज्ञोऽत्राभिप्रेतः देवासुर भावयोर्विरुद्धत्वेन प्रतिक्षणं युद्धकारित्वेन च प्रसिद्धत्वात्। त्रिदशविघटनमिहेन्द्रियाणां वैचित्यरूपं मुसलगदारूपं, सामर्थ्य विशेष वृत्तवात्येति प्राणानां वृत्याकारेण प्रवर्तनमिहेति ग्राह्यम्।।७।।

साधकः साधनालब्धं सामार्थ्यामवाप्यहर्षितो गर्जितः सन् प्राहादल्पमिति—

## मूलम्

अल्पं दोर्दण्डबाहु प्रकटित विनमच्चण्ड को दण्डमुक्तैर्बाणै र्दिव्यैरनेकैः शिथिलितवपुषः क्षीणकोलाहलस्य तस्य प्राणावसानं परशरभ विभोऽहंत्वदिज्या प्रभावैः तूर्णम पश्यामि यो मां परहसति सदा त्वादिमध्यान्त हेतो।।८।।

## भाष्यम्

हे परशरभ विभो आदिमध्यान्तहेतो उत्पत्ति स्थिति संहारकारण त्वदिज्या प्रभावैः तव सङ्गतीकरण रूपैः प्रभावैः तूर्णं शीघ्रं पश्यामि। यस्तु सदा मां परहसति इन्द्रियगणः,

त्वत्कृपया वशीभूते तस्मिन्, परहासः कीदृश इति पश्यामि इति साभमानोक्तिः। उक्तिं च तुलसीदासे—परवशदेखहँस्यौ इनि इन्द्रिन स्ववश होय न हंसे हौं।'

अल्पं निम्नं दोर्दण्डो भुजदण्डश्चासौ बाहुश्च तेन प्रकटितो विनमच्चण्डोदण्डः प्रहरण सामर्थ्य विशेषः। प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते,' इति श्रुतिः। तेन मुक्तैरनेकैः दिव्यैः साधनरूप सामर्थ्यैः शिथिलितवपुषः क्षीणकोलाहलस्य क्षीणशरीरस्य कार्श्यमापन्नस्य विक्षेपरहितस्य तस्य इन्द्रियगणस्य प्राणावसानं सामर्थ्यसमाप्ति पश्यामति पूर्वेण सम्बन्धः।।८।।

सप्तक साधने विशेषनियमानाहेति।

## मूलम्

इतिनिशि प्रयतिस्तुनिरासनो यममुखः शिवभावमनुस्मरन्
प्रतिदनं दशवार दिनत्रयं जपतिनिग्रह दारुणसप्तकम्।।६।।

## भाष्यम्

इति पूर्वोक्त क्रमेण प्रयतः संयतः सन्। तु अवधारणे अर्थात् प्रयत एवात्र विनियुज्यते। निरासनः आस्यते अस्मिन्नति आसनं शय्या, तन्निर्गतः जितनिद्र इत्यर्थः। यममुखः यमनयमप्रधानः यमनययोर्योगाङ्गत्वात्। यमपदेन उभयोर्ग्रहणम् प्रयत इति वचनात्। निशि रात्रौ 'यानिशा सर्वभूताना' मिति गीतावचनात्। शिवभावं

कल्याणभावनात्मकं परमात्मानं शिवं शरभमनुस्मरन् मुहुर्मुहः आवर्तयन् प्रतिदिनं प्रत्यहं दशवारं दशवृत्यात्मकं तद्युक्तिं दिनानां सप्तानां त्रयम् एकविंशति दिन पर्यन्तमित्यर्थः। निग्रह दारुण सप्तकं निग्रहकारकं दारुणसप्तकं सप्तश्लोकात्मकम्, मध्यम पद लोपत्वात्। 'मनो दुर्निग्रहं परम्' दारुणं भीष्मं भयानकम् इन्द्रियाणां निग्रहे दारुणा सप्तकम्। इन्द्रियाणां प्रमथानशीलत्वात्। इन्द्रियाणिप्रमाथीनि हरन्ति प्रसभं मनः' इति प्रमाणात्। अतएव दशवारेति ग्रहणम्। ननु मनसोपीन्द्रियत्वात् कथं दशवारेति चेन्न मनसो निरुद्धत्वात् इन्द्रियस्य 'इन्द्रियेभ्यः पराह्यर्थो अर्थेभ्यश्च परं मनः' इति पृथङ् निर्देशात्। एकविंशति दुःखध्वंसो मोक्ष इति न्यायविदां समयः तस्मादेकत्वात् विंशतिग्रहणम्।।१०।।

## मूलम्

इति गुह्यं महाबीजं परमं रिपुनाशनम्।।
भानुवारं समारभ्य मङ्गलान्तं जपेत् सुधीः।।१०।।
इति श्री आकाश भैरवकल्पे प्रत्यक्ष।
सिद्धिप्रदे नरसिंहकृता शरभस्तुतिः समाप्ता।।

## भाष्यम्

इति गुह्यं गुहायां भवं महाबीजं कारणं सर्वेषां स्तोत्राणां परमं श्रेष्ठं रिपुनाशनं कामक्रोध निवारकम् 'जहि शत्रुं

महावाहो कामरूपं दुरासदम्' जहि शत्रुं रपमृधोनुदस्वाभयंकृणुहि विश्वतो नः।' (कण्व सं ७–३८) 'शत्रूणां ग्रीवाः कृन्तामि (का०सं०)

कामएष क्रोध एष रजोगुण समुद्भवः।
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामक्रोधस्तथा लोभः तस्मादेतत्त्रयं त्यजेत्।

भानुवारं द्वादशवारं द्वादशधा विभक्तम् ज्योतिर्मय रूपेण इति हेतोर्द्वादश ग्रहणम्। समारभ्य मङ्गलान्तं ब्रह्मा प्राप्ति पर्यन्तम्।

(मंगलं श्रेयसि श्वेत इति विश्वः। स्वरूप प्रान्तयोरन्तमन्तिकेऽपि प्रयुज्यते' इति शाश्वतः। 'कल्याणं मङ्गलं शिवम्–इत्यमरः।)

जपेत् स्मरेत्। सुधीः सुष्ठु धीर्यस्यासौ सुधीः। सन् सुधीः कोविदोबुधः इत्यमरः। सुधीः ब्रह्मवित् एतद् बुद्धवा बुद्धिमान् स्यात् इति गीता। इत्यनेन मारणादिषु एतत् स्तोत्र पाठकः प्रवर्तते इति कुधियां कथनं परास्तंवेदितव्यम्। प्रथमं पद्यं मनोनिग्रहात्मकम् इन्द्रियनिग्रहात्मकं च द्वितीयं ब्रह्म प्राप्तिफलप्रदर्शनार्थ मितिस्तोत्रप्रतिपाद्यक्रमः प्रदर्शितः श्लोकद्वयेनेति।।१०।।

श्री अखण्ड श्री स्वामिपादैर्विरचितम् निग्रह दारुण स्प्तक भाष्यम्।

## अथ श्रीशरभदिग्बंधनम्

श्री गणेशाय नमः।। अस्य श्री शरभ दिग्बंधन महामंत्रस्य वामदेव ऋषिः अति जगती छंदः शरभसालुव पक्षिराजो देवता खंबीजं स्वाहा शक्तिः क्रों कीलकंशरभ सालुवप्रसादसिद्ध्यर्थे जपे विनियोगः।। ॐ खें खां वीर शरभाय अङ्गुष्ठाभ्यां नमः,। खं फट् उग्र शरभाय तर्जनीभ्यां नमः, प्राणग्रहासि प्राणग्रहासि हुं फट् क्रूर शरभाय मध्यमाभ्यां नमः,। सर्व शत्रु संहारणाय त्रिशूल शरभाय अनामिकाभ्यां नमः, शरभ सालुवेशाय आनंद शरभाय कनिष्ठिकाभ्यां नमः। पक्षिराजाय हुं फट् स्वाहा वज्र नख वज्र दंष्ट्र शरभाय करतल कर पृष्ठाभ्यां नमः। एवं हृदयादि न्यासः।। यथा।। ॐ खें खां वीर शरभाय हृदयाय नमः।। खं फट उग्र शरभाय शिरसे स्वाहा। प्राणग्रहासि प्राणग्रहासि हुं फट् क्रूर शरभाय शिखायै वषट्। सर्व शत्रु संहारणाय त्रिशूल शरभाय कवचाय हुं शरभ सालुवेशाय आनंद शरभाय नेत्रत्रयाय वौषट्। पक्षिराजाय हुं फट् स्वाहा वज्र नख वज्र दंष्ट्र शरभाय अस्त्राय फट्।। ॐ लें वीर शरभाय पूर्वद्वारं बन्धय२ माँ रक्ष २ महायोगीश्वराय हुं फट् स्वाहा। ॐ रं अग्नि शरभाय आग्नेय द्वारं बन्धय२ माँ रक्ष २ महा योगीश्वराय हुं फट् स्वाहा। ॐ हुं प्रलय काल शरभाय दक्षिण द्वारं बन्धय २ माँ रक्ष २ महायोगीश्वराय हुं फट् स्वाहा।। ॐ हुं प्रलय

काल शरभाय दक्षिण द्वारं बन्धय २ माँ रक्ष २ महायोगीश्वराय हुं फट् स्वाहा। ॐ शं आनंद शरभाय नैऋत द्वारं बन्धय २ माँ रक्ष २ महायोगीश्वराय हुं फट् स्वाहा।। ॐ वं प्रचण्ड शरभाय पश्चिम द्वारं बंधय२ माँ रक्ष२ महायोगी श्वराय हुं फट् स्वाहा।। ॐ यं कपाल चामुण्ड शरभाय वायव्य द्वारं बंधय २ माँ रक्ष २ महायोगीश्वराय हुं फट् स्वाहा। ॐ शं आनंद शरभाय उत्तर द्वारं बंधय२ माँ रक्ष२ महायोगी श्वराय हुं फट् स्वाहा।। ॐ शं उग्र शरभाय ईशान द्वारं बंधय२ माँ रक्ष २ महायोगीश्वराय हुं फट् स्वाहा। ॐ लं कल्याण शरभाय अंतरिक्ष द्वार बंधय २ माँ रक्ष २ महायोगीश्वराय हुं फट् स्वाहा।। ॐ क्षं प्रलय काल महा तांडव शरभाय भूमि द्वारं बंधय २ माँ रक्ष २ महायोगीश्वराय हुं फट् स्वाहा। ॐ फं दक्षाध्वरध्वंसन शरभाय सर्वदिग्द्वारं बंधय २ माँ रक्ष २ महायोगीश्वराय भूतप्रेत पिशाचोच्चाटनाय महाशरभाय सालुव पक्षिराजाय हुं फट् स्वाहा।। इति श्रीशरभ दिग्बन्धनं समाप्तम्।।

## ।। श्री शरभशान्ति स्तोत्रम्।।

श्री गणेशायनमः।। रुद्रः शंकरईश्वरः पुर हरः स्थाणुः कपर्दी शिवो, वागीशोवृषभध्वजःस्मरहरो भक्तप्रियस्त्र्यम्बकः। भूतेशो जगदीश्वरश्च–शरभो मृत्युंजयः श्रीपतिरस्मान्काल गलोवता

त्पशुपतिः शंभु पिनाकी हरः।।१।।
यतो नृसिंहं हरसे हरइत्युच्यते बुधैः।
यतो विभर्षि सकलं विभज्य तनुमष्टधा।।२।।
अतोस्मान् पाहि भगवन्नः प्रसीद पुनः पुनः।
इतिस्तुतो महादेवः प्रसन्नो भक्तवत्सलः।।३।।
सुरानाल्हादयामास वरदानैरभीप्सितैः।
प्रसन्नोस्मि स्तवेनाहमनेन विवुधेश्वराः।।४।।
मयि रुद्रे महादेवे भजध्वं भक्ति पूरिताः।
ममांशोयं नृसिंहोऽपि मयि भक्ततमो स्त्विह।।५।।
इमं स्तवं पठेद्यस्तु शरभेशाष्टकं नरः।
तस्य नश्यंति पापानिरिपुवच्च सुरोत्तमाः।।६।।
नश्यंति सर्वरोगाणि क्षय रोगादिकानिच।
अशेष ग्रह भूतानि कृत्रिमाणि ज्वराणि च।।७।।
सर्पचौरादिशार्दूल गज पोत्रि मुखानि च।
अन्यानि च वनस्थानि नास्ति भीतिर्न संशयः।।८।।
इत्युक्तवांतर्दधे देवि देवान् शरभ सालुवः।
ततस्ते स्वस्वधामानिगताश्चाह्लाद पूर्वकम्।।६।।
एतच्छारभकं स्तोत्रंमंत्रभूतं जपेन्नरः।
सर्वान्कामान् वाप्नोति शिव लोकं स गच्छति।।१०।।
।।इति श्री आकाश भैरव तन्त्रे शरभ शान्ति स्तोत्रम्।।

**।।श्री शरभ सहस्त्र नाम स्तोत्रम्**

श्री गणेशायनमः ।। ॐ खें खां खं फट् प्राण ग्रहासि प्राण ग्रहासि हुं फट् सर्व शत्रु संहारणाय शरभ सालुवाय पक्षिराजाय हुं फट् स्वाहा।। द्विचत्वारिंशद्वर्णः ॐ अस्य श्री शरभ मन्त्रस्य कालाग्नि रुद्र ऋषिर्जगति छंदः श्री शरभेश्वरो देवता ऊं बीजं स्वाहा शक्तिः फट् कीलकं श्री शरभेश्वर प्रीत्यर्थे जपे विनियोगः। शिरसि कालाग्नि रुद्राय ऋषये नमः। मुखे जगती छंदसे नमः।। हृदि शरभेश्वराय देवतायै नमः गुह्ये ऊँ बीजाय नमः। पादयोः स्वाहा शक्तये नमः।। सर्वांगं हुं फट् कीलकाय नमः।। ऊँ खें खां अङ्गुष्ठाभ्यां नमः।। खं फट् तर्जनीभ्यां स्वाहा।। प्राण ग्रहासि प्राणग्रहासि हुं फट् मध्यमाभ्यां वषट्। सर्वशत्रु संहारणाय अनामिमाभ्यां हुं ।। शरभ–सालुवाय कनिष्ठिकाभ्यां वौषट्।। पक्षिराजाय हुं फट् स्वाहा करतलकर पृष्ठाभ्यां फट्।। अथ हृदयादि न्यासः।। ॐ खें खां हृदयाय नमः ॐ खं फट् शिरसे स्वाहा।। प्राणग्रहासि प्राणग्रहासि हुं फट् शिखायै वषट्।। सर्वशत्रु संहारणाय कवचाय हुं।। शरभ सालुवाय नेत्र त्रयाय वौषट्।। पक्षिराजाय हुं फट् स्वाहा अस्त्राय फट्।।

**।।ध्यानम्।।**

चंद्रार्कौ वन्हि दृष्टिः कुलिशवर नखश्चंचंलोत्युग्र जिह्वः।
काली दुर्गा च पक्षौ हृदय जठरगौभैरवो वाडवाग्निः।।

ऊरुस्थौ व्याधि मृत्यु शरभवर खगश्चण्ड वातातिवेगः, संहर्त्ता सर्वशत्रून् स जयति शरभः शालुवः पक्षिराजः ।।१।। वर्ण सहस्त्रं जपः।। पायसेन घृताक्तेन होमः।। अथ संकल्पः। गौरी वल्लभ कामारे काल कूट विषादन। मामुद्धरापदाम्माधेस्त्रि पुरघ्नान्त कांतकः। अथ श्री शरभ सहस्रं नाम स्तोत्रम् ॐ सर्व भूतात्म भूतस्य रहस्यमित तेजसः। अष्टोत्तर सहस्त्रं तुनाम्नां सर्वस्य मे शृणु।। यच्छुत्वा मनुज व्याघ्र सर्वान्कामानवाप्यसि। स्थिरः स्थाणुः प्रभुर्भीमः प्रभवोवरदो वरः।।२।।

जटीचर्मीशिखण्डी च सर्वाङ्गः सर्वभावनः।
हरश्च हरिणाक्षश्च सर्वभूत हरः प्रभुः।।३।।
प्रवृत्तिश्च निवृत्तिश्चनियतः शाश्वतोध्रुवः।
श्मशानवासी भगवान् वचसोऽगोचरो धनः।।४।।
अतिवाधो महा कर्मा तपस्वी भूत भावनः।
उन्मत्तवृषोथ प्रच्छन्नः सर्वलोकप्रजापतिः।।५।।
महारूपो महाकायो वृषरूपो महायशाः।
महात्मा सर्व भूतात्मा विश्वरूपो महाहनुः।।६।।
लोक पालोंऽतर्हितात्मा प्रसादोहय गर्दभी।
पवित्रश्च महांश्चैव नियमो निगमप्रियः।।७।।
सर्व कर्मा स्वयंभूश्च आदि सृष्टि करोनिधिः
सहस्राक्षो विरूपाक्षः सोमोनक्षत्र साधकः।।८।।

सूर्यचंद्र गतिः केतु र्ग्रहो ग्रहपतिर्वरः।
अदारिद्रघ्नालयः कर्ता मृगवाणार्पणोनघः।।६।।
महातपा दीर्घतपा अदीनोदीन साधनः।
संवत्सरकरो मंत्री प्रमाणं परमं तपः।।१०।।
योगी योग्यो महाबीजो महारेता महातपाः।
सुवर्ण रेताः सर्वज्ञः सुवीजो वृषवाहनः।।११।।
दशबाहुश्चनिमिषो नीलकण्ठ उमापतिः।
बहुरूपः स्वयं श्रेष्ठो बलिर्वैरोचनो गणः।।१२।।
गणकर्त्ता गणपतिर्दिग्वासाः काम एव च।
मंत्र वित्परमोमंत्राः सर्वभाव करोहरः।।१३।।
कमण्डलु धरोधन्वी वाणहस्तः कपालवान्।
अशिनी शतघ्नी खण्डी पट्टिशश्चायुधी महान्।।१४।।
श्रुति हस्तः सरूपश्च तेजस्तेजस्करो विभुः।
उश्नीषीच सुवक्त्रश्च उदग्रोविनयस्तथा।।१५।।
दीर्घश्च हरिनेत्रश्च सुतीर्थः कृष्णएवच।
श्श्रृगालरूपः सर्वार्थोमुण्डः सर्वकमण्डलुः।।१६।।
अजश्च मृगरूपश्च गंधाचारी कपर्दिनः।
ऊर्ध्वरेता उर्ध्व लिंग उर्ध्वशायी नभस्तलः।।१७।।
त्रिजटश्चौरवासीचरुद्रसेनापतिर्विभुः
नक्तं चरोतितिग्मश्च अहश्चारी सुवर्चसः।।१८।।
गजहादैत्यहाचैव लोक भ्राता गुणाकरः।

सिंह शार्दूल रूपश्च आर्द्रचर्मांवरोवरः।।१६।।
कालयोगी महाकालः सर्व वासाश्चतुष्पथः।
निशाचर प्रेत चारी भूत चारी महेश्वरः।।२०।।
बहुरूपो बहुधान सर्वाधारो मनोगतिः।
नृत्यप्रियो नृत्य तृप्तो नृत्यकः सर्वमालयः।।२१।।
घोषो महातपा ईशो नित्यो गिरिचरो नभः।
सहस्र हस्तो विजयो व्यवसायोह्यनिंदितः।।२२।।
अमर्षणो महामर्षी यज्ञ कामो मनोमयः।
दक्ष यज्ञापहारी च सुखदो मध्यमस्तथा।।२३।।
तेजोपहारी बलहा मुदितोप्यजितोभवः।
दंभीद्वेषी गंभीरो गंभीरबलवाहनः।।२४।।
न्यग्रोधरूपो न्यग्रोधो वृक्षकर्त्तास्गवृद्विभुः।
तीक्ष्ण वाहुश्च हर्षश्च सहायः सर्वकालवित्।।२५।।
विष्णु प्रसादितो यज्ञः समुद्रो वडवामुखः।
हुताशन सहायश्च प्रशान्तात्मा हुताशनः।।२६।।
उग्रतेजा महातेजा जयो जयो विजय कालवित्।
ज्योतिषामयनः सिद्धिः संधिविग्रह एव च।।२७।।
शिखी दंडी जटी ज्वाली मृत्युजिद्दुर्धरो वली।
वैष्णवी पणवीताली कालः काटकटंकरः।।२८।।
नक्षत्र विग्रह विधिर्गुण वृद्धि लयोगमः।
प्रजापति दिशा वाहु •विभागः सर्वतोमुखः।।२६।।

वैरोचनो सुर गणोहिरण्य कवचो द्भवः।
अप्रज्यो वालचारी च महाचारी स्तुतस्तथा।।३०।।
सर्वतूर्य निनादी च सर्वनाथ परिग्रहः।
व्यालरूपो विलावासी हेममाली तरंगवित्।।३१।।
त्रिदिशस्त्रिादिशावासी सर्वबंधविमोचनः।
बंधनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः।।३२।।
साक्षात्प्रसादो दुर्वासा सर्वसाधुनिषेवितः।
पुस्कंदनोविभावश्च अतुल्यो यज्ञभागवित्।।३३।।
सर्वचारी सर्ववासोदुर्वासा वाङ्मनोभवः।
हेमो हेमकरोयज्ञः सर्ववीरो नरोत्तमः।।३४।।
लोहिताक्षो महोक्षश्च विजयाख्यो विशारदः।
सद्ग्रहो विग्रहो कर्मामोक्षः सर्व निवासनः।।३५।।
मुख्यो मुक्तश्च देहश्च देहार्थः सर्वकामदः।
सर्वकाल प्रसादश्च सुवलो वलरूपधृक्।।३६।।
आकाशनिधिरूपश्च निषादी उरगः खगः।
रौद्ररूपी पांसुरादीः वसुरग्निः सुवर्चसी।।३७।।
वसुवेगो महावेगो महायक्षो निशाकरः।
सर्वभावप्रियावासी उपदेशकरोहरः।।३८।।
मनुरात्मा पतिर्लोकी संभोज्यश्च सहस्रशः।
पक्षी च पक्षिरूपी च अतिदीप्तोविशांपतिः।।३६।।
उन्मादोमदनः कामोह्यास्योर्थकरोयशः।

वामदेवश्च रामश्च प्राग्दक्षिणश्चवामनः।।४०।।
सिद्ध योगो महर्षिश्च सिद्धार्थः सिद्धि साधकः।
विष्णुश्च भिक्षुरूपश्चविषघ्नो मृदुरव्ययः।।४१।।
महासेनोविशाखश्च वृष्टिभोगो गवांपतिः।
वज्रहस्तश्च विष्कुंभी च भूस्तंभन एवच।।४२।।
वृत्तोवृत्ताकरः स्थाणुर्मधुर्मधुकरोघनः।
वाचस्पत्यो वाजसेनो नित्यमाश्रमपूजितः।।४३।।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित्।
ईशान ईश्वरः कालो निशाचारी पिनाकधृक्।।४४।।
निमित्तज्ञोस्थो निमत्तश्चनंदिर्नादकरोहरिः।
नंदीश्वरश्चनंदी च नंदिनो नंदिवर्द्धनः।।४५।।
भगहारीनिहंता च कालो ब्रह्मा पितामहः।
चतुर्मुखो महालिंगश्चतुर्लिंगस्तथैव च।।४६।।
लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः।
बीजाध्यक्षो बीजकर्त्ता अध्यात्मानुगतो बलः।।४७।।
इतिहासः सकल्पश्च गौतमोथ निशाकरः।
दंभोह्यदंभोवैदंभो वश्यो वश्यकरः कलिः।।४८।।
लोककर्त्ता पशुपति र्महाकर्त्ताह्यनौषधः।
अक्षरं परमं ब्रह्म वलटाच्चन्नएवच।।४६।।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धोमान्यो गतागतिः।
बहुप्रसादः सुस्वप्नो दर्प णोथत्वमित्रजित्।।५०।।

वेदकारो मन्त्रकारोविद्वान्समरमर्दनः।
महामोघ निवासी च महाघोरो वशीकरः।।५१।।
अग्नि ज्वालो महाज्वालो अतिधूम्रो हुतोहविः।
वृषलः शंकरो नित्योवर्चसीधूम्रलोचनः।।५२।।
नीलस्तथांगलुब्धश्च शोभनो निरवग्रहः।
स्वस्तिदः स्वस्ति भावश्च भोगीभोग करोलघुः।।५३।।
उत्संगश्चमहांगश्च महाभोगो परायणः।
कृष्णवर्णः सुवर्णश्च इंद्रियं सर्वदेहिनाम्।।५४।।
महापादो महाहस्तो महाकायो महायशाः।
महामूर्द्धा महामात्रो महानेत्रो निशालयः।।५५।।
महांतको महाकर्णो महोक्षश्च महाहनुः।
महाननो महाकंवुर्महाग्रीवः श्मशान भाक्।।५६।।
महावक्षा महोरस्को ह्यंतरामामृगालयः।
लंबितो लंबितोष्टश्च महामाया पयोनिधिः।।५७।।
महादंतो महादंष्ट्रो महाजिह्वो महामुखः।
महानखो महारोमा महाकेशो महाजरः।।५८।।
प्रसन्नश्च प्रसादश्च प्रतययोयोगिसाधनः।
स्नेहनोतिशुभस्नेहः अजितश्चमहामुनिः।।५९।।
वृक्षकारोवृक्षकेतुः अनलोवायुवाहनः।
मंडली धामश्च देवाधिपतिरेवच।।६०।।
अथर्वशीर्षः सामास्यः ऋक् साहस्र मितेक्षणः।

यजु: पादभुजागुह्यः प्रकाशो जंगमस्तथा।।६१।।
अमोघार्थप्रसादश्च अतिगम्यः सुदर्शनः।
उपकारप्रियः सर्वः कनकः कांचनस्थितः।।६२।।
नाभिर्नदिकरो भावः पुष्करस्य पतिस्थिरः।
द्वादशास्त्रमसश्वाघो यज्ञोयज्ञसमाहितः।।६३।।
नक्तं कलिश्च कालश्च ककारः कालपूजितः।
सवाणो गणकारश्च भूतवाहन सारथिः।।६४।।
भस्मशायी भस्मगोप्ता भस्मभूतस्तमोगुणः।
लोकपालस्तथा लोकोमहात्मा सर्वपूजितः।।६५।।
शुक्लस्त्रिशुक्लसंपन्नः शुचिर्भूतनिषेवितः।
आश्रमस्थः क्रियावस्थो विश्वकर्मा मतिर्वरः।।६६।।
विशालशाखस्ताम्रोष्टोह्यंबुजालः सुनिश्चलः।
कपिलः कपिलः शुक्ल आयुश्चैव परोवरः।।६७।।
गंधर्वो ह्यदितिस्ताक्ष्र्यः सुविज्ञेयः सुशारदः।
परश्वधायुधोदेव अंधकारिः सुवांधवः।।६८।।
तुंबवीणो महाक्रोध ऊर्ध्वं रेता जलेशयः।
उग्रोवंशकरोद्वंशो वंशनादोह्यनिंदितः।।६९।।
सर्वांगरूपो मायावी सुह्यदोह्यनिलोनलः।
बंधनोबंधकर्त्ता च सुबंधुरविमोचनः।।७०।।
मेषजारिः सुकर्मारिर्महादंष्ट्र समोयुधि।
बहुस्वनिर्मितः सर्वः शंकरः शंकरोवरः।।७१।।

अमरेशो महादेवो विश्वदेवः सुरारिहा।
निसंगश्चाहिर्बुध्न्यश्चाकिताक्षो हरिस्तथा।।७२।।
अजैक पाल पालीचत्रिशंकुरजितः शिवः।
धन्वंतरिर्धूम्रकेतुः स्कंदो वैश्रवणस्तथा।।७३।।
धाताशक्रश्च विश्वश्च मित्रस्त्वष्टाध्रुवो वसुः।
प्रभावः सर्वगोवायुरर्यमासवितारथिः।।७४।।
उग्रदंष्ट्रो विधाता च मांधाता भूतभावनः।
रतिस्तीर्थश्च वाग्मीच सर्वकर्मगुणावहः।।७५।।
पद्मवक्रो महावक्रश्चंद्रवक्रो मनोरमः।
वलयान्यश्चशांतश्च पुराणः पुण्य वर्चसः।।७६।।
कुरुकर्त्ता कालरूपी कुरुभूतो महेश्वरः।
शर्वो सर्वोदर्भशायी सर्वेषां प्राणिनांपतिः।।७७।।
देवदेव सुखाशक्तः सदसत्संवररत्नवित्।
कैलास शिखिरावासी हिमवद्गिरिसंश्रयः।।७८।।
कूलहारी कूलकर्त्ता बहुबीजो बहुप्रदः।
वनिजो वर्द्धनो दक्षो नकुलश्चंदन श्छदः।।७६।।
सारग्रीवी महा जंतुरत्नकश्च महौषधिः।
सिद्धार्थकारी सिद्धार्थ छंदो व्याकरणानि च।।८०।।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः।
प्रभावात्मा जरास्तालो ल्लोकाहितान्तकः।।८३।।
सारंगोऽसुखावक्रांत केतुमाली स्वभावतः।

भूताश्रयो भूतपतिरहोरात्रमनिंदकः।।८२।।
आसनः सर्वभूतानां निलयश्च विभुभैरवः।
अमोघ सर्व भूषास्यो याजनः प्राणहारकः।।८३।।
धृतिमान् ज्ञातिमान् दक्षः सत्कृतश्चयुगाधिपः।
गोपालो गोपतिर्गोप्ता गोश्चवसनोहरः।।८४।।
हिरण्यबाहुश्च तथा गुह्यकालः प्रवेशकः।
प्रतिष्ठायां महाहर्षोजितकामोजितेंद्रियः।।८५।।
गांधारश्च सुशीलश्चतपः कर्मरतिर्धनः।
महागीतो महाब्रह्मार्ह्मक्षरोगणसेवितः।।८६।।
महाकेतुः कर्मधातनैकतानश्चराचरः।
अवेदनीय आवेशः सर्वगंध सुखावहः।।८७।।
तोरणास्तरणोवायुः परिधावति चैतकः।
संयोगो वर्द्धनोवृद्धो महावृद्धो गणाधिपः।।८८।।
नित्योधर्मसहायश्च देवासुरपतिः पतिः।
अमुक्तो मुक्तबाहुश्च द्विविधश्च सुपर्वणः।।८९।।
आषाढश्च सुखाढ्यश्च ध्रुवो हरिहयो हरिः।
वसुरावर्त्तनो नित्यो वसुश्रेष्ठो महामदः।।९०।।
शिरोहारी च वर्षी च सर्वलक्षणभूषितः।
अक्षरश्चाक्षयो योगी सर्व योगी महावलः।।९१।।
समाम्नायोऽसमाम्नायस्तीर्थ देवो महाद्युतिः।
निर्बीजोजीवनो मंत्रो अनघो बहुकर्कशः।।९२।।

रक्तप्रभूतो रक्तांगो महार्णवनिनादकृत् ।
मूलो विशाखो "यमृतोक्त व्यक्तोव्यः सनातनः ।।६३।।
आरोहणो निरंहश्च शैलहारी महातपाः।
सेनाकल्पो महाकल्पो युगो युगंकरोहरिः ।।६४।।
युगरूपो महारूपो पवनो गहनो नगः।
न्याय निर्वापणो नादः पंडितोह्यचलोपमः ।।६५।।
बहुमालो महामालः सुमालो बहुलोचनः।
विस्तारो लवणः क्रूरः ऋतुमासफलोदयः ।।६६।।
वृषभोवृषभागांगो मणिबंधुर्जटाधरः।
इन्द्रोविसर्गः सुमुखः सुरः सर्वायुधः सहः ।।६७।।
निवेशनः सुधन्वा च पूगगंधो महाहनुः।
गंध माली च भगवान् सानन्दः सर्वकर्मणाम् ।।६८।।
मात्मनो बाहुलो बाहुः सकलः सर्व लोचनः।
रुद्रस्तालीकरस्ताली ऊर्ध्वसंहतलोचनः ।।६६।।
छत्रपद्मः सुविख्यातः सर्वलोकाश्रयो महान्।
मुण्डो विरूपो बहुलोदंडी मुण्डो विकुण्डलः ।।१००।।
हर्यक्षः ककुभोक वज्रीदीप्तावर्चः सहस्रपात्।
सहस्त्र मूर्द्धा देवेंद्रः सर्वभूतमयोहरिः ।।१०१।।
सहस्रबाहुः सर्वांगः शरण्यः सर्वकर्मकृत्।
पवित्रः स्निग्धयुर्मंत्रः कनिष्ठः कृष्णपिंगलः ।।१०२।।
ब्रह्मदंडविनिर्वातः शरघ्नः शरतापधृक्।

पद्मगर्भो महागर्भो पद्मगर्भो जलोद्भवः ।।१०३।।
गभस्तिर्ब्रह्मकृत् ब्रह्म ब्रह्मकृद्ब्राह्मणोगतिः ।
अनंत रूपोनैकात्मातग्मतेजात्मसंभवः ।।१०४।।
ऊर्ध्वगात्मा पशुपति वीतुरंगा मनोजवः ।
वंदनी पद्ममाली च गुणज्ञो स्वगुणोत्तरः ।।१०५।।
कर्णिकारो महास्रग्वी नीलमौलीपिनाकधृक् ।
उमापतिरुमाकांतो जान्हवी हृदयंगमः ।।१०६।।
वीरोवराहो वरदो वरेशश्च महामना ।
महाप्रभावस्त्वनघः शत्रुहाश्वेतपिंगलः ।।१०७।।
प्रीतात्मा प्रयत्तात्मा च संयतात्मा प्रधानधृक् ।
सर्वपार्श्वस्तुतस्ताक्ष्यों धर्मः साधारणो वरः ।।१०८।।
चराचरात्मा सूक्ष्मात्मा गोवृषो गोवृषेश्चरः ।
साध्यर्षिर्वसुरादित्यो विवस्वान् सवितामृगः ।।१०९।।
व्यासः सर्वस्य संक्षेपो विस्तारः पर्ययोनयः ।
ऋतुः संवत्सरोमासः पक्षः संख्या परायणः ।।११०।।
कला काष्टा लयो मात्रा मुहूर्त्तः पक्षपाक्षणः ।
विश्वक्षेत्रं प्रजाबीजं लिंगमाद्यस्त्वनिंदितः ।।१११।।
सद्वयक्तमव्यक्त पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ।।११२।।
निर्वाणं ज्ञानदं चैव ब्रह्म लोक परागतिः ।
देवासुरगुरुर्देवो देवासुरनमस्कृतः ।।११३।।

देवासुरमहामात्रो देवासुरसमाश्रयः।
देवासुरगणाध्यक्षो देवासुरगणाधिपः।।११४।।
देवासुरेश्वरो देवोसुरमहेश्वरः।
सर्वदेवमयो चिंत्यो देवानामात्मसंभवः।।११५।।
उद्भिज्जस्त्रिक्रमोवैद्यो विराजो वरदोवरः।
ईज्यो हस्ति मुखो व्याघ्री देव सिंहोनरर्षभः।।११६।।
विबुधाग्र वरश्रेष्ठः सर्व देवोत्तमोत्तमः।
गुरुः कांतो निजः सर्वःपवित्रः सर्ववाहनः।।११७।।
प्रयुक्तः शोभनो वज्र ईशानः प्रभुरव्ययः।
भृंगी भृंग प्रियोवभ्रू राजराजो निरामयः।।११८।।
अविरामः सुशरणो विरामः सर्वसाधनः।
ललाटाक्षो विश्वदेहो हारिणो ब्रह्मवर्चसी।।११६।।
स्थावराणांपतिश्चैव नियमेंद्रियवर्द्धनः।
सिद्धार्थः सर्वसिद्धार्थोनित्यः सत्यव्रतः शुचिः।।१२०।।
व्रतादिर्यत्परं ब्रह्म मुक्तानां परमागतिः।
विमुक्तो दीर्घ तेजाश्च श्रीमान् श्रीवर्द्धनों जगत्।।१२१।।
यथाप्रसादो भगवानिति भक्त्यास्तुतो मया।
यन्न ब्रह्मादयो देवाविदुर्यन्न महर्षयः।।१२२।।
तंस्तवीम्यहमाद्यं च कंस्तोष्यति जगत्प्रभुम्।
भक्तिश्चैव पुरस्कृत्य मया यज्ञपतिर्वसुः।।१२३।।
ततोऽनुज्ञापयामासस्तुतो मतिमतां गतिः।

शिवएवं स्तुतोदेवैः नामभिः पुष्टि वर्द्धनैः।।१२४।।
नित्ययुक्तः शुचिर्भूत्वा प्राप्न्योत्यात्मानमात्मनः।
एतद्धिपरमं ब्रह्मा स्वयंगीतं स्वयंभुवा।।१२५।।
ऋषयश्चैव देवाश्च स्तुवंत्येते नुतत्परम्।
स्तूयमानो महादेवः प्रीयते चात्मनापतिः।।१२६।।
भक्तानुकंपी भगवानात्म संस्थान् करोतितान्।
तथैव च मनुष्येषु यत्र कुत्र प्रधानतः।।१२७।।
आस्तिकः श्रद्दधानश्च बहुभिर्जन्मभिः स्तवैः।
जाग्रतोथ स्वपतश्च व्रजंतो गतिसंस्थिताः।।१२८।।
स्तुवंति स्तूयमाने च चतुष्पथि रमंति च।
जन्म कोटि सहस्रेषु नानासंसारयोनिषु।।१२९।।
जंतोर्विशुद्धपापस्य भवेभक्तिः प्रजायते।
उत्पन्नाच भवेभक्तिरनन्या सर्वभावतः।।१३०।।
एतद्देवेषु दुःप्रापोमानुषेषुचन लभ्यते।
निर्विघ्नानिश्चलाभद्रे भक्तिरव्यभिचारिणी।।१३१।।
तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृप।
ययायाति परां सिद्धिं तद्भागवतमानसः।।१३२।।
ये सर्व भावोपहताः परत्वेनानुभाविताः।
प्रपन्न वत्सलोदेवः संसारात्तान् समुद्धरेत्।।१३३।।
एवमन्येपिकुर्वन्ति देवाः संसारमोचनम्।
मनुष्याणां महादेवादन्यत्रापि तपोबलात्।।१३४।।

इतितेनेदं कल्यायाय भगवान् सदसत पतिः।
कृत्तिवासा ध्रुवं पूर्व ताड़िता शुद्ध बुद्धयः।।१३५।।
स्तवमेनं भगवति ब्रह्मो स्वयमधारयत्।
ब्रह्माप्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे।।१३६।।
मृत्युः प्रोवाचरुद्रेभ्यो रुद्रेभ्यस्तंडिमागयत्।
महता तपसा प्राप्तस्तंडिना ब्रह्म सम्मतिः।।१३७।।
स्तंडीः प्रोवाच शुक्राय गौतमायाह भार्गवः।
वैवस्वताय भगवान गौतमः प्राह साधवे।।१३८।।
नारायणाय साध्याय मनुरिष्टायधीमते।
यमाय प्राह भगवान् साध्यो नारायणोव्ययः।।१३९।।
नाचिकेताय भगवानाह वैवस्वतो यमः।
मार्कण्डेयायवार्ष्णेय नाचिकेताभ्यभाषत।।१४०।।
तथाप्यहममित्रघ्नस्तावंदधाद्य विश्रुतम्।
स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदैश्चसमितम्।।१४१।।
नास्य विघ्नानिकुर्वन्ति दानवायक्षराक्षसाः।
पिशाचा यातुधान्ताश्चगुह्यका भुजगा अपि।।१४२।।
यः पठेत्प्रयतः प्रातर्ब्रह्माचारी जितेन्द्रिय।
अभिन्नयोगो वर्षन्तु अश्वमेधफलं लभेत्।।१४३।।
इयाकाश भैरव तंत्रे हरिहर ब्रह्मविरचिते।
शरभ सहस्रनाम स्तोत्रं सम्पूर्णम्।।१४४।।

## ।। लिङ्गपुराणोक्तं श्रीनृसिंहकृत शरभस्तोत्रम् ।।

### श्रीनृसिंह उवाच

नमो रुद्राय शर्वाय महा ग्रासाय विष्णवे।।
नमः उग्राय भीमाय नमः क्रोधाय मन्यवे।।
नमो भवाय शर्वाय शङ्कराय शिवाय ते।।
कालकालाय कालाय महाकालााय मृत्यवे।
वीराय वीरभद्राय क्षयद्वीराय शूलिने।।
महादेवाय महते पशूनाम्पतये नमः।
एकाय नीलकण्ठाय श्रीकण्ठाय पिनाकिने।।
नमोऽनन्ताय सूक्ष्माय नमस्ते मृत्युमन्यवे।
पराय परमेशाय परात्परतराय ते।।
परात्पराय विश्वाय नमस्ते विश्वमूर्त्तये।
नमो विष्णुकलत्राय विष्णुक्षेत्राय भानवे।।
कैवर्त्ताय किराताय महाव्याधाय शाश्वते।
भैरवाय शरण्याय महाभैरव रूपिणे।।
नमो नृसिंहसंहर्त्रे नमः कालपुरारये।
महापाशौघ संहर्त्रे विष्णु मायान्तकारिणे।।
त्र्यम्बकाय त्र्यक्षराय शिपिविष्टाय मीढुषे।
मृत्युञ्जयाय शर्वाय सर्वज्ञाय मखारये।।
मखेशाय वरेण्याय नमस्ते वह्निरूपिणे।

महाघ्राणाय जिह्वाय प्राणापान प्रवर्तिने ।।
त्रिगुणाय त्रिशूलाय गुणातीताय योगिने ।
संसाराय प्रवाहाय महायन्त्रा प्रवर्तिने ।।
नमश्चन्द्राग्निसूर्य्याय मुक्ति वैचित्र्य हेतवे ।
वरदायावताराय सर्व कारण हेतवे ।।
कपालिने करालाय पतये पुण्यकीर्त्तये ।
अमोघायाग्निनेत्राय नकुलीशाय शम्भवे ।।
भिषक्तमाय मुण्डाय दण्डिने योग रूपिणे ।
मेघ वाहाय देवाय पार्वतीपतये नमः ।।
अव्यक्ताय विशोकाय स्थिराय स्थिरधन्विने ।
स्थाणवे कृत्तिवासाय नमः पञ्चार्थ हेतवे ।।
वरदाय कपर्दाय नमश्चन्द्रार्द्धमौलिने ।
नमस्तेऽवर राजाय वयसां पतये नमः ।।
योगीश्वराय नित्याय सत्याय परमेष्ठिने ।
सर्वात्मने नमस्तुभ्यं नमः सर्वेश्वरायते ।।
एकद्वित्रिचतुः पञ्च कृत्वास्तेऽस्तु नमो नमः ।
दशकृत्वस्तु साहस्त्रकृत्वस्ते च नमो नमः ।।
नमोऽपरिमितिं कृत्वाऽनन्त कृत्वो नमो नमः ।
नमो नमो नमोभूयः पुनर्भूयो नमो नमः ।।

**सूत उवाच**

नाम्नामष्ट शतेनैव स्तुत्वाऽमृतयेन तु।
पुनस्तु प्रार्थयामास नृसिंहं शरभेश्वरम्।।
यदायदा ममाज्ञानमत्याहङ्कार दूषितम्।
तदातदापऽनेतव्यं त्वयैव परमेश्वरः।।
एवं विज्ञापयन्प्रीतः शंङ्करं नरकेसरी।
नन्वशक्तो भवान्विष्णो! जीवितान्तं।।
पराजितः। तद्वक्त्र शेषमात्रान्तं कृत्वा शर्वस्य
विग्रहम्। शुक्तिशित्यं तदा
मङ्क्ष्‌ वीर भद्रः क्षणात्ततः।।

**इति श्री नृसिंह कृत शरभ स्तोत्रं सम्पूर्णम्**

## शरभोपनिषत्

सर्वं संत्यज्य मुनयो यद्भजन्त्यात्मरूपतः।
तच्छारभं त्रिपाद्ब्रह्म स्वमात्रमवशिष्यते।।

**ओ३म् भद्रंकर्णेभिरिति शान्तिः।।**

अथ हैनं पैप्पलादो ब्रह्माणमुवाच भो भगवन् ब्रह्मविष्णुरुद्राणां मध्ये को वा अधिकतरो ध्येयः स्यात्तत्वमेव नो ब्रूहीति। तस्मै स होवाच पितामहश्च हे पिप्पलाद श्रृणु वाक्यमेतत्। बहूनि पुण्यानि कृतानि येन तेनैव लभ्यः परमेश्वरोऽसौ। यस्याङ्गजोऽहं हरिरिन्द्रमुख्या मोहान्न जानन्ति सुरेन्द्रमुख्याः।।१।। प्रभुं वरेण्यं पितरं महेश यो ब्रह्माणं विदधाति तस्मै। वेदांश्च सर्वान्प्रहिणोति चाग्र्यं तं वै प्रभुँ

पितरं देवतानाम्।।२।। ममापि विष्णोर्जनकं देवमीड्यं योऽन्ते काले सर्वलोकान्संजहार।।३।। स एकः श्रेष्ठश्च सर्वशान्तः स एव वरिष्ठश्च। यो घोरं वेषमास्थाय शरभाख्यं महेश्वरः। नृसिंहं लोकहन्तारं संजघान महाबलः।।४।। हरिं हरन्तं पादाभ्यामनुयान्ति सुरेश्वराः मावधीः पुरुषं विष्णुं विक्रमस्व महानसि (महानिशि)।।५।। कृपया भगवान्विष्णुं विददार नखैः– खरैः। चर्माम्बरो महावीरो वीरभद्रो वभूव ह।।६।। स एको रुद्रो ध्येयः सर्वेषां सर्वसिद्धये। यो ब्रह्मणः पञ्चवक्त्रहन्ता तस्मै रुद्राय नमो अस्तु।।७।। यो विस्फुल्लिङ्गेन ललाटजेन सर्वं जगद्भस्मसात्संकरोति। पुनश्च सृष्ट्वा पुनरप्यरक्षदेवं स्वतन्त्रं प्रकटीकरोति। तस्मै रुद्राय नमो अस्तु।।८।। यो वाम पादेन जघान कालं घोरं पपेऽथो हालाहलं दहन्तम् तस्मै रुद्राय नमो अस्तु।।९।। यो वाम पादार्चित विष्णु नेत्रस्तस्मै ददौ चक्रमतीव ह्रष्ट।। तस्मै रुद्राय नमो अस्तु।।१०।। यो दक्षयज्ञ सुरसङ्धान्विजित्य विष्णुं बबन्धोरगपाशेन वीरः। तस्मै रुद्राय नमो अस्तु।।११।। यो लीलयैव त्रिपुरं ददाह विष्णुं कविं सोमसूर्याग्निनेत्रः। सर्वे देवाः पशुतामवापुः स्वयं तस्मात्पशुपतिर्वभूव। तस्मै रुद्राय नमो अस्तु।।१२।।

१. कामकालं

यो मत्स्य कूर्मादिवराह सिंहान्विष्णुँ क्रमन्तं वामनमादि विष्णुम्। विविक्लवं पीड़यमानं सुरेशं भस्मीचकार मन्मथं

यमं च। तस्मै रुद्राय नमो अस्तु।।१३।। एवं प्रकारेण बहुधा प्रतुष्ट्वा क्षमापयामासुर्नीलकण्ठं महेश्वरम्। तापत्रय समुद्भत जन्म मृत्यु जरादिभिः। नानाविधानि दुःखानि जहार परमेश्वरः।।१४।। १ एवं मन्त्रैः प्रार्थ्यमान आत्म वै सर्वदेहिनाम्। शङ्करो भगवानाद्यो ररक्षसकलाः प्रजाः।।१५।। यत्पादाम्भोरुहद्वन्द्वं मृग्यते विष्णुना सह। स्तुत्यं महेशानमवाङ्मनसगोचरम्।।१६।। भक्त्या नम्रतनोर्विष्णोः प्रसादमकरोद्विभुः। यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्न बिभेति कदाचनेति।।१७।। अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निनहितो गुहायाम्। तमक्रतुं पश्यति बीतशोको धातुः प्रसादान्महिमा तमीशम्।।१८।।

(१ प्रार्थनं सर्वदेवानामेवमङ्गी करोच्छिवः।)

वसिष्ठवैयासकिवामदेवविरिञ्चिमुख्यैर्हृदि भाव्यमानः।
सनत्सुजातादिसनातनाद्यैरीड्यो महेशो भगवानादिदेवः।।१९।।
सत्योनित्यः सर्वसाक्षी महेशो नित्यानंदो निर्विकल्पो निराख्यः।
अचिंत्यशक्तिर्भगवान्गिरीशःस्वाविद्यया कल्पितमानभूमिः।।२०।।
अतिमोहकरी माया मम विष्णोश्च सुव्रत।
तस्य पादाम्बुज ध्यानादुदस्तरा सुतरा भवेम्।।२१।।
विष्णुर्विश्वजगद्योनिः स्वांशभूतैः स्वकैः सह।

ममांश संभवो भूत्वा पालयत्यखिलं जगत्।।२२।।
विनाशं कालतो याति ततोऽन्यत्सकलं मृषा।
ॐ तस्मै महाग्रासाय महादेवाय शूलिने।
महेश्वराय मृडाय तस्मै रुद्राय नमो अस्तु।।२३।।
एको विष्णुर्महद्भूतं पृथुऽभूतान्यनेकशः।
त्रींल्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्व भुगव्ययः।।२४।।
चतुर्भिश्च चतुर्भिश्च द्वाभ्यांपञ्चभिरेव च।
हूयते च पूनर्द्वाभ्यां स मे विष्णुः प्रसीदतु।।२५।।
ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना।।२६।।
शराजीवास्तदङ्गेषु भाति नित्यं हरिः स्वयम्।
ब्रह्मैव शरभः साक्षान्मोक्षदोऽयं महामुने।।२७।।
मायावशादेव देवा मोहिता ममतादिभिः।
तस्य माहात्म्यलेशांशं वक्तुं केनाप्य शक्यते।।२८।।
परात्परतरं ब्रह्म यत्परात्परतो हरिः।
परात्परतरो हीशस्तस्मात्तुल्योऽधिको न हि।।२९।।
एक एव शिवो नित्यस्ततोऽन्यत्सकलं मृषा।
तस्मात्सर्वान्परित्यज्य ध्येयान्विष्ण्वादिकान्सुरान्।।३०।।
शिव एव सदा ध्येयः सर्व संसारमोचकः।
तस्मै महाग्रासाय महेश्वराय नमः।।३१।।
पैप्पलादं महाशास्त्रं न देयं यस्यकस्यचित्।
नास्तिकाय कृतघ्नाय दुर्वृत्ताय दुरात्मने।।३२।।

दाम्भिकाय नृशंसाय शठायानृत भाषिणे।
सुव्रताय सुभक्ताय सुव्रताय सुशीलिने।।३३।।
गुरुभक्ताय दान्ताय शान्ताय ऋजुचेतसे।
शिवभक्ताय दातव्यं ब्रह्मकर्मोक्तधीमते।।३४।।
स्वभक्तायैव दातव्यमकृतघ्नाय सुव्रत।
नादातव्यं सदा गोप्यं यत्नेनैव द्विजोत्तम।।३५।।

एतत्पैप्पलादं महाशास्त्रं योऽधीते श्रावयेद्विजः स जन्ममरणेभ्यो मुक्तो भवति।

यो जानीते सोऽमृतत्वं च गच्छति। गर्भवासाद्विमुक्त भवति। सुरापानात्पूतो भवति। ब्रह्महत्यात्पूतो भवति गुरुतल्पगमनात्पूतो भवति। स सर्वान्वेदानधीतो भवति। स सर्वान्देवान्ध्यातो भवति। समस्त महापातकोपपातकात्पूत भवति तस्मादविभुक्तमाश्रितो भवति। स सततं शिवप्रिय भवति। स शिवसायुज्यमेति। न स पुनरावर्तते न पुनरावर्तते ब्रह्मैव भवति। इत्याह भगवानब्रह्मेत्युपनिषत्

ॐ भद्रंकर्णेभिंरिंतिं शान्तिः।।

।।इति शरभोपनिषत्समाप्ता।।

श्री पीताम्बरा पीठ

ह्लीं

दतिया (म.प्र.)